Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सामवेदीयब्राह्मणानां स्वरूपं वैशिष्ट्यञ्च

लेखकः

डा० मणिलालशर्मोपाध्यायः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

डॉ॰ श्री कीर्तिकान्त शर्मा जी
को सादर समर्पित

गोपाल
18-04-2017

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सामवेदीयब्राह्मणानां स्वरूपं वैशिष्ट्यञ्च

प्रणेता

डॉ० मणिलालशर्मोपाध्यायः

शुक्लयजुर्वेदाचार्यः फलितज्योतिषाचार्यः सामवेदाचार्यः (लब्धस्वर्णपदकः),
धर्मशास्त्राचार्यः (लब्धस्वर्णपदकः),
उत्तरप्रदेशसंस्कृत अकादमीतो लब्धवेदपण्डितपुरस्कारः
वेदसहायकविभागाध्यक्षः
श्रीनन्दलालबाजोरियासंस्कृतमहाविद्यालयः, अस्सी, वाराणसी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रकाशक :—
मणिलालशर्मोपाध्यायः
के० २३।१९ दूधविनायक वाराणसी

● लेखक :

सन् १९९०
संवत् २०४७
प्रथम संस्करण ५००
मूल्यम् रु० ७०/००, सप्ततिरूप्यकाणि

मुद्रक :—
वाराणसी मुद्रण संस्थान
डी० ५१/९२ सूरजकुण्ड, वाराणसी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीः

समर्पणम्



सर्वाम्नायप्रवीणाय गुरवे ब्रह्ममूर्तये ।
गोपालचन्द्रमिश्राय स्मृतिपुष्पं समर्प्यते ।।

श्रद्धावनतः
मणिलालशर्मोपाध्यायः
तदन्तेवासी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



डॉ० मणिलाल-
शर्मोपाध्यायः
स्व० पं० श्रीतुलसीराम-
शर्मोपाध्यायसुतो
टीकादेव्यागर्भजः
समुत्तीर्ण शुक्लयजुर्वेद-ज्योतिष-
धर्मशास्त्र सामवेदाचार्यपरीक्षः
लब्धस्वर्णपदकद्वयः
उत्तरप्रदेशसंस्कृत-अकादमीतो
प्राप्तवेदपण्डितपुरस्कारः
श्रीनन्दलालबाजोरिया-
संस्कृतमहाविद्यालये
वाराणसीये वेदोपाचार्यपदे
कार्यरतः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीहरिः शरणम् ॥

मन्त्रब्राह्मणयोर्वेदनामधेयमितिवचनानुसारं ब्राह्मणग्रन्थानामपि वेदत्वं स्फुटं प्रमाणितं भवति ।

स्वर्गादिप्रापकाणां यागदानादिकर्मणां जगद्विधातुः परमेश्वरस्य च प्रमात्मकं ज्ञानं वेदेनैव संभवति । उक्तं च--

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥

स चैकोऽपि वेदो चतुर्षु भागेषु विभक्तः, प्रतिभागं बहुशाखत्वं च श्रूयते । यावत्यः शाखास्तावन्तो ब्राह्मणग्रन्था अपि समासन्नित्यपिश्रूयते । परन्तु अद्यत्वे कालप्रभावाद् बहवः शाखाभेदा विलुप्ताः, तथैव तत्तद्ब्राह्मणानामपि विलोपोऽभवत् । अस्तु एतद्विषये पश्चात्तापेनालम्, यदवशिष्टं तत्तु नूनं-संरक्षणीयमिति मन्वानेन श्रीमणिलालशर्मोपाध्यायमहोदयेन 'सामवेदीयब्राह्मणानां स्वरूपं वैशिष्टयञ्च, समाश्रित्यैकोऽनुसन्धानात्मकः प्रबन्धो महता परिश्रमेण सरलया सरसया स्वीयसंस्कृतभाषया विरचितः, स च मयाऽऽवलोकितः, अत्र किमपि अमूलमनपेक्षितं च नोल्लिखितम्, मितं हितं च यदुक्तम्, तत् संस्कृतसंस्कृतिप्रणयिनां कृते नितरां मोदावहं भविष्यति—

इति सुदृढं विश्वसन् भवानीविश्वनाथयोः परमप्रसादात् प्रबन्धकर्ताऽयं महानुभावश्चिरायुष्यं श्लाघनीयैतादृशकार्यंकरणे सुसामर्थ्यं च प्राप्नुयादिति कामयते--

डॉ० रामप्रसादत्रिपाठी

सम्मानिताध्यापकः—

सं० सं० वि० विद्यालये,

वाराणस्याम् ।

भूतपूर्व व्याकरण विभागाध्यक्षः

वेद वेदाङ्ग संकायाध्यक्षश्च

राष्ट्रपति सम्मानित भूतपूर्व उपाध्यक्ष

उत्तर प्रदेश संस्कृत अकादमी, लखनऊ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मङ्गलानुशंसनम्

औद्गात्रकर्मकलापप्रतिपादकः सामवेदो वैदिकवाङ्मये विशिष्टं स्थानं बिभर्ति। अतएव 'वेदानां सामवेदोऽस्मि' इति श्रीमद्भगवद्गीतोक्तिः; 'सामानि यो वेत्ति स वेद तत्त्वम्'--इति च शौनकोक्तिः साम सभाजयति। अपि च यज्ञविधिषु सामात्मकेन स्तोत्रकर्मणा दैव्याः सम्पदः आप्यायनमासुरसम्पदः पराभवश्च भवतीति पुष्कलवाक्यनिवहैः ब्राह्मणेषु समुद्गीतम्।

'ऋच्यध्यूढं सामगीयते', 'गीतिषु सामाख्या' इत्यादीनि लक्षणानि कृष्णस्य वेणुस्वनमिव साम्नो लालित्यं माधुर्यंपूरत्वञ्चाञ्जस्येन पथाऽभिव्यञ्जयन्ति। अतश्च साम, सृष्ट्यनुस्यूतायाः शब्दब्रह्मणः कस्या अप्यपूर्वाया आह्लादशक्त्याः प्रातिनिध्यं कुर्वदास्ते।

सामवेदीयब्राह्मणानि विषयवस्तुवैविध्यात् विशिष्टशैल्युपनिबद्धत्वाच्च सर्वथा मननीयानि सन्ति। यद्यपि मैक्समूलरादयः कतिपये विचारकाः ब्राह्मणसाहित्यं प्रति वक्रमतयो दृश्यन्ते, परं समसामयिकैरेव विचारकैस्तेषां खण्डनं कृतं ब्राह्मणसाहित्यस्य च माहात्म्यं प्रख्यापितम्।

वैदिकविदुषा श्रीमणिलालशर्मोपाध्यायेन सङ्कलितः सम्पादितश्चासौ ग्रन्थः सामवेदीयब्राह्मणसाहित्ये प्रविविक्षूणां मनस्तोषायोपकाराय च वर्तताम्। श्रीशर्माणं धन्यवादैस्संयोज्य लोकेषु सामप्रसृतिं कामये।

युगलकिशोरमिश्रः
आचार्योऽध्यक्षश्च
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सामवेदीयब्राह्मणानां स्वरूपं वैशिष्ट्यञ्चेत्यनुसन्धानात्मकप्रबन्धो मया समदर्शि। सामसंहितासम्बद्धानि बहूनि ब्राह्मणानि लभ्यन्ते। तेषां परिचयात्मकमैतिह्यमेकत्रसमवेतन्नोपलभ्यत इत्यवधार्य शुक्लयजुर्वेद--ज्योतिष धर्मशास्त्र-सामवेदाचार्येण लब्धविविधस्वर्ण पदकेन प्राप्तवेदपण्डितपुरस्कारेण डाक्टर मणिलालशर्मोपाध्यायेन तत्तदसामवेदीयब्राह्मणग्रन्थानधीत्य महता श्रमेण विश्लेषणात्मको विमर्शः प्रास्ताव्यीति साम्प्रतं प्राच्यविद्यार्वाचीनगवेषणात्मिका पद्धतिरपि समनुसृता।

संक्षेपेण शोधनिबन्धोऽयं नवनवोन्मेषशाली तत्तद्ग्रन्थमन्थनपरः कश्चन श्लाध्यः प्रयत्न इति निबन्धकारः साधुवादार्हः। आशास्यते च निबन्धानेनान्येषां वैदिकविषयाणां समीक्षणं भविष्यति। अन्तत उत्तरोत्तरमहरह वृद्धिरस्त्विति भवानीशङ्करो प्रार्थयते।

डॉ० वामदेव मिश्रः
संस्कृत-विभागः
काशी विद्यापीठ, वाराणसी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रब्राह्मणयोर्वेदनामधेयम्,

प्रत्यक्षेणानुमित्यावा यस्तूपायो न बुध्यते।
एतं विदन्तिवेदन तस्माद् वेदस्य वेदता।

ऋग्वेद एवाग्नेरजायत, यजुर्वेदोवायोः, सामवेदआदित्यात्। अतएव ऋग्वेदेऽपि–

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि यज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।

मनुनापि मुक्तकण्ठं प्रतिपादितम्––

अग्निवायुरविभ्यस्तु त्रयं ब्रह्मसनातनम्।
दुदोहयज्ञसिद्धयर्थमृग्यजुः सामलक्षणम्॥

चत्वारिश्रृङ्गाः इत्यादिमंत्रे न खलु चतुः श्रृङ्गत्वाद्यपेतं किञ्चित् यज्ञसाधनं विद्यते यन्मंत्रपाठेनानुस्मर्यते॥ एकोऽपिवेदः कर्मदृष्टया चतुर्धागृहीतः सन् वेदत्रयीति नाम्ना प्रसिद्धः। वाणभट्टेनोक्तम्––

निगृह्यमाणा वटवः पदे पदे

यजूंषि सामानि च यस्यशङ्किताः। एवञ्च "त्रयीवधूकर्णतमालपल्लवः" कविकुलगुरु श्रीहर्षप्रणीत नैषधेत्रयीमयी भूतवली विभङ्गा" इत्यादौत्रयी पदेन वेदत्रयी––गृह्यते। वेदेषु सामवेदस्य प्राधान्यमेव। अतएव गीतायां वेदानां सामवेदोऽस्मि" इत्युक्तम्।

शुक्लयजुर्वेद ज्योतिषधर्मशास्त्रसामवेदाचार्येण वाराणसेय श्रीनन्दलाल-बाजोरियासंस्कृतमहाविद्यालयस्यवेदोपाचार्यपदे कार्यरतेन, उत्तरप्रदेशसंस्कृत-अकादमीतो लब्धवेदपण्डितपुरस्कारालंकृतेन, डॉ० मणिलालशर्मोपाध्यायेन सामवेदीयब्राह्मणानां स्वरूपं वैशिष्टयञ्च प्रणीतम्॥

यत्र वेद ब्राह्मणसाहित्यैरापूर्यमाणम्, आरण्यकोपनिषत्कल्पसूत्रसाहित्यै-र्व्याख्यायमानं, ताण्डयब्राह्मणादिभिस्त्रिभुवनवन्दितं, सामवेदीयब्राह्मणस्वरूपं सरसया, सरलया, मधुरया सुर भारत्यासमुज्जृम्भितमतिरमणीयं ग्रन्थरत्नं विलोक्य नितरांप्रसन्नः प्रणेतुरभ्युदयमर्थयते।

मङ्गलाभिलाषी

डॉ० त्रिनाथशर्मा

एम० ए० शास्त्राचार्य पीएच० डी०
विभागाध्यक्षचरः
वैदिक वेदान्त दर्शन
प्रा० वि० ध० वि० संकाय
काशी हिन्द वि० वि०, वाराणसी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुरोवाक्

सामवेदीयब्राह्मणानां स्वरूपं वैशिष्ट्यञ्चादाय प्रणीतोऽयमनुसन्धानात्मक-प्रबन्धः सम्प्रति विदुषां पुरतः समुपस्थापितोऽस्ति। अस्य प्रणेतृत्वेनैतद्विषये किमपि वक्तुमुचितमेव स्यादिति तदभिमुखोऽस्मि।

वेदस्य हि संहितान्तरापेक्षया सामसंहिताया लभ्यन्ते बहूनि ब्राह्मणानि। तानि च मुद्रितान्येवापि एकत्राध्ययनं न सुकरं तेषाम्। तेन तेषामेकत्राध्ययन सौकर्यमेवास्य प्रबन्धस्य प्रयोजनम्।

अत्र हि विषयस्य पूर्वाधाररूपेण वेदसाहित्यं स्वरूपपरिचायकत्वेन ब्राह्मणसाहित्यञ्च सङ्क्षेपत उपस्थापितमस्ति। ततश्च प्रबन्धस्य मूलविषयः। तत्र सामवेदसम्बद्धानां नवानां ब्राह्मणानां स्वरूपं वैशिष्ट्यञ्च सङ्क्षेपतः किन्तु सारवत्तया पर्यालोचितमस्ति। ततश्च तदङ्गतया सङ्क्षेपतः आरण्यकसाहित्य-मुपनिषत्साहित्यं कल्पसूत्रसाहित्यञ्च परिचायितमस्ति।

प्रबन्धस्यास्य प्रणयने यैर्यैर्यथासम्भवः सहयोगः कृतः तेभ्यो हि शतशः साधुवादा आशीर्वादप्रदानपुरस्सरं कार्येऽस्मिन्मुत्साहयन्तां गुरुवर्याणां चरण-कमलयोः कोटिशः प्रणामाः।

अन्ते च प्रबन्धमिमं विद्वज्जनेभ्यः समर्प्य विरमे।

इति शम्।

विदुषां वशंवदः

आचार्यमणिलालशर्मोपाध्यायः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषय-सूची

१. मङ्गलाचरणम् १

२. उपोद्घातः १

३. वेदसाहित्यम् १८

४. सामवेदस्वरूपम् २९

५. ब्राह्मणसाहित्यम् ३४

६. सामवेदीयब्राह्मणानां स्वरूपं वैशिष्ट्यञ्च ४५

  १. ताण्ड्यब्राह्मणम् ४७

  २. षड्विंशब्राह्मणम् ५७

  ३. सामविधानब्राह्मणम् ६७

  ४. आर्षेयब्राह्मणम् ७४

  ५. देवताध्यायब्राह्मणम् ७७

  ६. संहितोपनिषद्ब्राह्मणम् ८०

  ७. वंशब्राह्मणम् ८३

  ८. उपनिषद्ब्राह्मणम् ८४

  ९. जैमिनीयब्राह्मणम् ८७

७. आरण्यकसाहित्यम् ८९

८. उपनिषत्साहित्यम् ९२

९. कल्पसूत्रसाहित्यम् ९४

१०. उपसंहारः ९६

११. उपयोजितग्रन्थसूची

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सामवेदीयब्राह्मणानां स्वरूपं वैशिष्ट्यञ्च

आचार्यमणिलालशर्मोपाध्यायगुम्फितम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकोऽप्यखण्डोऽपि च यज्ञसिद्ध्यै
स्वं रूपतो यो व्यभजच्चतुर्धा ।
यतः प्रवृत्तिश्च लयोऽपि यत्र
तस्मै नमो यज्ञमयाय धाम्ने ।।

—मणिलालशर्मोपाध्यायः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सामवेदीयब्राह्मणानां स्वरूपं वैशिष्ट्यञ्च

(अनुसन्धानप्रबन्धः)

१. मङ्गलाचरणम्

नो वाचो मनसोऽपि यो न विषयो योऽस्त्यक्षरे व्योमनि
यो विश्वप्रतिमानमेकमखिलं यस्यास्ति भासा विभात् ।
गायन्ति श्रुतयोऽपि यस्य चकितं दिव्यं यशो दूरतो
यो हेतुश्चलयोऽपि यत्र जगतः कस्मैचिदस्मै नमः ॥१॥
ऋचश्च सामानि यजूंषि तानि
चच्छन्दांसि वै निःश्वसितानि यस्य ।
अर्थश्च शब्दश्च य एव पृक्त-
स्तस्मै विराजे नम ईरिताय ॥२॥
प्रणम्य तान् जैमिनिनारदाद्यान् नेपालजः श्रीमणिलालशर्मा
सारं हि सामश्रुतिब्राह्मणानां सङ्क्षेपतोऽथस्वगिराऽऽतनोति ॥३॥

२. उपोद्घातः

वेदा हि खलु मानवसंस्कृतेरेवादिमाभिलेखत्वेन सर्वत्र श्रद्धीयन्ते। तेषां पौरुषेयापौरुषेयत्वे सत्यपि विवादे तेषां प्राचीनतमत्वं तु विवादबाह्यमेव ।

वेदशब्दस्य व्युत्पत्तिविषये बहुभिराचार्यैर्बहुधा निगदितमस्ति। तत्र बृहृचप्रातिशाख्यवृत्तिकृद् देवमित्रो निर्दिशति—

'विद्यन्ते ज्ञायन्ते लभ्यन्ते वा एभिर्धर्मादिपुरुषार्था इति वेदाः'

इति । तैत्तिरीयसंहिताभाष्यभूमिकायां सायणाचार्यस्त्वाह—

'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः'

इति । तत्रोक्तम्—'अलौकिकपदेन प्रत्यक्षानुमाने व्यावर्त्येते । ···· अतएवोक्तम्—
प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ।'

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति ।[1] ऋग्वेदादिभाष्यभूमिकायां महर्षिदयानन्दः कथयति—

'विदन्ति जानन्ति विद्यन्ते भवन्ति विन्दन्ति सर्वा यैर्येषु वा स वेदः'

इति ।[2] एवमेव भानुजीदीक्षितः—

विदन्त्यनेन धर्ममिति वेदः (विद ज्ञाने हलश्चेति घञ्)[3]

वेदशब्दश्च तत्र तत्र नानार्थेषु प्रयुक्तोऽपि दृश्यते। वेदो नाम विष्णुरिति विष्णुसहस्रनामस्तोत्रे ।[4] वेदो वृत्तमिति मेदिनीकोशे ।[5] वेदो यज्ञाङ्गमिति नानार्थरत्नभाषा।[6] वेदो भोगशरीरावच्छेदेन भगवद्वाक्यमिति न्यायशास्त्रे।[7] वेदो धर्मब्रह्मप्रतिपादकमपौरुषेयं वाक्यमिति वेदान्तशास्त्रे।[8] ब्रह्ममुखनिर्गतधर्मज्ञापकशास्त्रं वेद इति पुराणेषु।[9] धर्मविधायकवाक्यं वेद इति कोशकारः।[10]

वेदो नाम कुशमुष्टिप्रणीतयज्ञीयपदार्थविशेषः। इति कात्यायनीय श्रौतसूत्रे। यथा 'पत्नी वेदं प्रमुञ्चति वेदोऽसीति (२।२१) ३।८।१। विस्रंसयति। पित्र्यायाश्चास्य मन्त्रस्य वेदबन्धने विमोक्ते चोक्तः" " स्तृणात्या वेदेः ।।३।। वेदं होता गार्हपत्यस्योत्तरप्रदेशादारभ्य वेदिपर्यन्तं स्तृणाति। आङ्चमर्यादायाम्। आङत्राभिविधौ वेदिं व्याप्येति हरिस्वामिनः।"" ""इत्यादि। एवमेव—

वेदेन वै देवा असुराणां वित्तं वेद्यमविन्दत। तद्वेदस्य वेदत्वम्।
(तै० सं० १।७।४)

तां वेदेनान्वविन्दन्। (तै० ब्रा० ३।३।९।९)

तं वेदेनाविन्दंस्तद्वेदानां वेदत्वम् (मै० सं० १।४।८)

तं वेदेनान्वविन्दंस्तद्वेदानां वेदत्वम् (का० स० ३२।६)

किन्त्वत्रेदमवधेयं यद्यज्ञीयपदार्थविशेषार्थे प्रयुक्तो वेदशब्दोऽन्तोदात्तो भवति यदा ऋगादिवाचक आद्युदात्तः।

तत्पर्यायाश्च यथा अमरकोशे श्रुतिः आम्नाय त्रयी इति शब्दरत्नावल्यां छन्दः ब्रह्म निगमः इति। तत्र श्रूयते धर्मोऽनयेति श्रुतिः आम्नायतेऽभ्यस्यते धर्मोऽनेनेति आम्नायः।

बृंहति बर्द्धयति इति ब्रह्म निगम्यतेऽनेनवेतिनिगम इति बृंहति व्याख्याकाराः।

---

१. पृ० २	२.
३. अमरकोश टीकायां पृ० ७२।	४.
५.	६.
७.	८.
९.	१०. अमरकोशः १।६।३।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एके वदन्ति यन्न हि कश्चिद्वेदो नाम न हि तस्य किमपि लक्षणं तत्सत्वे प्रमाणं वा। न च तदुभयव्यतिरेकेण किञ्चिद् वस्तु प्रसिध्यति। लक्षणप्रमाणाभ्यामेव वस्तु प्रसिद्धिः सम्भवतीति। यच्चुच्यते प्रत्यक्षानुमानागमेषु प्रमाणविशेषेषु चरमो वेद इति तल्लक्षणमिति तन्न मन्वादिस्मृतिष्वतिव्याप्तेः। समयबलेन सम्यक्परोक्षानुभवसाधनमित्येतस्यागमलक्षणस्य तास्वपि सद्भावात्। अपौरुषेयत्वे सति इति विशेषणाददोष इतिचेन्न वेदस्यापि परमेश्वरनिर्मितत्वेन पौरुषेयत्वात्। शरीरधारिजीवनिर्मितत्वाभावादपौरुषेयत्वमिति चेदपि न सहस्रशीर्षा पुरुष इत्यादिश्रुतिभिरीश्वरस्यापि शरीरित्वकथनात्। कर्मफलरूपशरीरधारिजीवनिर्मितत्वाभावमात्रेण अपौरुषेयत्वं विवक्षितमिति चेन्न जीवविशेषैरग्निवाय्वादित्यैर्वेदानामुत्पादितत्वात्। ईश्वरस्य वेदनिर्मातृत्वं त्वग्न्यादिप्रेरकत्वेन। श्रूयते हि ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यादिति। (ऐ० ब्रा० ५।५।७)। मन्त्रब्राह्मणात्मकः शब्दराशिर्वेद इति चेदपि न ईदृशो मन्त्र ईदृशं ब्राह्मणमित्यनिर्णीतत्वात्।

न च तत्सद्भावे प्रमाणम्। ऋग्वेदं भगवोऽध्येमि इत्यादिवाक्यं प्रमाणमिति चेन्न तस्यापि वाक्यस्य वेदान्तःपातित्वेनात्माश्रयत्वप्रसङ्गात्। यच्च 'वेद एव द्विजातीनां निश्श्रेयसकरः परः' इत्यादिवाक्यं (या० स्मृ० १।४०) न तस्यापि प्रामाण्यं तस्यापि श्रुतिमूलत्वेन निराकृतत्वात्। न च प्रत्यक्षत्वेन तत्प्रामाण्यं-लोकप्रसिद्धा अपि वेदविषया नीलं नभ इतिवद्भ्रान्ता। इति।

अत्रोच्यते। मन्त्रब्राह्मणात्मको हि शब्दराशिर्वेद इति वेदलक्षणं सिद्धं तयोः स्वरूपस्य निर्णीतत्वात् विध्यादिवाक्यं मन्त्रस्तद्व्याख्यानं ब्राह्मणमिति। अपौरुषेयवाक्यत्वमपि तस्य सिद्धमेव कर्त्रनुपलम्भात्। तस्य प्रत्यक्षत्वमपि सिद्धमेव तस्येतरवस्तुप्रतिपादकत्ववत्स्वप्रकाशकत्वस्यापि सम्भवात्। तस्मादस्ति वेदः अस्ति च तस्य लक्षणम्।

वेदोत्पत्तिविषये सामान्यतस्त्रयः पक्षा उपस्थापिता दृश्यन्ते वेदा अपौरुषेयाः स्वयम्भुवः वेदा हि ऋषिप्रणीताः वेदा ईश्वरकृता इति। तत्र वेदा अपौरुषेया इति मीमांसकाः। यथोक्तं जैमिनीयसूत्रेषु—

'वेदांश्चैके सन्निकर्षं पुरुषाख्या ॥२७॥ अनित्यदर्शनाच्च ॥२८॥ उक्तं तु शब्दपूर्वत्वम् ॥२९॥ आख्या प्रवचनात् ॥३०॥ परं तु श्रुतिसामान्यमात्रम् ॥३१॥ कृते वा विनियोगः स्यात्कर्मणः सम्बन्धात् ॥३२॥ इति।

---

१. १।१.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्रोक्तं—

'पौरुषेयं न वा वेदवाक्यं स्यात्पौरुषेयता।
काठकादिसमाख्यानाद् वाक्यत्वाच्चान्यवाक्यवत्।
समाख्याध्यापकत्वेन वाक्यत्वं तु पराहतम्।
तत्कर्त्रनुपलम्भेन स्यात्ततो पौरुषेयता।

इति। काठकं कौथुमं तैत्तिरीयकमित्यादिसमाख्या तत्तद्वेदविषया लोके दृष्टा। तद्धितप्रत्ययश्च तेन प्रोक्तं (पाणि० ४।३।१०१) इत्यर्थे वर्तते। तथा सति व्यासेन प्रोक्तं वैयासिकं भारतमित्यादाविव पौरुषेयत्वं प्रतीयते। किञ्च विमतं वेदवाक्यं पौरुषेयं वाक्यत्वात् कालिदासादिवाक्यवत् इति प्राप्ते

ब्रूमः। अध्ययनसम्प्रदायप्रवर्तकत्वेन समाख्योपपद्यते कालिदासादि-ग्रन्थेषु तत्तत्सर्गावसाने कर्तारि उपलभ्यन्ते। तथा वेदस्यापि पौरुषेयत्वे तत्कर्तो-पलभ्येत। तन्नोपलभ्यते। अतो वाक्यत्वहेतुः प्रतिकूलतर्कपराहतः। तस्माद-पौरुषेयो वेदः। तथा सति पुरुषबुद्धिदोषकृतस्याप्रामाण्यस्यानाशङ्कनीयत्वा-द्विधिवाक्यस्य धर्मे प्रामाण्यं सुस्थितम् इति।[1]

एतदनुसारेण ऋषयो हि केवलं मन्त्रद्रष्टार एव न तु मन्त्रप्रणेतारः।

यच्च 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः' 'यो ब्रह्माणं विदधाति पूर्वं यो वेदांश्च प्रहिणोति तस्मै' 'ईशानः सर्वविद्यानां' तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत' 'यस्मादृचो अपातक्षन्यजुस्तस्मादपाकषन्। सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखम् इत्यादि-वचनं तत्तस्य सर्वज्ञतापरकमेव। अनेनैतावदेव सिध्यति यद्वेदा वस्तुतः स्वय-मुद्भूतास्ते चेश्वर प्रकाशिता इति। ईश्वरप्रकाशितत्वेनास्यापौरुषेयता स्वतः सिद्धा। तेन वेदानां स्वतः प्रामाण्यमुक्तम्। प्रामाण्यस्य स्वतस्त्वं हि कार्यकारणा-देव कार्येण सहाविर्भूतत्वमेव। तच्च वेदे प्राशस्त्येन जगत्कारणेश्वरातिरिक्तस्या-पूर्ववेदप्रकाशकस्य कस्यापि अद्ययावदनुपलम्भात्। पौरुषेयत्वं नाम स्वतन्त्रपुरुष-पूर्वकत्वमेव। क्रमवन्तो वर्णाः क्रमवन्ति पदानि। क्रमश्च क्षणोपलब्धवर्णेषु स्वत एवासम्भवादुच्चारणक्रमनिबन्धन एव। उच्चारणक्रमश्च पुरुषप्रयत्नसाध्य एवेति क्रमवत्त्वेन वेदवाक्यान्यपि पौरुषेयाणि इति चेन्न। कृतकत्वे सति कर्तुरुपस्थिति-रावश्यकी। सोऽशरीरः शरीरी वा। नाद्यः शरीरिण एव स्वतन्त्रकर्तृत्वसम्भवात्। यदि च शरीरी स्यात्तस्य चिरवृत्तत्वेन उपलब्ध्यभावेऽपि कस्यचिदपि निश्चित-

---

१. १।१.२. जैमिनीयन्यायमालाविस्तरः पृ० २१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वेनासौ स्मृतिपथमवतरेत् । न च स केनापि स्मर्यते । तेन वेदानामपौरुषेयत्व-मव्याहतमेवेति प्रकरणसारः ।[1]

श्लोकवार्तिकेऽप्युक्तम्—

वचनान्तरसाधर्म्यात्कर्तुः सामान्यसम्प्लवे ।
समाख्यया विशेषोऽयं कठादिरवधार्यते ।
अनपेक्षितसूत्रे या रूपात्कृतकतोदिता ।
वेदे सा दृश्यते स्पष्टा कृतकार्याभिधायिनि ।

(इति चेन्न । यतः)—

स्मृतिप्रयोजनाभावात्कर्तृमात्रेऽनपेक्षिते ।
सामान्यसिद्ध्यपेक्षत्वान्न समाख्या नियामिका ॥
अन्यथाऽप्युपपन्नत्वादियं प्रवचनादिना ।
न शक्ता कर्तृमूलाय प्रोक्ते च स्मरणं स्थितम् ।
श्रुत्यादेर्दुर्बला चासौ न शक्ता तानि बाधितुम् ।
अङ्गभूयांसमेकेयं शब्दराशिं न बाधते ।
कामं वा निर्निमित्तेयं शाखामेकां वदिष्यति ।
श्रुतिसामान्यमात्रं हि नात्र दण्डेन बाध्यते ।[2]
सति साधारणत्वे वा सम्भवेन विशेषणम् ।
यथा वैरूपसामेति सत्तयैव प्रतीयते ।
अव्यासङ्गिच सर्वेषु प्रवक्तृत्वं कठादिषु ।
तेनैकव्यपदेशत्वं लक्ष्यते डित्थमातृवत् ।
अन्यैस्तुल्येऽपि सम्बन्धे यत्नैर्न व्यपदिश्यते ।
न ह्येषः कर्तृसंस्कारः पारार्थ्यञ्चैक इष्यते ।
विद्यमाननिमित्तञ्च कथ्यते नासतः क्रिया ।
साधारणञ्च तीर्थादि केनचिद् व्यपदिश्यते ।
यदि चापौरुषेय्येषा नानित्यप्रतिपादिनी ।
पौरुषेय्यास्तु सत्यत्वं कथमव्यवसीयते ।
नित्यमेव निमित्तं वा कठत्वं जातिरस्ति नः ।
काठकादिप्रवृत्त्यर्थं व्यावृत्तं चरणान्तरात् ।
अनित्यार्थाभिधायित्वं स्वयमेवैष मुञ्चति ।
नित्यानित्यविकल्पेन वेदस्तादर्थ्यवर्जनात् ।

---

१. वेदप्रामाण्यचन्द्रिका पृ० ३. २.   २. १।१।२७ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नित्यस्य नित्य एवार्थः कृतकस्याप्रमाणता ।
उन्मत्तवचनत्वं तु पूर्वमेव निराकृतम् ।[१]

एवमेव साङ्ख्या अप्याहुः । यथा—वाच्यवाचकभावः सम्बन्धः शब्दार्थयोः ॥३८॥ त्रिभिः सम्बन्धसिद्धिः ॥३९॥ न कार्ये नियम उभयथादर्शनात् ॥४०॥ लोके व्युत्पन्नस्य वेदार्थप्रतीतेः ॥४१॥ न त्रिभिरपौरुषेयत्वाद्वेदस्य तदर्थस्यातीन्द्रियत्वात् ॥४२॥ न यज्ञादेः स्वरूपतो धर्मत्वं वैशिष्ट्यात् ॥४३॥ निज शक्तिर्व्युत्पत्त्या व्यवच्छिद्यते ॥४४॥ योग्यायोग्येषु प्रतीतिजनकत्वात्तत्सिद्धिः ॥४५॥ न नित्यत्वं वेदानां कार्यत्वश्रुतेः ॥४६॥ न पौरुषेयत्वं तत्कर्तुः पुरुषस्याभावात् ॥४७॥ मुक्तामुक्तयोरयोग्यत्वात् ॥४८॥ नापौरुषेयत्वान्नित्यत्वमङ्कुरादिवत् ॥४९॥ इत्यादि । अस्यायमाशयः । वेदानां स्वतःप्रामाण्यं न तु वेदशब्द जन्यार्थज्ञानस्येति । प्रमाणरूपस्य वेदस्याऽस्ति स्वतः प्रामाण्यं प्रमाणान्तरानपेक्षणीयत्वात् । इति ।

तच्चापौरुषेयत्वं द्विविधं कल्पितं तत्कर्तृपुरुषास्मरणादीश्वरप्रवक्तृत्वाच्चेति । वेदा न केनाऽप्युक्ता अपितु स्वयमुद्भूता नित्या इत्याद्यः पक्षो मीमांसकादिसम्मतः । अपरस्तु वेदा ईश्वरप्रोक्ता इति साङ्ख्यवेदान्तवैशेषिकन्यायादिदर्शनसम्मतः । वैशेषिकदर्शने सूचितं—

'तद्वचनादाम्नायस्य प्रामाण्यम्'[२]

इति । व्याख्यातञ्च यथोपस्करे—तदित्यनुपक्रान्तमपि प्रसिद्धिसिद्धतया ईश्वरं परामृशति यथा तदप्रामाण्यमनृतव्याघात पुनरुक्तदोषेभ्यः । इति गौतमीयसूत्रे तच्छब्देनानुपक्रान्तोऽपि वेदः परामृश्यते । तथा च तेनेश्वरेण प्रणयनादाम्नायस्य वेदस्य प्रामाण्यम् । इति ।[२] यथा वा जयनारायणीयविवृतौ तेनेश्वरेण वचनात्कथनादाम्नायस्य वेदस्य प्रामाण्यमवश्यं स्वीकार्यमिति शेषः । ईश्वरस्याप्रक्रान्तत्वेऽपि प्रसिद्धार्थकेन तच्छब्देन परामर्शो भवत्येव।⋯⋯ यद्वा ईश्वरवाचकमेवात्र तत्पदं 'ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति वचनात्तथा च नित्यसर्वज्ञनिर्दोषपुरुषप्रणीतत्वात् वेदस्य प्रामाण्यमवश्यमेवाभ्युपेयमित्यर्थः इति ।[३] समर्थितमेतद्भाष्यकारेण शबरस्वामिना 'तच्चेश्वरनोदनाभिव्यक्ताद्धर्मादेव' इति कथयता ।[४] उक्तञ्च यथा किरणावल्यामुदयनाचार्येण-ईश्वरनोदना उपदेशो वेद इति यावत् 'इति ।[५] गौतमीये न्यायशास्त्रे सूत्रितमस्ति—५'

---

१. १।२. २.
२. वैशषिकसूत्रोपस्करे पृ० ५
३. पृ० ४.
४. सटीकप्रशस्तपादभाष्यम् पृ० ११.
५. तत्रैव ५. २.१.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आप्तोपदेशसामर्थ्याच्छब्दादर्थे सम्प्रत्ययः ॥५२॥
मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥६८॥

इति । व्याख्यातञ्च यथा विश्वनाथीय विवृत्तौ—

'आप्तस्य वेदकर्तुः प्रामाण्याद यथार्थोपदेशकत्वाद् वेदस्य तदुक्तत्वमर्थाल्लब्धं तेन हेतुना वेदस्य प्रामाण्यमनुमेयम् ।······आप्तं गृहीतं प्रामाण्यं यत्र स वेदस्तादृशेन वेदत्वेन प्रामाण्यमनुमेयमिति केचित् ।'

इति ।[१] न्यायमञ्जर्यामुक्तम्—

तथा च वैदिक्यो रचना कर्तृपूर्विकाः रचनात्वाल्लौकिकरचनावत् ।

इति ।[२] तत्र प्रतिपादितं यत्—

पदनित्यत्वपक्षेऽपि वाक्ये तद्रचनात्मके ।
कर्तृत्वसम्भवात्पुंसो वेदः कथमकृत्रिमः ?

इति । एवमेव—

यथा प्रजापतिर्वेदे तत्र तत्र प्रशस्यते ।
भारतेऽपि तथा व्यासस्तत्रतत्र प्रशस्यते ।
अथ प्रणेता वेदस्य न दृष्टः केनचित्क्वचित् ।
द्वैपायनोऽपि किं दृष्टो भवत्पितृपितामहैः ।
सर्वेषामविगीता चेत्स्मृतिः सत्यवतीसुते ।
प्रजापतिरपि स्रष्टा लोके सर्वत्र गीयते ।

इति ।[३]

यदि स्वाभाविकी वेदे पदानां रचना भवेत् ।
पदे हि हन्त तन्तूनां कथं नैसर्गीकी न सा ।

इति ।[४] तथा च

यथा घटादिसंस्थानाद्भिन्नमप्यचलादिषु ।
संस्थानं कर्तृमत्सिद्धं वेदेऽपिरचना तथा ।

इति ।[५] तेन हि वेदस्य प्रजापतिकर्तृत्वं सिद्धमिति प्रकरणसारः । उक्तमेव तत्र—

---

१. न्यायदर्शन पृ० १५८ २. पृ० २१२.
३. तत्रैव पृ० २१५. ४. तत्रैव २१६.
५. तत्रैव.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मीमांसका यशः पिबन्तु पयो वा पिबन्तु बुद्धिजाड्यापनयनाय ब्राह्मीघृतं वा पिबन्तु वेदस्तु पुरुषप्रणीत एव नात्र भ्रान्तिः।'

इति।[1]

तदत्र स्थितं वेदविषये द्विविधं मतं वेदा अपौरुषेया वेदाः पुरुषकृताश्चेति। द्वितीयपक्षोऽपि द्विविधः वेदा ईश्वरकृता वदा महर्षिकृताश्चेति। तेन वेदप्रामाण्यविषयेऽपि मतद्वयं दृश्यते वेदस्यापौरुषेयत्वेन तस्य स्वतः प्रामाण्यं वेदानामाप्तप्रामाण्यादेव मन्त्रायुर्वेदादिवत्प्रामाण्यमिति। किञ्च शब्दार्थ सम्बन्धविषयेऽपि मतद्वयमेव अपौरुषेयः शब्दस्यार्थेन सह सम्बन्ध औत्पत्तिकत्वात् आप्तोपदेशसामर्थ्याच्छब्दादर्थसम्प्रत्यय इति।

यदुच्यते। अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ऋग्वेद एवाग्ने रजायत 'ऋचः सामानि जज्ञिरे' इत्यादिकथनमाश्रित्य वेदानां पौरुषेयत्वं मन्यते तदयुक्तं तेषां वाक्यानां परस्परविरुद्धार्थतया प्रमाणान्तरप्रतिहततया च 'प्रजापतिरात्मनो वपामुदक् स्विदद्' इत्यादिवदर्थवादत्वेनाप्युपपत्तेः स्वार्थे तात्पर्याभावाच्च। काठकादिसमाख्यापि प्रवचननिबन्धनैव भविष्यतीति सिद्धं यत् कृतकं वेदानामपौरुषेयत्वं नित्यत्वञ्च। यच्चोच्यते तार्किकैः शब्दोऽनित्यः कृतकत्वात्। तदनित्यं दृष्टम्। यथा घटः। तथा चायं कृतकः। तदाधृता वेदा अपि अनित्या इति तदप्ययुक्तम्। पर्वतादौ धर्मिणि प्रत्यक्षे यथा बह्न्याद्यनुमानं तादृशमेव तार्किकै रङ्गीकरणीयम्। ततश्चैतदनुमानबलादेव शब्दस्य नित्यत्वासिद्धिरिति वेदप्रामाण्यचन्द्रिकायां स्पष्टम्।[2]

कर्तृत्वसमर्थनपक्षे वेदानामेककर्तृकत्वं समर्थ्यते। यथोक्तं न्यायमञ्जर्याम्—

एवं जगत्सर्ववत्स एव वेदानामप्येकः प्रणेता भवितुमर्हति नानात्वकल्पनायां प्रमाणाभावात् कल्पना गौरवप्रसङ्गाच्चेतिः।""अतश्चैककर्तृका वेदा यतः परस्पर व्यतिषक्तार्थोपदर्शिनो दृश्यन्ते। एकमेव हि कर्म वेदचतुष्टयोपदिष्टैः पृथग्भूतैरप्येकार्थसमवायिभिरङ्गैरन्वितं प्रयुज्यते। तत्र हि होत्रमृग्वेदेन यजुर्वेदेनाध्वर्यवमौद्गात्रं सामवेदेन ब्रह्मत्वमथर्ववेदेन क्रियते पैप्पलादिशाखाभेदोपदिष्टश्च तत्तदङ्गजातं तत्र तत्रापेक्ष्यते। तत्र सर्वशाखाप्रत्ययमेकं कर्मेत्याहुः।

एकाभिप्रायबद्धत्वं तेन सर्वत्र गम्यते।
भवेद्भिन्नाशयानां हि कथमेकार्थमीलनम्।

तस्मादेक एव कर्ता सर्वशाखानां काठकादिव्यपदेशस्तु प्रकृष्टाध्ययन-

---

१. तत्रैव पृ० २१६ २. पृ० ५५. २.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निबन्धनो भविष्यतीति भवद्भिरप्युक्तम्···इत्यादि ।[१]

वेदानामेकत्वे न कस्यापि विमतिः । पौरुषेयत्वापौरुषेयत्ववादिनोरपि तत्र समानं मतम् । एक एव यजुर्वेदो व्यस्यते द्वापरादिषु' इत्यादिवचनानि पुराणेष्वपि श्रूयन्ते । एकोऽपि वेदो रचनायास्त्रिप्रकारकत्वेन त्रयीति संज्ञितो यत्र पद्यमयी रचना ऋगिति गद्यमयी यजुरिति गानमयी सामेति व्यवह्रियते । उक्तञ्च यथा भगवता जैमिनिना—

'तेषामृग्यत्रार्थवशेन पादव्यवस्था । गीतिषु सामाख्या । शेषे यजुः शब्द इति ।[२]

तदेवोक्तं न्यायमालायां—

'नर्क्सामयजुषां लक्ष्म साङ्कर्यादिति शङ्किते ।
पादश्च गीतिः प्रश्लिष्टपाठ इत्यस्त्वसङ्करः ।।२७।।

इति ।[३]

अग्रे सूत्रितं—

अर्थैकत्वादेकं वाक्यं साकाङ्क्षञ्चेद्विभागे स्यात् ।

इति ।[४] एतेनापि वेदानामेकत्वं समर्थितं भवति । यच्च वेदानां त्रित्वादेव त्रयीति व्यवहार इत्युच्यते तन्न विभागस्य रचनावैचित्र्यमात्रपरकत्वात् ।

वेदानामनादित्वान्नित्यत्वाच्चापौरुषेयत्वाच्च (पौरुषेत्वसमर्थकपक्षेऽपि ईश्वरकृतत्वादीश्वरस्य अनादित्वान्नित्यत्वादशरीरित्वाच्च) वेदानामाद्यपक्षे आविर्भावकालो-ऽपरपक्षे प्रणयनकालोऽविचिन्तनीय एवास्माकं कृते । यदि यत्रकुत्र वेदकालविषयेऽभिधीयते तत्र तत्र वेदकालशब्देन मन्त्रसङ्कलनकालोऽवगन्तव्यः । मन्त्राणां सङ्ग्रहः संहिता । संहिताकालविषये पण्डिता नैकमत्यं भजन्ते । विषयेऽस्मिन् प्राचीना विपश्चितस्तु मौलमालम्बन्ते किन्तु कतिपयेऽर्वाचीना भारतीयाः पाश्चात्याश्च विद्वांसः कृतश्रमा दृश्यन्ते ।

शार्मण्यदेशीयो विद्वान् मोक्षमूलराख्यो विषयेऽस्मिन् प्रथमो विचारकः । तन्मते ऋग्वेदो हि वेदेषु प्राचीनतमः । तस्य प्रणयनं (सम्भवतः मन्त्राणां सङ्कलनम्) विक्रमपूर्वद्वादशशतकमभितः सम्पन्नमासीदिति तन्मतम् । पश्चाच्च तन्मतं तेनैव संशोधितं स्वीकृतञ्च तेन वैदिककालस्यापरिमेयत्वमपि । श्रेडर-महोदयस्तु कालमेतं विक्रमपूर्वपञ्चदशशतकमारभ्य द्विसहस्रवर्षपर्यन्तं स्वीकरोति।

---

१. पृ० २१९,२२०.
२. मीमांसासूत्राणि २।१।३५,३६,३७
३. जैमिनीयन्यायमालायां पृ० ७३.
४. मी० सू० २।१।४६,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हर्मनयाकोबीपण्डितस्तु कालोऽयं विक्रमाच्चतुस्सहस्रमितवर्षपूर्ववर्तीति निर्णयति। बालगङ्गाधरतिलकस्तु कालोऽयं विक्रमात्प्राक् षट्सहस्राब्दीमारभ्य पञ्चविंशतिशतवर्षपर्यन्तसम्भवीति स्वीकरोति। शङ्करबालकृष्णपण्डितो ज्योतिषगणनाधारेण ऋग्वेदकालं विक्रमतः पञ्चत्रिंशच्छतवर्षपूर्ववर्तिनं मन्यते। अपरे तुरुष्कप्रदेशलब्धं सन्धिपत्रमाधारीकृत्य कालमिमं विक्रमतः पञ्चविंशतिशतमितवर्षपूर्ववर्तिनमपि मन्यन्ते। अविनाशचन्द्रदासमहोदयो भौगोलिक भौगर्भिक घटनामाधारीकृत्य विक्रमतः पञ्चविंशसहस्राब्दीमभितो वैदिकसभ्यताया आविर्भावं समर्थयति। दीनानाथशास्त्रिमहाभागस्तु ज्योतिषमाधारीकृत्य कालमिमं लक्षत्रयमितवर्षपूर्ववर्तिनं मन्यते। एवमेवान्येऽपि विचक्षणाः स्वस्वमत्यनुसारेण वैदिककालनिर्द्धारणे कृतप्रयत्ना दृश्यन्ते। अस्माकं मते तु शङ्करबालकृष्णमतमेव समीचीनतमम्। शतपथब्राह्मणे 'अथैता एव भूयिष्ठा यत्कृत्तिका ....एताह वै प्राच्या दिशो न च्यवन्ते सर्वाणि ह वा अन्यानि नक्षत्राणि प्राच्या दिशश्च्यवन्ते' इति[1] यदुक्तं तदनुसारिणी स्थितिः स्पष्टमेव विक्रमपूर्वत्रिसहस्रमितवर्षाण्यभित एव सम्भवति यदधुना कृत्तिकाः पूर्वदिग्विन्दुतः ईषदुत्तरस्यामुद्यन्ति। अतस्तत्समीपवर्त्येव शतपथब्राह्मणप्रथमप्रवचनकालः। ततोऽपि नितान्तपूर्ववर्ती ऋग्वेदकाल इति कथमपि विक्रमपूर्वपञ्चत्रिंशच्छतमितवर्षेभ्योऽर्वाक्तु नैव सम्भवति। एवमेव बालगङ्गाधरतिलकमतमपि विचारपूर्णं प्रतिभाति। तैत्तिरीयश्रुतौ 'फाल्गुनी पूर्णिमा वर्षादिः इति यदुक्तं तदनुसारेण तदा सूर्येण मृगशिरसि भवितव्यमेव तत्रैव वसन्तसम्पातश्च। वसन्तसम्पातस्यैकस्मान्नक्षत्रान्नक्षत्रान्तरापसर्पणे प्रायः एकसहस्राब्दी अपेक्ष्यते तेन मृगशिरःकालतः कृत्तिकाकालपर्यन्तं सर्पणे सहस्रद्वयाब्दी तु लगत्येवेति तैत्तिरीयसंहिताकाल एव शतपथब्राह्मणकालात्सहस्रद्वयाब्दीपूर्ववर्ती। ततोऽपि पूर्ववर्ती ऋग्वेदकालो यत्र पुनर्वसौ वसन्तसम्पात उक्त इति ऋग्वेदसंहिताकालस्तैत्तिरीयसंहिताकालादपि सहस्रद्वयाब्दीपूर्ववर्तीति निश्चित एव। प्रकरणस्यास्येदमेव सारं यदनादिनिधनस्य नित्यस्य वेदस्य न कोऽपि इयत्तां ज्ञातुं प्रभवतीति सर्वाण्यपि कालनिर्द्धारणपरकमतानि काल्पनिकान्यपूर्णानि च। स्वयमुद्भूता (पौरुषेयत्ववादिमते ईश्वरप्रणीताः वेदा भौतिकसृष्टितोऽपि प्राचीनतरा इति तेऽपरिमेया एव। उक्तमेव—

> अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
> आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।

इति।[2]

स चैकोऽपि वेदः कर्मापेक्षया चतुर्धा विभक्तः। ऋग्वेदः सामवेदो

---

१. २।१।२। २. मनुस्मृतिः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यजुर्वेदोऽथर्ववेदश्चेति । अत्र संज्ञायां न किमपि वैशिष्ट्यं यतो हि ऋग्वेदो बहृच-छन्द प्रभृति शब्दैरपि ज्ञायते यजुर्वेद च निगदशब्देन । यथोक्तं न्यायमालायाम्—

प्रोक्षणीरासादयेति निगदस्त्रिविधाद्वहिः ।
यजुर्वोच्चैस्त्वधर्मस्य भेदादस्य चतुर्थता ।
परप्रत्यायनार्थत्वादुच्चैस्त्व यजुरेव सः ।
तल्लक्षणेन युक्तत्वात्त्रैविध्यमिति सुस्थितम् ।

इति ।[1] श्रीमद्भागवतेऽप्युक्तम् —

'पैलाय संहितामाद्यां बहृचाख्यामुवाच ह ।
वैशम्पायनसंज्ञाय निगदाऽऽख्य यजुर्गणम् ।
साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम् ।
अथर्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे ।

इति ।[2] वेदोत्पत्तिश्च यथोक्तं तत्रैव—

समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ।
हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ।
ततोऽभूत्त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट् ।
यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः ।
शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक् ।
येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ।
स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः ।
स सर्वमन्त्रोपनिषद् वेदबीजं सनातनम् ।
तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह ।
धार्यन्ते यैस्त्रयो भावा गुणनामार्थवृत्तयः ।
ततोऽक्षरसमाम्नायमसृजद्भगवानजः ।
अन्तःस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् ।
तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः ।
सव्याहृतिकान् सोङ्कारांश्चातुर्होत्र विवक्षया ।
पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन् ब्रह्मकोविदान् ।
ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ।
ते परम्परया प्राप्तांस्तत्तच्छिष्यैर्धृतव्रतैः ।

---

१. पृ० ७४

२. १२।६।५२,५३ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः।
क्षीणायुषः क्षीणसत्त्वान् दुर्मेधान् वीक्ष्य कालतः।
वेदान् ब्रह्मर्षयो व्यस्यन् हृदिस्थाच्युतचोदिताः।
अस्मिन्नप्यन्तरे ब्रह्मन् भगवांन्-लोकभावनः।
ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये।
पराशरात्सत्यवत्यामंशांशकलया विभुः।
अवतीर्णो महाभाग वेदञ्चक्रे चतुर्विधम्।
ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः।
चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव।

इति।[1]

कोऽसौ वेद इत्यपेक्षायामपि विचक्षणा नैकमत्यं भजन्ते। सामान्यतो वेदशब्देन संहिताभाग एवावबुध्यते। 'वेदांश्चक्रे चतुर्विधम्' 'यो वेदांश्च प्रहिणोति तस्मै' इत्यादौ वेदशब्देन स एवार्थः प्रत्याय्यते। कात्यायनपरिशिष्टे आपस्तम्बीयपरिभाषासूत्रे च 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति कृत्वा वेदशब्देन ब्राह्मणानामपि ग्रहणाय निर्दिष्टं दृश्यते।[2] परे तु आरण्यकोपनिषदौ च ब्राह्मणभागाविति तयोरपि वेदत्वमुद्घोषयन्ति। अपरे वेदाङ्गानामपि वेदत्वं साधयन्ति वेदोपस्कारकतया। अन्ये तु पुराणानां कतिपयेषां स्तोत्राणामपि वेदत्वं प्रतिपादयन्ति। अवशिष्टपक्षानर्थवादरूपेण गृहीत्वा मन्त्र ब्राह्मणयो र्वेदनामधेयपक्षोऽत्र विचार्यते। जैमिनीसूत्रे प्रोक्तं—

'विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात् ॥३०॥ अपि वा
प्रयोग सामर्थ्यान्मन्त्रोऽभिधानवाची स्यात् ॥३१॥
तच्चोदकेषु मन्त्राख्या ॥३२॥ शेषे ब्राह्मणशब्दः ॥३३॥

इति।[3]

अनेन तु स्पष्टमेव ज्ञायते यद्वेदस्य हि द्वौ भेदौ मन्त्रा ब्राह्मणञ्चेति।[4] उक्तमेव यथा न्यायमालायाम्—

'मन्त्रश्च ब्राह्मणञ्चेति द्वौ भागौ तेन मन्त्रतः।
अन्यद्ब्राह्मणमित्येतद्भवेद्ब्राह्मणलक्षणम् ॥२५॥

इति।[5] कोशकारोऽपि तथैव समर्थयति कथयन्—

---

१. १२।६।३७, ३९-५०.
२. कात्यायनपरिशिष्टम् प० १ आप० परि० ३१. ३.
३. २।१।
४. शाबरभाष्यम् २।१।३३। सुबोधिनी ३९।
५. पृ० ७१।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'ब्राह्मणं ब्रह्मसङ्घाते वेदभागे नपुंसकम्'

इति।[1] अपरे तु ब्राह्मणं मन्त्रभागस्य व्याख्यामात्रं मत्वा वेदशब्देन संहिताभागमेव गृह्णन्ति। यथाऽऽह भट्टभास्करः--

'ब्राह्मणं नाम कर्मणस्तन्मन्त्राणाञ्च व्याख्यानग्रन्थः।'

इति। एवमेव वाचस्पतिमिश्रोऽप्याह—

'नैरुक्त्यं यस्य मन्त्रस्य विनियोगः प्रयोजनम्।
प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते।

इति। प्रायेणैतदुच्यते—

हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना।
उपमानं दशैते तु विधयो ब्राह्मणस्य तु।

इति।[2] एतदपि प्रायिकमेव मन्त्रेऽपि तथादर्शनात्।

ब्राह्मणानां वेदत्वाभ्युपगमे तेषामपि अपौरुषेयत्वनित्यत्वे स्वतः प्रामाण्यञ्च सिद्धयेयुः। किन्तु न केनापि तेषां तथात्वमुरीकृतं दृश्यते। श्रूयते याज्ञवल्क्यादीनां ब्राह्मणप्रवक्तृत्वमपि। तेनैव स्यात्सायणचार्येण तैत्तिरीयभाष्यभूमिकावसरे समुद्घोषितम्--'ब्राह्मणस्य मन्त्रव्याख्यानरूपत्वान्मन्त्रा एवादौ समाम्नाताः' इति। नैतावन्मात्रमपितु भगवान् पाणिनिरपि 'द्वितीया ब्राह्मणे'[3] 'चतुर्थ्यर्थे बहुलं छन्दसि'[3] इति सूत्रे प्रणीय ब्राह्मणानामवेदत्वमेव समर्थयति। 'छन्दोब्राह्मणानि च तद्विषयाणि'[4] इति सूत्रमपि तथैव समर्थयति। स्वीकृतञ्च तेन ब्राह्मणानां पौरुषेयत्वमपि 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु'[6] इति सूत्रेण।

तथापि नैतदवधेयं यद्ब्राह्मणानि हि न प्रामाण्यमारोहन्तीति। तेषामपि मन्त्रव्याख्यानपरकतयाऽस्त्येव प्रामाण्यं यज्ञकाले च मन्त्रवदभ्युपगम्यता च। एषां हि वेदसंज्ञा केवलं पारिभाषिक्येव न तु वास्तविकी। मन्त्राणां गूढार्थकत्वात्तेषां ब्राह्मणसाहाय्यं विना प्रयोगासम्भवाच्च वेदानां नितान्तोपस्कारकत्वेन तेषामपि वेदसंज्ञा प्रचलिता भवेत्। एतेषां पुराण (चिरन्तन) मुनिप्रोक्तत्वमपि साधयत्येषां वेदसमकक्षत्वम्। वस्तुतस्तु 'ब्रह्म वेद तस्य व्याख्यानानि ब्राह्मणानीत्येव शोभनः पक्षः।

---

१. मेदिनीकोशः।
२. शावरभाष्यम् २।१।३३।
३. अष्टाध्यायी २।३।६२।
४. अष्टा० २।३।६४।
५. अष्टा० ४।२।६६।
६. अष्टा० ४।३।१०५।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आरण्यकोपनिषदोर्ब्राह्मणाङ्गत्वं तु सर्वसम्मतमेव। वेदाङ्गानां वेदत्वमपि पारिभाषिकं न तु वास्तविकम्। तथापि कृतोपनयन एव व्याकरणमधीते 'इतिश्रवणात्तेषामपि महत्त्वं तु स्वीकृतमेव।

एवमेवोपवेदानामपि वेदत्वं पारिभाषिकं न तु वास्तविकम्। उपवेदा हि वेदनिःसृता यथा ऋग्वेदस्यायुर्वेदो यजुर्वेदस्य धनुर्वेदः सामवेदस्य गान्धर्ववेदः अथर्ववेदस्य अर्थवेद इति चरणव्यूहे स्पष्टम्।[१]

स्नानप्रसङ्गमनुसृत्य पारस्करगृह्यसूत्रे उक्तम्—'वेदं समाप्य स्नायात् ॥२।३।१॥ गुरुणाऽनुज्ञातः।४। त्रिर्धिविधेयस्तर्कश्च वेदः।५। षडङ्गमेके ॥६॥ न कल्पमात्रे।७। कामं तु याज्ञिकस्य।८। ··· इति।[२] तत्र विधिर्विधायकं ब्राह्मणं विधेयामन्त्राः तर्कशब्देनार्थवादोऽभिधीयते। तर्क्यते ह्यनेन सन्दिग्धोऽर्थः ·····तेन विध्यर्थवादमन्त्रा वेदशब्देनाभिधीयन्ते इति कर्काचार्यः।[३] एवमेव जयरामोऽपि।[४] हरिहराचार्यस्त्वित्थमाह—'तत्र कियान् वेद इत्यपेक्षायामाह विधिर्विधीयते इति विधिः अग्निमादधीत अग्निहोत्रं जुहुयात् ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि विधायकं ब्राह्मणवाक्यम्। विधेयो विधीयते विनियुज्यते ब्राह्मणवाक्येन कर्माङ्गत्वेनेति विधेयो मन्त्रः इषेत्वादिः। विधिर्विधेयस्तर्कश्च वेदो यदत्रैतस्मिन् दर्शने सति समस्तवैदिकसंहारात्मिका मीमांसाऽपि वेदशब्दवाच्या भवतीत्यादिना तर्कपदं-मीमांसापरमङ्गीकृत्य वार्तिककारितायाः मीमांसाया अपि वेदत्वमुक्तम् ······· इत्यादि।[५] गदाधरस्त्वाह—'तर्कशब्देनार्थवादोऽभिधीयते। तर्क्यतेह्यनेन सन्दिग्धोऽर्थ इति। तर्कः कल्पसूत्रमिति भर्तृयज्ञः। तर्को मीमांसेतिकल्पतरुः। च शब्दान्नामधेयभागसङ्ग्रह इति हरिहरः।···[६] विश्वनाथस्त्वाह—यजेतेत्यादि-विधायको विधिः विधेया विधिविनियोज्याः मन्त्राः तर्को न्यायमीमांसे अर्थवाद इति केचित्। चकारान्नामधेयांश सङ्ग्रहः····इति।[७]

अत्रेदमप्यवधेयं यद्वेदशब्दः संहिताभागे ब्राह्मणग्रन्थे कल्पसूत्रादौ च तत्र तत्र प्रयुक्तो दृश्यते, संहिताभागे प्रयुक्तो वेदशब्दो ब्राह्मणमपि गृह्णातीति न रोचिष्णु ब्राह्मणस्यावान्तरकालिकत्वात् पौरुषेयत्वाच्च। न किमपि मूलं व्याख्याग्रन्थमुद्धरति। ब्राह्मणेषु प्रयुक्तो वेदशब्दोऽपि संहितामेव सूचयतीति स्पष्टमेव। यथा ऐतरेयब्राह्मणे 'तानि ज्योतींषि अन्वतपन् तेभ्यस्तप्तेभ्यस्त्रयो

---

१. पृ०
२. पृ० २४१.
३. पृ० २४२.
४. पृ० २४३.
५. २४६.
६. २४८.
७. तत्रैव पृ० २५२।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वेदा अजायन्त'[१] इतिवाक्ये स्पष्टमेव वेदशब्दः संहिताभागं सूचयति न तु ब्राह्मणभागमपि ब्राह्मणानामतथायोनित्वात्। न हि यज्ञावसरे ब्राह्मणवचनानि प्रयुज्यन्ते न च कोऽपि जुहोति 'अमेध्यो वै पुरुषो यदनृतं वदति स्वाहा' इति। एतेनाऽपि सिध्यति यद्ब्राह्मणवाक्येषु श्रूयमाणो वेदशब्दोऽवश्यमेव संहितामात्रं जनयति। कल्पसूत्रेषु यद्धि वेदशब्दः श्रूयते स 'कामं ब्राह्मणमपि सूचयेत्सव्याख्या संहिता' इत्यर्थे। अपरञ्च कल्पसूत्राणां कृते वेदशब्दः पारिभाषिकसंज्ञामप्यार्हति। दृश्यते हि ग्रन्थेषु प्रयुक्ताः पारिभाषिकसंज्ञा ग्रन्थाशयानुसारेण। पारिभाषिक संज्ञा तु नैव कदापि स्वाभाविकत्वं भजते। अयमेव लक्षणपरिभाषयोर्भेदो यल्लक्षणं स्वाभाविक धर्मो भवति यदा परिभाषा तु शास्त्रकृता कृत्रिमसंज्ञा यथा पाणिनीयशास्त्रे नदीसंज्ञा या हि गङ्गायमुनाप्रभृतिशब्दान्नैवात्मसात्कतुं प्रभवति किन्तु स्थलीशब्दं प्रेम्णा गृह्णाति।

मन्त्रब्राह्मणयोर्वेदनामधेयमिति यदुक्तं तदधिकृत्यैतदपि विचारणीणं यद्धि यजुर्वेदस्य द्वौ भेदौ शुक्लः कृष्णश्चेति, तत्र ब्राह्मणभागरहितः शुक्लः सहितस्तु कृष्ण इति परम्परा। सूत्रञ्चेदं प्रायः कृष्णयजुर्वेदसम्बद्धकल्पसूत्रेष्वेव दृश्यते। यच्च कात्यायन प्रणीतत्वेन प्रसिद्धे प्रतिज्ञासूत्रे सूत्रमिदं लभ्यते तस्य मौलिकत्वमेव विचारणीयं प्रतिभाति श्रौतसूत्रे तत्परिशिष्टे वा तदभावात् यत्रापि विद्यते तत्रापि तस्य प्रासङ्गिकत्वाभावात्। ब्राह्मणसंवलिते वेदे सूत्रमिदं प्रासङ्गिकमेव प्रतिभाति। तेन काममस्तु कृष्णयजुर्वेदे मन्त्रब्राह्मणयोर्वेदसंज्ञा वाऽस्तु कल्पसूत्रादौ ब्राह्मणस्य परिभाषिकी वेदसंज्ञा अथवाऽस्तु न्यायमीमांसयोरपि वेदमूलकत्वेन प्रामाण्यं वेदवत्किन्तु वेदशब्दस्तु वस्तुतः मन्त्रभागमेव संसूचयति स्वाभाविकत्वेन। पारिभाषिकत्वेन तु यः कोऽपि शब्दोः यस्मिन् कस्मिन्नप्यर्थे प्रयोक्तुं शक्यते।

उपसंहृतौ वयमिह गोपथब्राह्मणस्य वाक्यमिदमुद्धरामः—

'एवमिमे सर्वे वेदा निर्मिताः सकल्पाः सरहस्याः
सब्राह्मणाः सोपनिषत्काः सेतिहासाः सपुराणाः'[२]

इति।

वेदशब्दवत् श्रुतिशब्दोऽपि न विवादबाह्यः। यज्ञेशेषु हि वेदश्रुतिशब्दौ पर्यायवाचिशब्दत्वेनोपस्थापितौ दृश्येते। शास्त्रेषु शब्दोऽयं मन्त्रब्राह्मणार्थयोर्निर्विशेषेण प्रयुक्तो लभ्यते। यथा हि वेदशब्दः संहितार्थे एवाधिकं प्रयुक्तो ग्रन्थेषु तद्विपरीतं श्रुति शब्दो ब्राह्मणार्थेऽधिकमेव प्रयुक्तो दृश्यते।

'वायुर्वै क्षेपिष्ठा देवता' इति श्रुतेः इत्यादिषु सर्वत्र ब्राह्मणवचनानि

---

१. ५ ३२ । ३   २. पूर्वार्द्धम् २।१०।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रुतिनाम्ना समुद्धृतानि सन्ति ग्रन्थेषु । स्मृतिषु तु शब्दोऽयं निर्विशेषेणोभयस्मिन्नेवार्थे प्रयुक्तः । यथा मनुस्मृतौ—

श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ ।[1]
श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ।[2]
धर्मंजिज्ञासमानानां प्रमाणं परमं श्रुतिः ।[3]

कोशकारस्तु शब्देनानेन संहिताभागमात्रमपि सूचयति । तथा 'शिक्षेत्यादि श्रुतेरङ्गम्' इत्यादौ । जैमिनीये हि सूत्रे श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् ।[4] इत्यत्र श्रुतिशब्दः साक्षाच्छब्दश्रवणार्थपरस्तेनात्र श्रूयते सम्बन्धविशेषो येन तादृशं ब्राह्मणवाक्यं श्रुतिरिति पर्यवसितोऽर्थः ।

आम्नायशब्दश्च वेदपर्यायवाचकत्वेन कोशेषु समुल्लिखितोऽपि दृश्यते एकाधिकेष्वर्थेषु प्रयुक्तः । कौशिकसूत्रे 'आम्नायः पुनर्मन्त्राश्च ब्राह्मणानि च'[5] इति सूत्रितमस्ति । मीमांसाशास्त्रे 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्'[6] इति सूत्रे शब्दोऽयं मन्त्रब्राह्मणार्थे प्रयुक्तः ।

नित्या अपि वेदाः कालधर्ममाश्रित्य युगान्तेऽन्तर्हिता भवन्ति । तांश्च मुनयः पुनस्तपसाप्राप्नुवन्ति । तेनैवोक्तं यास्केन 'ऋषिर्दर्शनात्'[7] इति ।

वेदानामन्तर्द्धानं तेषामुद्धारश्चानेकवारमभूदिति तत्र तत्र पुराणेष्वपि समुल्लिखितं दृश्यते । हयग्रीवेण प्रणाशितान् वेदान् मत्स्यशरीरी भगवानुद्दधार । तामसे चतुर्थे मन्वन्तरे वैधृतयो देवाः कालेन प्रणष्टान् वेदानुद्धध्रुः । एवञ्च चतुर्विंशतितमो व्यासो वेदांश्चतुर्धा व्यभजत् । ततश्च तच्छिष्यप्रशिष्यपरम्परया वेदाः शाखाप्रशाखासु विभक्ताः । तत्र एकविंशतिधा ऋग्वेदः सहस्रवर्त्मा सामवेदः एकशतमध्वर्युशाखाः नवधाऽथर्वणो वेदः इति । प्रतिशाखं ब्राह्मणानि आरण्यकानि उपनिषदश्च । एवमेव प्रतिवेदं शिक्षाकल्पव्याकरणनिरुक्तच्छन्दो ज्योतिषाऽऽख्यान्यङ्गानि । तथैव वेदानां परिशिष्टभागोऽपि ।

आगामिप्रकरणे वेदतरुशाखामधिकृत्य किञ्चिदुच्यते ।

३. वेदसाहित्यम्

मूलत एकोऽप्यखण्डोऽपि वेदः होत्रध्वर्यूद्गातृब्रह्मदृष्ट्या चतुर्धा विभक्तः । तत्र होतृसम्बद्धो भाग ऋग्वेद इत्युच्यतेऽध्वर्युसम्बद्धस्तु यजुर्वेद इति उद्गातृसम्बद्धः सामवेदो ब्रह्मसम्बद्धोऽथर्ववेद इति । यथाऽऽह न्यायमञ्जरीकारः—

---

१. २।१५। २. २।१०. ३. २।१३. ४. ३।३।१४. ५. १।३. ६. १।२।१. ७.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'एकमेव कर्म वेदचतुष्टयोपदिष्टैः पृथग्भूतैरप्येकार्थसमवायिभिरङ्गैरन्वितं प्रयुज्यते यत्र हि होत्रमृग्वेदेन यजुर्वेदेनाऽऽध्वर्यवमौद्गात्रं सामवेदेन ब्रह्मत्वमथर्ववेदेन क्रियते। पैप्पलादिशाखाभेदोपदिष्टञ्च तत्तदङ्गजातं तत्र तत्रापेक्ष्यते तत्र सर्वशास्त्रप्रत्ययमेकं कर्मेत्याहुः।

एकाभिप्रायबद्धत्वं तेन सर्वत्र गम्यते।
भवेद्भिन्नाशयानां हि कथमेकार्थमीलनम्।'

इति।[१]

ननु ऋग्वेदे एव वेदानाञ्चातुर्विध्यमुक्तमस्ति[२] तथैवाथर्ववेदे।[३] यजुर्वेदे च।[४] तत्कथमुच्यते एक एव वेद इत्यपेक्षायामुच्यते वेदानामेकत्वं प्रतिपाद्यविषयस्यैक्यत्वादिति। सर्वैरेव मिलित्वा यज्ञः सम्पाद्यते सम्भूयसमुत्थानरूपेणेति तेषामेकत्वमव्याहतमेव। न हि मूलकाण्डशाखापत्रपुष्पादिभेदेन वृक्षस्यैकस्यानेकत्वं सिध्यति तथैवात्रापि। एकस्यैव वेदस्य चत्वारः प्रतिपाद्यविषया होत्राध्वर्यवोद्गात्रब्रह्माख्याः। तेन सर्वं सुस्थमेव। साधूक्तं कथयतेत्थं—

'सोऽयं सनातनो वेदराशिर्वस्तुतः एकः सन्नपि विज्ञानकर्मसमुपासनाब्रह्मसाक्षात्काररूपचतुर्विधप्रयोजनभेदेन ऋग्यजुःसामाथर्वसंहितासु चतुर्धा संविभक्तोऽपि परात्परसोपानस्थितानां धर्मनिष्ठावतां मनुष्याणामधिकारभेदतोऽवस्थाभेददृष्ट्या तत्रतत्रानुष्ठानयोग्यकर्तव्योपदेशेन सनातनमेकमेव मानवधर्मं सर्वेभ्यो मानवेभ्यः समुपदिशति'

इति।[५]

सोऽयमेकोऽपि कर्मदृष्ट्या चतुर्धा गृहीतो वेदः प्रत्येकं पश्चाच्छिष्यप्रशिष्यपरम्परया शाखास्वपि विभक्त इति वेदस्य द्वात्रिंशदधिकशतोत्तरसहस्रशाखा स्मर्यन्ते तज्ज्ञैः। तच्चेत्थम्।

ऋग्वेदश्चैकविंशतिधा सहस्राध्वा सामवेदः एकशताध्वकं यजुर्नवधाऽथर्वणो वेदः केषाञ्चिन्मते तु पञ्चाशतध्वकोऽपि। यथोक्तं सर्वानुक्रमणीवृत्तौ षड्गुरुशिष्येण —

एकविंशत्यध्वयुक्तमृग्वेदमृषयो विदुः।
सहस्राध्वा सामवेदो यजुरेकशताध्वकम्।
नवाऽध्वाऽथर्वणोऽन्येतु प्राहुः पञ्चाशदध्वकम्।'

१. पृ० २१९. २. १०।९०।९. ३. १०।७।२०.
४. ३१।७. ५. ६. यजुर्वेदभूमिका श्रीपादस्य पृ० १

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति। कौर्मेऽपि यथा—

एकविंशतिभेदेन ऋग्वेदं कृतवान्पुरा।
शाखानां तु शतेनाऽथ यजुर्वेदमथाकरोत्।
सामवेदं सहस्रेण शाखानां तु विभेदतः।
आथर्वणमथो वेदं विभेद नवके न तु।'

इति।[१] स्मरति च भगवान् महाभाष्यकारः—

"—चत्वारो वेदाः साङ्गाः सरहस्या बहुधाभिन्नाः।
एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः एक-
विंशतिधा बाह्वृच्यं नवधाऽथर्वणो वेदः ।"

इति।[२]

विभागोऽयं साम्प्रतिकः कृष्णद्वैपायनतच्छिष्य प्रशिष्यसम्बद्धः। ननु ऋग्वेद एव वेदानाञ्चातुर्विध्यमुक्तं[३] ते च खलु अनादयः कृष्णद्वैपायनस्तु पराशरात्सत्यवत्याञ्जातो द्वापरान्ते इति कथं ते कृष्णद्वैपायनसम्बद्धा इति चेदुच्यते सत्यमेव। वेदाः खलु अनादिनिधनाः किन्तु कालधर्ममाश्रित्य तेषामन्तर्धानं युक्तं युगान्ते। तदा पुनस्तेषामेकत्वं सञ्जायते स्वभावतः। पुनश्च युगादौ महर्षयस्तान् तपसा प्राप्नुवन्ति विभजन्ते च तान् यथापूर्वम्। यथोक्तं

'युगान्तेऽन्तर्हितान् वेदान् सेतिहान् महर्षयः।
लेभिरे तपसा पूर्वमनुज्ञातास्वयम्भुवा।'

इति।

प्रतिपादितञ्चैतत्तथ्यं स्वयमेव ऋग्वेदे—
चत्वारि शृङ्गास्त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश।'

इति।[४]

अस्य हि वेदस्य चत्वारिशृङ्गाः ऋग्यजुःसामाथर्वाख्याः। यथोक्तं निरुक्तपरिशिष्टे—

'चत्वारि शृङ्गेति वेदा वा एते उक्ताः।'

इति।[५] एवमेव सायणाचार्योऽपि वेदभाष्ये--

---

१. ४९।५१।५२.
२. महाभाष्यम् पृ० ७१।
३. १०।९०।९.
४. ४।५८।३।
५. १३।७।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'यद्यपि मूलस्यापि सूर्यादिपञ्चदेवताकत्वात्पञ्चधायं मन्त्रो व्याख्येयस्तथापि निरुक्ताद्युक्तनीत्या यज्ञात्मकाये सूर्यस्य च प्रकाशकत्वेन तत्परतया व्याख्यायते। अस्य यज्ञात्मकस्यापि चत्वारि शृङ्गाश्चत्वारो वेदाः शृङ्गस्थानीया इति।'[1]

तथैव त्रयो अस्य पादा इति त्रीणि सवनानि इति निरुक्तकाराः प्रातर्मध्याह्नसायंसंज्ञिताः। परे तु ब्राह्मणारण्यकोपनिषद इति त्रयोऽस्यपादाः। द्वे शीर्षे इति प्राणणीयोदयनीये इति निरुक्तकाराः कर्म ब्रह्म चेत्यपरे। सप्त हस्तास इति सप्तच्छन्दांसि इति निरुक्तकारः षडङ्गानि पुराणञ्चेत्यपरे। त्रिधा बद्ध-इति मन्त्रब्राह्मणकल्पैरिति निरुक्तकाराः पद्यमयैः गद्यमयैरुभयमयैश्च मन्त्रैरित्यपरे। रोरवीणमस्य सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिः। यदेनमृग्भिशंसन्ति यजुर्भिर्यजन्ति सामभिः स्तुवन्ति। एष हि महान् देवो यद्यज्ञः इति निरुक्ते। वस्तुतस्तु नैरुक्तव्याख्या यज्ञपरकमर्थमनुसरति परेषां तु स्वरूपपरकमर्थमपि न तयोर्विरोधः कल्प्यः।

यच्च केचिदृग्वेदं भाषाविषयादिदृष्ट्या प्राचीनतममथर्ववेदञ्च तदपेक्षया नवीनतरं मत्वा प्राग्वैदिकपूर्ववैदिकोत्तरवैदिकादिभेदेन कालविभाजनमपि कुर्वन्ति न हि तद्वचे किञ्चिदपि सारम्। ते हि खलु ऋग्वेदीयं दशमं मण्डलमपि मण्डलान्तरापेक्षयाऽर्वाचीनतरमपि कथयन्ति। वस्तुतस्तु नैवम्। न हि वेदा भाषादिसामान्यदृष्ट्या परिमातुं शक्यन्ते। अस्माकं मते तु न हि तत्रैतादृशं तत्वं येन वेदानां प्राचीनार्वाचीनत्वे सिध्येयाताम्। त एव मन्त्राश्चतुर्ष्वेव वेदेष्वपि दृश्यन्ते। तेषां ह्येककाले विलासोऽपि तत्र तत्र गीयते।

अस्तु तावत्। वयमत्र वेदानामनादित्वमपौरुषेयत्वञ्चादायाग्रे प्रसरामः।

चतुर्षु वेदेष्वन्यतमो हि ऋग्वेदः। तस्य च साम्प्रतिकं मानमुक्तं यथा[१] चरणव्यूहे—

'ऋचां दशसहस्राणि ऋचां पञ्चशतानि च।
ऋचामशीतिः पादश्च तत्पारायणमुच्यते।'

इति।[२]

अस्य हि स्मर्यन्ते एकविंशतिशाखाः किन्तु शौनकीयप्रातिशाख्ये त पञ्चैव शाखाः स्मृताः। यथोक्तं तत्र—

ऋचां समूहो ऋग्वेदस्तमभ्यस्य प्रयत्नतः।
पठितः शाकलेनादौ चतुर्भिस्ततदनन्तरम्।

१. पृ० ४९०।

१. चरणव्यूहपरिशिष्ट भाष्यम् पृ० १७.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शाङ्खाश्वलायनौ चैव माण्डूका वाष्कलास्तथा।
बह्वृचा ऋषयः सर्वे पञ्चैते एकवेदिनः।

इति। एवमेवान्यत्र ऐतरेयि कौषितकि शैशिरिपैङ्गीत्याद्याः शाखा अपि स्मृताः दृश्यन्तेऽस्य। यथोक्तं विष्णुपुराणे--

'मुद्गलो गोकुलो वात्स्यः शैशिरः शिशिरस्तथा।
पञ्चैते शाकलाः शिष्याः शाखाभेदप्रवर्तकाः।'

इति। सम्प्रति तु तस्य पञ्चैव शाखा मुख्यत्वेन गृह्यन्ते शाकलवाष्कलाश्वलायनशाङ्ख्यायनमाण्डूकाश्चेति। कथ्यते हि अवशिष्टाः शाखा अनध्यायपठितत्वात्कुपितेनेन्द्रेण वज्रेण घातिताः प्रणष्टा इति। वस्तुतस्तु शाखाभेदो न तथा महत्वमावहति यतो हि शाकलादिषु ऋषिशब्द एव गौणो न तु मुख्यः। आश्वलायनगृह्ये देवर्ष्याचार्यतर्पणविधिविधायके सूत्रे शाकलादीनामृषिष्वपरिगणनात् आचार्येषु गणनाच्च। एवञ्चाध्ययनसम्प्रदायप्रवर्तकानामेषां शाकलादीनामाचार्याणां प्रवचनभेद एव शाखाभेदव्यवहारे कारणम्। ततश्च मन्त्रब्राह्मणात्मकः स्वाध्यायैकः शाखेति पर्यवसितोऽर्थः।[1]

सन्ति ऋग्वेदे सप्तदशाधिकमेकसहस्रं सूक्तानि। षडधिके द्वे सहस्रे वर्गाः। दशमण्डलानि चतुःषष्टिरध्यायाः। अष्टौ अष्टकानि चेति गणना। अस्य हि प्रथमस्य मण्डलस्य शतर्चिनो द्वितीयस्य गृत्समदः तृतीयस्य विश्वामित्रश्चतुर्थस्य वामदेवः पञ्चमस्यात्रिः षष्ठस्य भरद्वाजः सप्तमस्य वसिष्ठः अष्टमस्य प्रगाथाः नवमस्य पावमान्याः दशमस्य क्षुद्रसूक्ता महासूक्ताश्चेति ऋषयो मन्त्रद्रष्टारः, तत्र मधुच्छन्दः प्रभृतयोऽगस्त्यपर्यन्ता ऋषयो हि शतर्चिनः। उक्तमेव--

ददर्शादौ मधुच्छन्दा द्व्यधिकं यदृचां शतम्।
तत्साहचर्यादन्येऽपि विज्ञेयास्तु शतर्चिनः।

इति।

एवमेव प्रतिशाखं ब्राह्मणानि सन्तीति ऋग्वेदसम्बद्धब्राह्मणानामपि नास्ति निश्चितसङ्ख्या। सम्प्रति हि ऐतरेयब्राह्मणं कौषीतकिब्राह्मणञ्चेति द्वे एव ब्राह्मणे समुपलभ्येते। एवमेवास्य सम्प्रति समुपलभ्यआरण्यकग्रन्थेषु ऐतरेयारण्यकं शाङ्ख्यायनारण्यकञ्चेति द्वे एव। अस्योपनिषत्स्वपि द्वे एव सम्प्रति समुपलभ्येते ऐतरेयोपनिषद् कौषितक्युपनिषच्चेति। अस्यायुर्वेद उपवेदः। शिक्षाग्रन्थेषु पाणिनीयशिक्षा प्रसिद्धा। श्रौतसूत्रेषु शाङ्ख्यायनमाश्वलायनमिति द्वे एव।

1. आर्यविद्यासुधाकरे २८,२९. २।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शाङ्ख्यायनाश्वलायने द्वे एव गृह्यसूत्रे। ऋक्प्रातिशाख्यं हि ऋग्वेदस्य प्रातिशाख्येषु सम्प्रति समुपलभ्यं प्रातिशाख्यम्। इदं हि ऋग्वेदस्य शाकलसंहितासम्बद्धम्। लगधस्य वेदाङ्गप्रकाशो हि ऋग्वेदसम्बद्धो ज्योतिष ग्रन्थः।

कथ्यते हि एकशतमध्वर्युशाखा इति। अध्वर्युर्वै यजुर्वेदस्तथा संज्ञितत्वात्। यजुषां हि द्वौ भेदौ शुक्लकृष्णप्रकृत्या। यजुर्वेदस्य शौक्ल्यकार्ष्ण्यविषये विद्वांसो नैकमत्यं भजन्ते। पुराणेष्विदं पठ्यते यद्यानि हि याज्ञवल्क्येन अयातयामानि यजूंषि आदित्यतः प्राप्तानि तानि शुक्लानि यानि च तेन गुरोराज्ञया छर्दितानि तानि कृष्णानीति।[1] परे तन्न मन्यन्ते। तदनुसारेण तस्य हि यस्मिन् भागे मन्त्रेषु ब्राह्मणान्यपि संवलितानि सन्ति स कृष्णाख्यस्तत्र च तेनैव मन्त्रब्राह्मणयोर्वेदनामधेयमिति परम्परा। यस्मिंश्च भागे नास्ति मन्त्रेषु ब्राह्मणसंबलितत्वं स शुक्लाख्यस्तत्र तेनैव वेदो नाम मन्त्रभागो ब्राह्मणं तु तद्व्याख्यानमिति समुपदेशः। यथोक्तम्--

'तानि यजूंषि बुद्धिमालिन्यहेतुत्वात् कृष्णानि जातानि।'[2]
'शुक्लानि यजूंषि शुद्धानि यद्वा ब्राह्मणेन मिश्रितमन्त्रकाणि कृष्णानि।'[3]

यथाऽऽह च यज्ञेश्वरभट्टः आर्यविद्यासुधाकरे--

'सोऽयं यजुर्वेदः शुक्लः इत्यभिधीयते यतोऽत्र दर्शपौर्णमासप्रभृतिसर्वयज्ञेषु उक्तानां यजुर्मन्त्राणां ब्राह्मणासङ्कीर्णानां यथायोग्यक्रमेण विन्यासेन याज्ञिकानां व्यामोहाजननात्। प्राचीनयजुर्वेदस्य तु ब्राह्मणसङ्कीर्णत्वात्तत्तद्यज्ञीयमन्त्राणामनुक्रमेण पाठाभावाच्च ततो यज्ञकर्मानुष्ठानमार्गस्य दुर्ज्ञेयत्वात् कृष्णत्वम्' इति।[4]

तदेवाऽऽह प्रतिज्ञापरिशिष्टभाष्येऽनन्तदेवः--

बुद्धिमालिन्यहेतुत्वात्तद्यजुः कृष्णमीर्यते।
व्यवस्थितप्रकरणत्वात्तद्यजुः शुक्लमितीर्यते।

इति।

अन्येत्वाहुः -

'वेदोपक्रमणे चतुर्दशीयुक्तपौर्णमासीग्रहणात् शुक्लयजुः
प्रतिपद्युक्तपौर्णिमाग्रहणात् कृष्णयजुरिति वा।'

अपरे तु तस्य शौक्लकार्ष्ण्ये कारणान्तरं निर्दिशन्ति। तन्मते दर्शपौर्णमा-

---

१. श्रीमद्भागवतम् १२।६।६१-७४।
२. महीधरभाष्यम्
३. बृहदारण्यकभाष्ये।
४. पृ० ४६।
५. चरणव्यूहटीकायां महिदासः पृ० ३९।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सेष्ट्यारम्भे द्वौ पक्षौ। तत्र केचनामावास्यायामिष्टिमारभन्ते परे तु पौर्णमास्याम्। ये खलु दर्शेष्ट्याः प्राथम्यं स्वीकुर्वन्ति ते कृष्णपक्षीयाः तद्विपरीतं पौर्णमास्या इष्टौ प्राथम्यं प्रतिपादयन्तः शुक्लपक्षीया इति। तद्योगादेव तेषां यजूंष्यपि शुक्ल-कृष्णनामभ्यामुपचर्यन्ते इति। ते च स्वमतपुष्ट्ये मैत्रायणीसंहितायाः 'दर्शो ह वा एतयोः पूर्वः पौर्णमास उत्तरः'[1] इति वचनं तथाचाथर्ववेदस्य शौनकशाखायाः 'पौर्णमासी प्रथमा यज्ञिया'[2] इति च वचनमुद्धरन्ति।

वान्तानि कृष्णानीति पौराणिका एव जानन्तु। मन्त्रभागे ब्राह्मणभाग-सङ्कीर्णत्व शुक्लेऽपि यत्र कुत्र दृश्यते।[3] उपाकर्मणि पौर्णमास्याः पूर्वापरविद्ध-ग्रहणेन तथेति न पुष्टिमावहति तस्य व्यत्ययस्यापि दर्शनात्। तेन इष्ट्यारम्भ-मतमेवात्त समीचीनतमं प्रतिभाति। यद्यपि शवरस्वामिना मीमांसासूत्रशावर-भाष्ये—

'अनविधायका अपि केचिन्मन्त्रा इत्युच्यन्ते। यथा
'वसन्ताय कपिञ्जलानालभते'

इति।[4] प्रतिपादितमस्य मन्त्रत्वं तथापि तस्य तेन ब्राह्मणप्रकृतित्वं तु नैव विहन्यते 'प्राङ्तिष्ठन्नपः उपस्पृशति' 'अमेध्यो वै पुरुषो यदनृतं वदति इत्यादेरिव। तेन ब्राह्मणसंसृष्टत्वमेव कृष्णस्य कार्ष्ण्ये प्रमाणमिति न परं प्रमाणम्। माध्यन्दिनीयके प्रथमं दर्शेष्टिविधायकमन्त्राणां पाठेऽपि शतपथब्राह्मणे तदपकृष्य प्रथमं पौर्णमासेष्टि विधानात्तत्पक्षे पौर्णमासीष्टेः प्राथम्यं तु स्पष्टमेव। अपरञ्च शतपथब्राह्मणस्य—

'आदित्यादादित्यानीमानि शुक्लानि यजूंषि
वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते।'

इति[5] वचनाद्याज्ञवल्क्यसम्बद्धानि यजूंषि शुक्लानि तदितराणि कृष्णानीति सामान्यः पक्षः।

स्यादेतत्। प्रकृतमनुसरामः यजुर्वेदस्य एकशतशाखासु शुक्लपक्षीयाः पञ्चदशः कृष्णपक्षीया षडशीतिरिति श्रूयते। तासु हि माध्यन्दिनीयाः काण्वाः जाबाला बौधायनाः शाफेयाः तापनीयाः कपोलाः पौण्डरवत्साः आवटिकाः परमावटिकाः पाराशराः वैणेयाः वैधेया अद्धाः बौधेया इति शुक्लपक्षीयाः पञ्च-दशशाखा[6] गण्यन्ते यासु सम्प्रति माध्यन्दिनीयकाण्वाख्ये द्वे एव समुपलभ्येते।

---

१. १।४।१५. २. ७।८०।४। ३. २४।२०।
४. २।१।३१। ५. १४।४।३३। ६. चरणव्यूहटीकायाम् पृ० ३९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रपञ्चहृदये एतत्प्रपञ्चितंयत्केनापि कारणेन अन्यत्र तु अनध्यायाध्ययनेन। कुपितेन शतक्रतुना वज्रघातिताः बह्वो वेदशाखाः। तत्रावशिष्टाः सामबह्वृचयोर्द्वादश द्वादश यजुर्वेदस्य षट्त्रिंशत् तथैवाथर्वणस्य। ताः सर्वाः प्रथमाध्ययनादृषिनामधेयाः शाखाः।[1] आदित्यात्प्राप्तान्ययातयामानि गुरुणा व्यासेनानध्यापितत्वात् गुरुणा वैशम्पायनेनापि अज्ञातानि यजूंषि प्राप्य याज्ञवल्क्यस्तानि पञ्चदशधा विभज्य काण्वमाध्यन्दिनादिभ्यः पञ्चदशशिष्येभ्योऽध्यापयामास। तदेव प्रपञ्चितं श्रीमद्भागवते--

'यजुर्भिरकरोच्छाखा दशपञ्च शतैः (स तैः) विभुः।
जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः।'

इति।[2]

वैशम्पायनोऽपि व्यासप्रसादाल्लब्धानि यजूंषि सप्तविंशधा विभज्य शिष्यानध्यापयामास येषु हि याज्ञवल्क्योऽप्येकः। यथोक्तं विष्णुपुराणे—

'यजुर्वेदतरोः शाखाः सप्तविंशन्महामुनिः।
वैशम्पायननामाऽसौ व्यासशिष्यश्चकार ह।
शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेऽप्यनुक्रमात्।'

इति।[3]

अवशिष्टासु यजुःशाखासु चरकानां द्वादश शाखाः चरकाः आह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाः आरायणीया वारायणीया वार्तान्तवेयाः श्वेताश्वतराः औपमन्यवः पाताण्डनीयाः मैत्रायणीयाश्चेति। मैत्रायणीयानामपि षड्भेदाः मानवा दुन्दुभा वाराहकाः छागलेया हारिद्रवेयाः श्यामायनीयाश्चेति।[4] प्रपञ्चहृदये तु ता इत्थं परिगणिताः--

यजुर्वेदस्य माध्यन्दिनकण्वतित्तिरिहिरण्यकेशापस्तम्बसत्याषाढबौधायनयाज्ञवल्क्यभद्रञ्जयबृहदुक्थपाराशरवामदेवजातुकर्णतुरुष्कसोमशुष्कतृणविन्दुवाणिञ्जयश्रवसवर्षवरूथसनद्वाजवाजिरत्नहर्यश्वर्णञ्जयतृणञ्जयकृतञ्जयधनञ्जयसत्यञ्जयसहञ्जयमिश्रञ्जयत्र्यरुणत्रिवृषत्रिधामश्विञ्जकलिङ्गुरवात्रेयशाखाः।[4]

ये हि खलु तित्तिरा भूत्वा याज्ञवल्क्यवान्तानि यजूंष्यगृह्णन् ब्राह्मणसङ्कीर्णानि ते तैत्तिरीयाः। तेषां द्वौ भेदौ भवतः औखीयाः खाण्डिकीयाश्च। तत्र

१. पृ० १९।
२. १२।६।७४।
३. ३।५।१-२।
४. चरणव्यूहे पृ० ३३।
५. पृ० १९.।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खाण्डिकीयाः पञ्च आपस्तम्बी बौधायनीसत्याषाढी हिरण्यकेशी शाट्यायनी चेति। एषु तित्तिरिवरतन्तुखण्डिकोखान् पाणिनिरपि स्मरति।[1] एवमेव वैशम्पायनान्तेवासिभ्यश्च।[2]

शाखास्त्वनेकशः श्रूयन्ते किन्तु सम्प्रति तासु तैत्तिरीयमैत्रायणीकठकापिष्ठलकठशाखा एव लभ्यन्ते तत्रापि काश्चिदंशत एव।

माध्यन्दिनकाण्वशाखयोः शतपथब्राह्मणं लभ्यते बृहदारण्यकञ्च। माध्यन्दिनीयस्य ईशावास्योपनिषद् कात्यायनप्रोक्तश्रौतगृह्यसूत्रे धर्मशुल्वसूत्रे च। स्मृतयो याज्ञवल्क्यदक्षपराशरप्रोक्ताः। कृष्णयजुर्वेदस्य तैत्तिरीयमैत्रायणीकठकापिष्ठलकठसम्बद्धानि तत्तत्संज्ञकानि ब्राह्मणानि आरण्यकेषु तैत्तिरीयमेव। उपनिषत्सु तैत्तिरीयमैत्रायणीकठश्वेताश्वतरसंज्ञयाः सम्प्रति समुपलभ्यन्ते। अस्य हि आपस्तम्बबौधायनप्रोक्त धर्मगृह्यसूत्रे प्रख्याते हिरण्यकेशीयञ्च (व्याससमृतिरेतत्सम्बद्धा।)

नवधाऽथर्वणो वेदः। तस्य हि पैप्पलाः शौनकाः दान्ताः प्रदान्ता औता जाबालाः ब्रह्मपलाशाः कुनखीवेददर्शी चारणविद्याश्चेति शाखाः।[3] प्रपञ्चहृदये त्वित्थं प्रपञ्चितम्—

'आथर्वणिकाः पैप्पलादयोदतोदमोदायठ-
ब्रह्मपदशौनकाङ्गिरसदेवर्षिशाखाः ।

केचिदथर्ववेदं शतशाखमपि मन्यन्ते। स्यादपि को नाम वेदस्यान्तं गच्छेत् किन्तु सम्प्रति शौनकशाखा पूर्णतः पैप्पलादशाखा अंशतः समुपलभ्येते। शौनकीया 'ये त्रिषप्ता' इति मन्त्रादारभ्यते पैप्पलादी तु 'शं नो देवीः' इति मन्त्रतः। अस्य हि ब्राह्मणेषु शौनकशाखासम्बद्धं गोपथब्राह्मणमेव सम्प्रति समुपलभ्यते। अस्योपनिषदस्तु बह्व्योलभ्यन्ते यासु प्रश्नमुण्डकमाण्डूक्याख्याः प्रसिद्धाः।

साम्नां जैमिनये प्राह। सहस्रवर्त्मा सामवेदः। को नाम तासां नामानि परिगणयेत्। प्रपञ्चहृदयकारानुसारेण तासु द्वादशैवावशिष्टाः। ताश्च यथा तवलकारछन्दोगशाट्यायनराणायनिदुर्वाससभागुरिगौस्तवलकारालिसावर्ण्य गार्ग्यवार्षगण्यौपमन्यवाख्याः।[4] तास्वपि सम्प्रति कौथुमजैमिनीयराणायनीयाख्याः एव शाखा उपलभ्यन्ते तत्रापि पूर्णतस्तु आद्यैव। अस्य हि पञ्चविंशषड्विंशसामविधानआर्षेयमन्त्रदेवताऽध्यायवंशसंहितोपनिषदाख्यानि कौथुमशाखासम्बद्धानि

---

१. अष्टाध्यायी ४।३।१०२।३,४।
२. १०४.
३. चरणव्यूहे पृ० ४६
४. पृ० १९।
५. चरणव्यूहे पृ. १९।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्राह्मणानि। जैमिनीयाः जैमिनीयब्राह्मणमार्षेयाख्यं जैमिनीयतवलकारब्राह्मणं छान्दोग्यब्राह्मणञ्च ब्राह्मणानि। छान्दोग्यकेनोपनिषदौ हि साम्नः उपनिषद्ग्रन्थौ। स्मृतिषु गोभिलाख्या गृह्यसूत्रादीनि च गोभिलप्रोक्तान्येव। सामविषये पुराणेषु इत्थमुपवर्णितं दृश्यते--

जैमिनेः सामगस्यासीत्सुमन्तुस्तनयो मुनिः।
सुन्वांस्तु तत्सुतस्ताभ्यामेकैकामाह संहिताम्।
सुकर्मा चापि तच्छिष्यः सामवेदतरोर्महान्।
सहस्रसंहिताभेदं चक्रे साम्नां ततो द्विजः।
हिरण्यनाभः कौशल्यः पिशञ्जिश्च सुकर्मणः।
शिष्यौ जगृहतुश्चान्य आवन्त्यो ब्रह्मवित्तमः।
उदीच्याः सामगाः शिष्या आसन् पञ्चशतानि वै।
पौष्पञ्ज्यावन्त्ययोश्चापि तांश्च प्राच्यान् प्रचक्षते।
लौगाक्षिर्माङ्गलिः कुल्यः कुसीदः कुक्षिरेव च।
पौष्पञ्जिशिष्याः जगृहुः संहितास्ते शतं शतम्।
कृतो हिरण्यनाभस्य चतुर्विंशति संहिताः।
शिष्य ऊचे स्वशिष्येभ्यः शेषा आवन्त्य आत्मवान्।

इति।[1]

शाखास्वेतासु केवलं द्वादशैवावशिष्टाः शेषास्तु अनध्यायाध्ययनकुपितेन शतक्रतुना वज्रघातिताः।[2] तास्वपि सम्प्रति कौथुमी शाखा जैमिनीया चांशतो राणायनीयाऽपि समुपलभ्यन्ते शेषास्तु नामत एव ज्ञायन्ते। प्रपञ्चहृदये तूह्यम्–'सामवेदस्य किल सहस्रभेदा आसन्। अनध्यायेष्वधीयानास्ते शतक्रतुवज्रेणाभिहताः प्रनष्टाः। शेषान् प्रवक्ष्यामि असुरायणीयाः वासुरायणीयाः वातान्तरेयाः प्राञ्जलऋग्वैनविधाः प्राचीनयोग्याः राणायनीयाश्चेति। राणायनीया नाम नव भेदा भवन्ति राणायनीयाः शाट्यायनीयाः सात्यमुद्गलाः खल्वलाः महाखल्वलाः कौथुमा गौतमा जैमिनीयाश्चेति।

तेषामध्ययनमशीतिशतमाग्नेयं पावमानं चतुः शतमैन्द्रं तु षड्विंशतिः यानि गायन्ति सामगास्तदधीत्य चण्डात्प्रचण्डतरो भवति शिष्टान्यधीत्य शिष्टाऽविंशतिको भवति। तत्र केचित्पुनः ऋक्तन्त्रं सामतन्त्रं संज्ञाधातुलक्षणमिति विधीयन्ते।

१. श्रीमद्भागवतम् १२।६।७५।८०। २. प्रपञ्चहृदयम् पृ० १९।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अष्टौ सामसहस्राणि सामानि च चतुर्दश।
अष्टौ शतानि नवतिदशतिर्बालखिल्यकम्।
सरहस्यं ससुपर्णं प्रैक्ष्यस्तत्र बालखिल्याः।
सारण्यकानि सौर्याणि ह्येतत्सामगणं स्मृतम्।

इति।[1]

महिदासो व्याख्याति –

आसां षोडशशाखानां मध्ये तिस्रः शाखा विद्यन्ते। ताश्च गुर्जरदेशे कौथुमी प्रसिद्धा। कर्णाटके जैमिनीया। महाराष्ट्रदेशे राणायनी। तासामाचार्याश्च यथा तत्रैवोक्ताः––

'राणायनी सात्यभुग्री दुर्वासा अथ भागुरिः।
मारुण्डी गोर्गुंजवीर्भगवानौपमन्यवः।
दारालो गार्ग्यसावर्णो वार्षगव्यश्च ते दश।
कुथुमिः शालिहोत्रश्च जैमिनिश्च त्रयोदश।'

इति।[2]

इत्थं हि सुविपुलं वैदिकसाहित्यं मानवसंस्कृतेरेवामूल्यो निधिः।

सामवेदस्य महत्त्वं सर्वातिशायीति तु 'वेदानां सामवेदोऽस्मि' इति कथनेनैव स्पष्टमेव। यथा हि मासानां मार्गशीर्षो यथा वा ऋतूनां कुसुमाकरस्तथैव सामवेदानामित्यस्याशयः।[3] सामप्रशंसा हि न केवलं पुराणानां विषयोऽपितु वेदानामपि। तत्रापि प्रतिपादितं यद्ग्वै वाक् मनो यजुः साम प्राणा इति।[4] एवमेव छान्दोग्ये समाम्नातं––

'वाच ऋग्रसः ऋचः सामः रसः साम्न उद्गीथो रसः'

इति।[5]

कतिपयपक्षेषु सामवेदः स्वकीयं वैशिष्ट्यमावहति। स्वराङ्कनविधावप्यस्य भिन्न एव क्रमः। चतुर्विधाः हि स्वराङ्कनप्रकारा दृश्यन्ते। ऋग्वेदे उदात्तस्य न किमपि चिह्नम्। अनुदात्तो हि अधस्तात्समरेखया सूच्यते यदा स्वरितः उपरिष्टादूर्ध्वरेखया। ऋग्वेदीयोऽयं स्वराङ्कनप्रकारो बाहुल्येनाद्रियते। शुक्लकृष्णयजुर्वेद-

---

१. पृ० ४३ २. पृ० ४५ ३।
३. श्रीमद्भगवद्गीता १०।२२। ४.
५. १. १. २. ४. संस्कृतसाहित्यविमर्शः द्विजेन्द्रनाथस्य पृ० ६९.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

योस्तु उदात्त उपरिष्टादूर्ध्वरेखयाऽनुदात्तस्त्वधस्तात्समरेखयासंसूच्यते स्वरितस्य न किमपि चिह्नम्। सम्प्रति तु यजुषोरपि ऋग्वेदीयपद्धतिरेवानुसृता दृश्यते। शतपथब्राह्मणे तु उदात्तोऽधस्तात्समरेखया सूच्यते। सामवेदे तु स्वराः १ २ ३ अङ्कतः संसूच्यन्ते यथाहि ऋग्वेदे--

अग्न आ याहि वीतये गृणानो हव्यदातये।

सामवेदे तु-

अ३ग्न२ आ१ या३हि वी३त१ये२ गृ३णा३नो२ ह३व्य१दातये।[1]

अत्रोदात्तः १ अङ्केन अनुदात्तः ३ अङ्केन स्वरितस्तु २ अङ्केन सूचितः।

४. सामवेदस्वरूपम्

सामवेदो हि उपासनाप्रधानः। अस्य ह्यधिकांशतो मन्त्रा ऋग्वेदस्य प्रायेण अष्टमनवममण्डलाभ्यां सङ्गृहीताः सन्ति। एतत्सम्बन्धिनो नवीनामन्त्रास्तु केवलं पञ्चसप्ततिसङ्ख्याका एव। यद्यपि वेदानां समकालावच्छेदेन प्रादुर्भावात् न तेषां पौर्वापर्यं न चैकतोऽन्यस्मिन् मन्त्रग्रहणमपि। एवमेव ऋग्वेदे--

उभौ वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं
उद्गातेव शकुने साम गायसि चानुराजति।
ब्रह्मपुत्र इव सवनेषु शंससि।[2]

इत्यादिमन्त्रेषु साम समाम्नातमस्ति। तेन ऋग्वेदात्साम्नि मन्त्राः सङ्गृहीता इति प्रौढिवादमात्रम्।

सामवेदमन्त्रा हि आर्चिकद्वये विभक्ताः। ऋचां समूह एवार्चिकम्। पूर्वार्चिके सन्ति षट् प्रपाठकाख्यभागाः। षष्ठे नव मन्त्रा इतरेषु प्रत्येकं दश दशेति द्वितीयं तु न प्रपाठात्मकम्। तत्र हि कतिपये पूर्वार्चिकगता मन्त्रा अपि पुनरावृता दृश्यन्ते।

यथा ऋग्वेदो विज्ञानात्मा यथा वा यजुर्वेदः कर्मप्रधानो यथा चाथर्ववेदो ज्ञानप्रधानस्तथैव सामवेद उपासनाप्रधानः। ऋग्भि स्तुवन्ति यजुर्भिर्यजन्ते सामभिर्गायन्ति। उक्तमेव बृहदारण्यकोपनिषदि--

'सा च अमश्चेति तत्साम्नः सामत्वम्।'

इति।[3] तत्र सेति ऋक् अम इति स्वराः गान्धारादयः। तदेवोक्तं 'वेदैः'--

---

१. सामवेदभूमिका दामोदरः पृ० ३। २. २. ४३. १-२।
३. १. ३. २२।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः' 'उद्गीथरम्यपदपाठवताञ्च साम्नाम्' इत्यादिकथनेषु ।

'सामविधानब्राह्मणेऽप्युक्तम्--

> स यदा गायत्रं बृहत्यां ज्ञायति बार्हतं जगत्यां जागतं त्रिष्टुभिः समताश्चोपपद्यते । तस्मादेतत्सामेत्याह । समा उ ह वा अस्मिन् छन्दांसि साम्पाविति तत्साम्नः सामत्वम् ।'

इति ।[1]

यो हि केवलं ग्रन्थरूपेण प्रस्तूयते स ऋचां सङ्ग्रहो मन्त्रमय एव । सामगानस्य योनिमन्त्रा एते । एतानेवाश्रित्य क्रियते सामगानम् । येन यद् गानं प्रस्तुतं प्रथयतस्तत्तस्यैव नाम्ना सम्प्रत्यपि व्यवह्रियते यथा गौतमस्य पर्कम् कश्यपस्य बार्हिषम् । तान्येव गानानि सामान्युच्यन्ते । यानि हि मन्त्रेभ्यः पृथक्त्राण्येव ।

'गीतिषु सामाख्या'[2] इति जैमिनीयसूत्रानुसारेण मन्त्राणां सामसंज्ञा गीतिष्वेव भवति न केवलेषु मन्त्रेषु । न वा केवलेषु गानेष्वेव । यत्र ऋचो गीयन्ते तदेव साम, स्वर एव साम्नो गतिः ।[3] साम्नः स्वर एव स्वं निजं रूपमिति वृहदारण्यकोपनिषद्यपि ।[4] नारदीयशिक्षायामुक्तम्—

> सप्त स्वरास्त्रयो ग्रामा मूर्च्छनास्त्वेकविंशतिः ।
> ताना एकोनपञ्चाशत् इत्येतत्स्वरमण्डलम् ।

सप्त स्वराः यथा नारदीयशिक्षायाम्—

> 'यः सामगानां प्रथमः स वेणोर्मध्यमः स्वरः ।
> यो द्वितीयः स गान्धारः तृतीयस्त्वृषभः स्मृतः ।
> चतुर्थः षड्ज इत्याहुः पञ्चमो धैवतो भवेत् ।
> षष्ठो निषादो विज्ञेयः सप्तमः पञ्चमः स्मृतः ।'

इति ।' अथ षट् सामविकाराः भवन्ति विकारो विश्लेषणम् विकर्षणम् अभ्यासः विरामः स्तोभश्चेति ।

> तत्र विकारो यथा—'अग्ने' इत्यस्य 'ओग्नायि'
> विश्लेषणं यथा वीतये 'इत्यस्य' वोयितोयारयि'

---

१. १।१३ ।
२. मीमांसादर्शनम् २।१।३६ ।
३. छान्दोग्योपनिषद् १।८।४ ।
४. १।३।२५ । ४.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विकर्षणं यथा—ये 'इत्यस्य या२३ यि'
अभ्यास इति पुनः पुनरुच्चारः यथा 'तोया२यि' 'तोयाऽयि'
विरामो यथा 'गृणानो हव्यदातये' इत्येतस्य 'गृणानो ह। व्यदातये' (पदान्तत्वाभावेऽपि गानसौकर्याय मध्येऽपि विरामः)

स्तोभ ऋग्विलक्षणो वर्णो यथा 'औहोवा । हाउ' इत्यादि ।

एतदतिरिक्तं आगमलोपौ च सामगाने प्रयुज्यते। तत्र आगमः शब्दे वर्णान्तरप्रवेशो यथा 'वरेण्यम्' इत्येतस्य 'वरेणियोम्' इति। लोपो विद्यमानवर्णानुच्चारणं यथा प्रचोदयात् इत्यस्य प्रचो १ २ ऽ १ २। हुम् आ२ दो यो आ ३ ४ ५ इति[1] एवमेव स्तोभोऽपि ।

एतैः संवर्द्धितं साम गीयते स्वरमण्डले।
तेन गानमयं साम न मन्त्रमयमेव हि।

सामगाने हि सप्तानामेव स्वराणामवरोहक्रमेण सम्प्रयोगो दृश्यते। वेदान्तरपाठे तु प्रायः स्वरत्रयमेव श्रूयते सामगाने प्रस्तोता उद्‌गाता प्रतिहर्ता चेति त्रयो गायकाः। तत्र यः खलु प्रस्तौति स प्रस्तोता। यश्च प्रस्तुतं गायति स उद्‌गाता। यश्च गानमुपसंहरते स प्रतिहर्तेति। लोके पञ्चविधं साम गीयते हिङ्कारः प्रस्तावः उद्‌गीथः प्रतिहारो निधनमिति। यथा द्यौर्हिङ्कारः आदित्यः प्रस्तावोऽन्तरिक्षमुद्‌गीथोऽग्निः प्रतिहारः पृथिवी निधनमिति।[1]

सप्तविधमपि साम उपास्यते-हिङ्कारः प्रस्ताव आदिः उद्‌गीथः प्रतिहारः उपद्रवो निधनमिति।[2] सामगानमाश्रित्य तत्रोक्तम्—

'अयं वाव लोको हाउकारो वायुर्हाउकारश्चन्द्रमा अथकारः। आत्मेहकारो अग्निरीकारः। आदित्य ऊकारो निहव एकारो विश्वेदेवा ओहोयिकारः प्रजापतिर्हिंकारः प्राणः स्वरोऽन्नं वा वाग्विराट्।

व्याख्यानञ्च यथा हाउकारो हि स्तोभो रथन्तरे साम्नि प्रसिद्धः। इयं वै रथन्तरमिति। वायुर्हाइकारः। वामदेव्ये सामनि रथन्तरः प्रसिद्धः। .... ।[4] तेन त्रयोदश स्तोभाः साम्नः हाउकारः हाइकारः अथकारः इहकारः ईकारः ऊकारः एकारः औहोयिकारः हिकारः स्वरः स्वरः वाक् हुमिति। गानसौन्दर्यार्थं ये खलु निरर्थकवर्णास्तत्राधिक्येन संयुज्यन्ते ते स्तोभाः।

गानस्य हि गुणा दश। ते च रक्तपूर्णालङ्कृतप्रसन्नव्यक्तविक्रुष्टश्लक्ष्णसमसुकुमारमधुराख्याः। यत्र वीणावेणुगायकस्वराणामेकत्र मेलनं तदा रक्तगुणः

---

१. छान्दोग्योपनिषद २।२।२।
२. तत्रैव २।८।२।
३. १।१३।१।२।
४. तत्रैव व्याख्यायाम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यत्र मध्यमादिस्वरस्वरश्रुतिछन्द.पादाक्षराणि पूर्णतः स्पष्टतया उच्चार्यन्ते तत्र पूर्णगुणः यत्र सकण्ठवाणीं हृदय एव निवेश्य मूर्धोपघातेन गीयते तत्रालङ्कृतगुणः यत्र कण्ठावरोधेऽपि सगद्गदत्वं न श्रूयते तत्र प्रसन्नगुणः यत्र प्रकृतिप्रत्यय लोपागमवर्णविकाराणां स्पष्टतया व्यक्तिस्तत्र व्यक्तगुणः यत्र तथोच्चैरुच्चारणं यथा पदपदाक्षराणि स्पष्टतया व्यक्तानि स्युस्तत्र विक्रुष्टगुणः यत्र नातिद्रुतं नाति-विलम्बितञ्च उदात्तस्वरितानां हेलायाः (द्विरथवा त्रिःपदानामावृत्तिर्हेला तस्याः) उच्चारणं तत्र श्लक्ष्णगुणः यत्र शनैरव्यक्तवर्णानां मृदुतयोच्चारणं तत्र समगुणः यत्र सुकोमलया प्रहृष्टया च वाण्या पदपदाक्षरैः सुपूर्णं मुखं कृत्वा गीयते तत्र सुकुमारगुण यत्र स्वाभाव्येनैव ललितपदाक्षरगुणानां समृद्धिस्तत्र मधुरगुण इति शिष्टाः। अथाऽत्र कानिचित्सामगानानि प्रस्तूयन्ते—

ऋग्वेदमन्त्र :—

अग्न॒ आ या॑हि वी॒तये॑ गृणा॒नो ह॒व्यदा॑तये।
नि होता॑ सत्सि॑ ब॒र्हिषि॑।

सामवेदमन्त्रः (सामयोनिः)—

अ॒ग्न॑ आ॒ या॒हि वी॑त॒ये॒२ गृ॒णा॑नो॒२ ह॒व्य॒दा॑तये।
नि॑ हो॒ता॒ सत्सि ब॒र्हि॒षि॒२।

गानानि —

गौतमस्य पर्कम्—

ओग्नाई। आयाहीऽ३। वोइतोयाऽ२इ। तोयाऽ२इ।
गृणानो ह। व्यदातोयाऽ२इ। तोयाऽ२इ।
नाइ होतासा ऽ २ ३। त्सा २ इ। वा ऽ २ ३ ४ औहोत्वा।
ही ऽ २ ३ ४ यी॥

काश्यपस्य बार्हिषम्—

अग्न आयाही वी। तया इ। गृणानो हव्यदाता ऽ२ ३ याइ।
नि होता सत्सि बर्हाऽ २ ३ इषी। बर्हाऽ २ इषा ऽ २ ३ ४
औहोत्रा। बर्हाऽ ३ षीऽ२३४५।[1]
सहस्रशीर्षा पुरुष. सहस्राक्षः सहस्रपात्।
ॐ उहुवाहाउ।३। सहस्रशीर्षा पुरु २ ३ षाः। सहस्राक्षः
सहस्रा २ ३ पात्।

१. सामवेदभूमिकायाम् पृ० ३ २

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वसन्त इन्नु रन्त्यो ग्रीष्म इन्नु रन्त्यः।

ॐ वा ५ सन्तः। ई ३ न्नू ३ रन्तायाः। ग्रीष्म इन्नूरा १ न्ती ३ याः।

इत्थं हि सामयोनिमन्त्रानाश्रित्य यानि गानानि रचितानि तेषां गानग्रन्थाः गेयगानं प्रकृतिगानं वा आरण्यकगानम् ऊहगानम् ऊह्यगानं रहस्यज्ञानं वेति प्रसिद्धाः। कौथुमीराणायनीयशाखयोर्गानसंङ्ख्या २७२२ जैमिनीयशाखानुसारेण तु ३६८१ इति परिगण्यते। तेषां वित्ररणमित्थमुपस्थापितं तज्ज्ञैः।[1]

जैमिनीये हि ग्रामगेयगानानि १२३२ अरण्यगेयगानानि २९१ ऊहगानानि १८०२ ऊह्यगानानि ३५६ समुदितानि ३६८१ इति। कौथुमीयेति तानि क्रमशः ११९७ २९४ १०२६ २०५ समुदितानि २७२२ इति। इत्थं जैमिनीये हि कौथुमीशाखापेक्षया गानानि सहस्राधिकानि किन्तु मन्त्रसङ्ख्या तु १८२ सङ्ख्यया न्यूना एव। जैमिनीयायां पूर्वाचिके ५८७ आरण्यके ५९ उत्तरार्चिके १०४१ महानाम्नीमन्त्राः ६ इति समुदिताः १६९३ मन्त्राः यदा कौथुमीशाखायां ते क्रमशः ५८८ ५९ १२२५ ६ इति समुदिताः १८७५ मन्त्राः।

कौथुमीशाखायाः पूर्वार्चिकमाग्नेयकाण्डमेन्द्रकाण्डं पावमानकाण्डं चेति त्रिषु काण्डेषु विभक्तम्। तत्र आरण्यकाण्डम् महानाम्न्यार्चिकश्च। उत्तरार्चिकं तु न तथा काण्डेषु विभक्तम्। तत्तु अनुष्ठाननिर्देशकमेव। तत्र दशरात्रं संवत्सरम् ऐकाहम् अहीनम् सत्रम् प्रायश्चित्तम् क्षुद्रञ्चेति मुख्यविषयाः। एवमेव राणायनीयेऽपि। वस्तुतस्तु कौथुमीराणयनीययोः गाने एव भेदो न तु विषयादौ। पूर्वत्र यत्र हाउकारो राइकारो वा पठ्यते परत्र तत्रैव हावुकारो रायीकारो वा पठ्यते। राणायनीयाया एव सात्यमुग्रिशाखायां एकारौकारयोरर्द्धर्वोच्चारणमेव तन्मते तयोः ह्रस्वत्वात्। जैमिनीयशाखायां तु मन्त्रेष्वपि भेदो गानेषु च। तत्र पूर्वार्चिके आग्नेय-ऐन्द्र पावमानपर्वाणि आरण्यं पर्व महानाम्न्यर्चिकश्च। उत्तरार्चिके गायत्रमतिरात्रः प्रथममहः द्वितीयमहः तृतीयमहः चतुर्थमहः इत्यादि-विषयाः। कौथुम्या हि ताण्ड्याख्या एकाऽपरा शाखाऽपि विद्यते।

अथ सामवेदस्य ब्राह्मणानि यथा—

१—ताण्ड्यब्राह्मणं प्रौढब्राह्मणं पञ्चविंशब्राह्मणं वा

२—षड्विंशब्राह्मणम्

३—सामविधानब्राह्मणम्

४—आर्षेयब्राह्मणम्

५—देवताऽध्यायब्राह्मणम्

---

१. तत्रैव पृ० १२

सा० ३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६—संहितोपनिषद्ब्राह्मणं
७- वंशब्राह्मणम्
८—उपनिषद्ब्राह्मणञ्च ।
सामसूत्राणि तु
१—लाट्यायनश्रौतसूत्रम्
२—मशककल्पसूत्रम्
३—क्षुद्रसूक्तम्
४—गोभिलगृह्यसूत्रम्
५--द्राह्यायणी श्रौतसूत्रम्
६--खादिरगृह्यसूत्रम्
७--पुष्पसूत्रम्

सामवेदस्य प्रातिशाख्यं हि ऋक्तन्त्रं पुष्पसूत्रञ्चेति।
अथैतेषां स्वरूपं वैशिष्टयञ्च सङ्क्षेपेण निरूप्यते ॥

५. ब्राह्मणसाहित्यम्

यथा हि वैदिकसाहित्ये संहितासाहित्यं सुविपुलमगाधञ्च तथैव ब्राह्मणसाहित्यमपि। एकविंशतिधा ऋग्वेद एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः नवधाऽथर्वणो वेद इति महाभाष्यकृन्मतानुसारेण सन्ति ११३१ शाखा वेदस्य। प्रतिशाखं ब्राह्मणानि सन्तीति ब्राह्मणानामपि तावत्येव सङ्ख्या निश्चीयते। यथा हि बह्व्यो वेदशाखाः प्रणष्टास्तथैव बहवो ब्राह्मणग्रन्था अपि विलुप्ताः। सम्प्रति तु ऋग्वेदस्य द्वावेव ऐतरेयशाङ्ख्यायनाख्यौ शुक्लयजुर्वेदस्य एक एव शतपथाख्यः कृष्णस्य तैत्तिरीयाख्य एक एव अथर्ववेदस्य गोपथाख्य एक एव साम्नस्तु उपर्युक्ता एकादशसङ्ख्याका इति षोडश एव ब्राह्मणग्रन्था ज्ञायन्ते।

किमिदं ब्राह्मणं नामेत्यपेक्षाया ब्राह्मणं हि वेदव्याख्यानपरो ग्रन्थ इति तु प्रायः सर्वैरेव स्वीक्रियते किन्तु ब्राह्मणशब्दव्युत्पत्तिमादाय तु ते विवदन्ते। केचिद् ब्राह्मणेन प्रोक्तमिति प्रोक्तार्थेऽणि ब्राह्मणशब्दस्य सिद्धिं मन्यन्ते। परे तु ब्रह्म वेदस्तदधिकृत्य कृतो ग्रन्थ इति ब्रह्मन् शब्दादणि तत्सिद्धिं मन्यन्ते 'अन्' (६।४।१६७) इति अन्नन्तस्य प्रकृतिभावेन। परे तन्न मन्यन्ते 'ब्राह्मोऽजातौ' (६।४।१७१) इति जातिभिन्नेऽर्थे तु प्रकृति भावस्य निषेधज्ञापनात्। तेन 'ब्राह्मोदण्डः' 'ब्राह्मी ओषधिः' इत्यादिवदत्रापि न ब्राह्मणशब्दसिद्धिर्जातिभिन्नार्थत्वात्। इतरे तु तदपि न मन्यन्ते। तदनुसारेण 'ब्राह्मोऽजातौ' इति सूत्रस्य प्रायेण अपत्यार्थसम्बद्धत्वेन जातिभिन्नेऽपत्येऽर्थे 'सर्वं ब्राह्ममिदं जगत्' इत्यादौ तत्प्रयोग-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दर्शनात् तस्येदम् (४।३।१२०) इत्यस्य विषये तद्विषयाभावं मत्वा 'ब्रह्म वै मन्त्रः'[1] इति शतपथब्राह्मणवचनमनुसृत्य ब्रह्मणो मन्त्रस्येदं (व्याख्यानम्) इति अणि अन्नन्तस्य प्रकृतिभाव इति ग्रन्थपरक ब्राह्मणशब्दव्युत्पत्तिं मन्यन्ते। क्लीवत्वञ्चास्य व्याख्यानपरत्वादितितन्मतम्। वैयाकरणदृष्ट्या न तथा सिद्धाऽपिव्युत्पत्तिरियं विवेचितविषय दृष्ट्या तु साधु सङ्गच्छते। यथाऽऽहभट्ट-भास्करोऽपि तैत्तिरीयसंहिताभाष्ये--

'ब्राह्मणं नाम कर्मणस्तन्मन्त्राणाञ्च व्याख्यानग्रन्थः'

इति।[2] वाचस्पतिमिश्रोऽपि--

'नैरुक्त्यं यस्य मन्त्रस्य विनियोगः प्रयोजनम्।
प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते।'

इत्युक्त्वा तदेव समर्थयति। नैतावन्मात्रमपि तु सायणाचार्योऽपि तैत्तिरीय संहिताव्याख्याने--

'ब्राह्मणानां मन्त्रव्याख्यानत्वम्'

इति कथनेन तदेवोपपादयति। न च अन्नन्तस्य प्रकृतिभावपक्षे तु 'अधिकृत्य कृतो ग्रन्थः' इत्येव विग्रहः किं न स्यादितिवाच्यं ग्रन्थोपस्थिरया तस्य क्लीबत्वाभावात्। ब्राह्मणेन प्रोक्तमित्यत्र वचनपरत्वेन क्लीवत्वसभावेऽपि तथा सति षडङ्गस्मृति पुराणादावतिव्याप्तिः स्यात्तेषामपि ब्राह्मणप्रोक्तत्वात् तथा च ब्राह्मणप्रोक्तत्वेसति ब्राह्मणानां नितान्तपौरुषेयत्वेन मन्त्रब्राह्मणयोर्वेदनामधेय-मिति आपस्तम्बीयवचनं कृष्णयजुर्वेदेऽपि असङ्गतं स्यात्सर्वत्र वेदानामपौरुषेय-त्वेन। तेन ब्रह्म वै मन्त्रः तस्येदं व्याख्यानं ब्राह्मणमिति विग्रह एव प्रसङ्गेऽस्मिन् ब्राह्मणशब्दस्योपयुक्तो दृश्यते कामं तत्र अन्नन्तप्रकृतिभावस्य निपातेन साधुत्वं किं न मन्येत।

तदित्थं हि सिध्यति यद् ब्राह्मणं हि मन्त्रव्याख्यानपरो वेदभागः। मन्त्रव्याख्यानेन वेदस्य नितान्तोपस्कारकत्वात्तदुपकारं विना वेदमन्त्रस्य प्रयोगाविज्ञानासम्भवाच्च यज्ञप्रसङ्गे ब्राह्मणवचनानामपि मन्त्रवदभिमन्तव्यत्वाच्च ब्राह्मणानां वेदभागत्वमव्याहतमेव यद्यपि ब्राह्मणस्य वेदसंज्ञा पारिभाषिकी एव न तु वास्तविकी।

ननु 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' (पा० सू० ४।३।१०५) इति सूत्रे स्पष्टमेव ब्राह्मणानां कल्पानाञ्च पुराणप्रोक्तत्वे कथिते तदनपेक्ष्य कथमुच्यते ब्रह्मणो मन्त्रस्येदं व्याख्यानं ब्राह्मणमिति चेत्कथ्यते न हि तेन तेषां पुराणप्रोक्तत्वं

१. ७।१।१।५। २. १।५।१ भाष्ये।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निषिध्यते न च सूत्रेण तेन ब्राह्मणानां पुराणप्रोक्तत्वंविशेषेण समर्थ्यते एव। व्याख्यानमपि केनाचिदवश्यमेव प्रोक्तमेव। तेन नापत्तिर्तस्य पुराणप्रोक्तत्वेऽपितु ब्राह्मणप्रोक्तत्वे एव पुराणादावप्यतिव्याप्तेस्तथा विगृहीतमिति। ननु 'छन्दोब्राह्मणानि च तद्विषयाणि (पा० सू० ४।२।६६) द्वितीया ब्राह्मणे (२।३।६२) चतुर्थ्यर्थे बहुलं छन्दसि (पा० सू० २।३।६४) इति सूत्रैः स्पष्टमेव ब्राह्मणस्य वेदभिन्नत्वे सिद्धे कथमुच्यते ब्राह्मणो वेदभाग इति चेदुच्यते कथितमेव वेदसंज्ञा ब्राह्मणस्य पारिभाषिकी इति। वेदभागस्यात्रायमेवाशयो यद् ब्राह्मणान्यपि वेदव्याख्यानपरकत्वेन मन्त्रवदभिमन्तव्यानीति।

वेदविहित यज्ञादिसम्पादनमेव ब्राह्मणानां मुख्यो विषयः। यज्ञस्तु देवतामुद्दिश्य पुरोडाशादेस्त्याग एव। यथोक्तं कात्यायन श्रौतसूत्रे—

'यज्ञं व्याख्यास्यामः।'[1] द्रव्यं देवतात्यागः।[2]

व्याख्यातञ्च यथा—'द्रव्यं देवतात्यागो यज्ञः। द्रव्यं पुरोडाशचरुसांनाय्यपशुसोमादिकम् देवता अग्निसोमादिविष्णुमयी तद्धितचतुर्थी' मन्त्रवर्णान्यतमा बोध्या। तत्राग्न्यादिकां देवतामुद्दिश्य योद्रव्यस्य पुरोडाशादेस्त्याग उत्सर्गः स यज्ञः स याग इत्यर्थः इति।[3] यज्ञो हि प्रधानाङ्गभेदाद् द्विविधः। दर्शपूर्णमाससम्बन्धेन निवर्त्यमानो दर्शपूर्णमासशब्दव्यपदेश्यः प्रधानः। तदितरत्सर्वमग्न्याधानाद्यङ्गम्। यथा समाम्नातमापस्तम्बीये—

'आग्नेयोऽष्टकपालोऽग्निषोमीय एकादशकपाल उपांशुयागश्च पौर्णमासादि प्रधानानि तदङ्गमितरे होमाः' इति।

यज्ञो यागो यजनमिष्टिरिति पर्यायाः। यज्ञश्च इष्टिहौत्रसौमभेदात् त्रिविधः। तत्र इष्टिर्दर्शपौर्णमासादिः अग्न्याधेयाग्निहोत्रादयो हौत्राः। अग्निष्टोमादयः सौमाः। ते च पुनः पाकहविः सोमभेदात् त्रिविधाः प्रत्येकं सप्तमितभेदात्त्रिसप्तकाः। तत्र अग्न्याधेयः अग्निहोत्रं दर्शपौर्णमासौ आग्रायणम् चातुर्मास्यम् सौत्रामणिः पशुबन्धश्चेति सप्त हविःसंस्थाः। सायंहोमः प्रातर्होमः स्थालीपाकः नवयज्ञः वैश्वदेवः पितृयज्ञः अष्टकेति सप्त पाकसंस्थाः। अग्निहोमः अत्यग्निष्टोमः उक्थः षोडशी वाजपेयः अतिरात्रः आप्तोर्यामिति सप्त सोमयज्ञसंस्थाः। राजसूयाश्वमेधौ क्षत्रियमात्रविषयौ।

तत्र केचित्प्रकृतिरूपाः परे विकृतिरूपाः केचिदुभयरूपाः केचिदनुभयरूपाश्चेति चातुर्विध्यं यज्ञानाम्। उत्पत्तिवाक्ये एव सर्वाङ्गसहितो य उपदिश्यते स प्रकृतिरूपो यथा अग्निहोत्रमिष्टिः सोमश्चेति। एतास्तिस्रः प्रकृतयः। यस्यो-

१. १।२।१। २. १।२।२। ३. तत्रैव पृ० २१।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्पत्तिवाक्ये प्रधानभूतः कर्मविशेषः उपदिश्यते इतरदङ्गजातं प्रकृतिरयमेवातिदिश्यते स विकृतिरूपः यथा अग्निहोत्रादयो मासाग्निहोत्रादयः आयुष्कामेष्टिः पुत्रेष्टिः पवित्रेष्टिः वर्षकामेष्टिः प्राजापत्येष्टिः वैश्वानरेष्टिः नवशस्येष्टिः ऋक्षेष्टिः गोष्पतीष्टिः इत्यादयः अन्या अपि काम्येष्टयः इष्टेः विश्वजिदादयः सोमयागस्य विकृतयः। यस्मिन् यज्ञे यज्ञान्तरीयाङ्गान्यतिदिश्यन्ते स्वकीयानि असाधारणानि चाङ्गानि अन्यत्रापि यज्ञविशेषे उपयुज्यन्ते स उभयात्मकः। यथा ज्योतिष्टोमाङ्गभूतोऽग्निषोमीयपशुयागः। यस्मिन् यज्ञे यज्ञान्तरीयाण्यङ्गानि नातिदिश्यन्ते स्वकीयान्यङ्गान्यपि यज्ञान्तरेषु नातिदिश्यन्ते स यज्ञोऽनुभयात्मकः। यथाऽग्न्याधेयमग्निचयनमित्यादि।

एतादृशयज्ञयागादिबोधकवेदार्थप्रतिपादकवचनानां सङ्ग्रह एव ब्राह्मणमिति पर्यवसितोऽर्थः। यागविवरणातिरिक्तमपि ब्राह्मणेषु मन्त्र रहस्य विबोधिका बह्वश्चाख्यायिकाश्च समुपलभ्यन्ते। अत एव विध्यर्थवादाख्यान पुरस्सरं यद्वेदभाष्यं तदेव ब्राह्मणमित्यत्र नात्युक्तिः।

ब्राह्मणं हि त्रिविधमुच्यते तज्ज्ञैः विधिरूपमर्थवादरूप मुभयविलक्षणञ्चेति। तत्र कोऽसौ विधिरित्यपेक्षायां भाट्टमीमांसकाः कथयन्ति यच्छब्दभावनैव विधिः। प्राभाकरमते तु नियोगो विधिः। इष्टसाधनत्वमेव लिङर्थ इति मण्डनमिश्राः। इष्टसाधनत्वमेव तत्वेनरूपेण विध्यर्थः तत्तद्धात्वर्थगतं कार्यत्वं लिङर्थः इति पार्थसारथिमिश्राः। इष्टसाधनत्वाद्यतिरिक्तः प्रवर्तनाख्योऽलौकिक कश्चिद्धर्मविशेषो लिङादिवाच्य इति भट्टसोमेश्वरखण्डदेवादयः। लिङादिविधिप्रत्ययानामपूर्वापरपर्यायः कार्यात्मा नियोगोऽर्थं इति प्राभाकराः। इष्टसाधनता विधिरिति तार्किकाः। सर्वोऽपि विधिः पुनः उत्पत्ति-अधिकार-विनियोग-प्रयोगभेदाच्चतुर्विधः। तत्र देवतास्वरूपमात्रबोधको विधिरुत्पत्तिविधिः यथा 'आग्नेयोऽष्टकपालो भवति इति। सेतिकर्तव्यदादेः फल सम्बन्धबोधको विधिरधिकारविधिः 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादिः। अङ्गसम्बन्धबोधको विधिर्विनियोगविधिः यथा ब्रीहिभिर्यजेत समिधा यजेत इत्यादिः। साङ्गप्रधानकर्मप्रयोगैक्यबोधकः पूर्वोक्त विधित्रयमेलनरूपः प्रयोगविधिः। स च श्रौतकल्परूपः। कर्मस्वरूपञ्चापि द्विविधं गुणकर्म अर्थकर्म च। तत्र क्रतुकारणकार्यमाश्रित्य निर्वृत्तं गुणकर्म। तदपि उत्पत्तिआप्तिविकृतिसंस्कृतिभेदाच्चतुर्विधम्। 'वसन्ते ब्राह्मणोऽग्नीनादधीत' 'यूपं तक्षति' इत्यादावाधानलक्षणादिना संस्कारविशेषविशिष्टाग्नियूपादेः उत्पत्तिः। 'स्वाध्यायोऽध्येतव्यः' इत्यादौ अध्ययनादिना विद्यमानस्यैव स्वाध्यायप्रवृत्तेः प्राप्तिः। 'सोममभिषुणोति' 'ब्रीहीनवहन्ति' इत्यादौ अभिषवावघातादिभिः सोमादीनां विकृतिः। 'एवञ्च' ब्रीहीन् प्रोक्षति 'पत्नी अवेक्षते' इत्यादौ प्रोक्षणीयावेक्षणादिभिर्व्रीह्यादिद्रव्याणां संस्कृतिः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अर्थकर्मापि द्विविधम् अङ्गं प्रधानञ्च। तत्र अन्यार्थमङ्गम् अनन्यार्थं प्रधानम्। अङ्गमपि पुनर्द्विविधम् सन्निपत्योपकारकम् आरादुपकारकञ्च। तत्र प्रधानस्वरूपनिर्वाहकं प्रथमम्। यथाऽवहनप्रोक्षणादि· फलोपकारि। अपरं प्रयाजादि। एवं सर्वाङ्गपूर्णो विधिः प्रकृतिः विकलाङ्ग संयुक्तो विधिर्विकृतिः। तदुभयविलक्षणो विधिः दर्वाहोमः।

प्राशस्त्यनिन्दान्यतरलक्षणं विधिशेषवाक्यमर्थवादः। स च त्रिविधः गुणवादः अनुवादः भूतार्थवादश्चेति। तत्रप्रमाणान्तरविरुद्धार्थबोधको गुणवादः यथा 'आदित्यो यूपः 'इत्यादिः। प्रमाणान्तरप्राप्तार्थबोधकोऽनुवादः यथा 'अग्निर्हिमस्य भेषजम्' इत्यादिः। प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधको भूतार्थवादः यथा 'इन्द्रो वृत्राय वज्रमुदयच्छत्' इत्यादिः। उक्तमेव यथा तन्त्रवार्तिके—

'विरोधे गुणवादः स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः।'

इति। प्रामाण्यं हि अबाधितार्थाज्ञातार्थज्ञापकत्वमेव। तच्च बाधितविषयत्वाज्ज्ञातार्थज्ञापकत्वाच्च न गुणवादानुवादयोः सम्भवति। स्वार्थे तात्पर्यरहितस्यापि भूतार्थवादस्यतु प्रामाण्यं नैव विहन्यते।

विध्यर्थवादोभयलक्षणभिन्नं हि तदुभयविलक्षणम् यथा वेदान्तवाक्यम्। तच्च अज्ञातज्ञापकत्वे अनुष्ठानप्रतिपादकत्वान्न विधिः। स्वतः पुरुषार्थब्रह्मानन्दज्ञानलक्षणब्रह्मणि स्वार्थे उपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गवत्तया स्वतः प्रमाणभूतानपि सर्वान् विधीन् अन्तःकरणशुद्धिद्वारा स्वशेषतामापादयदन्यशेषत्वाभावाच्च नार्थवादः। तस्मादुभयविलक्षणं वेदान्तवाक्यम्। तच्च क्वचिदज्ञातज्ञापकत्वमात्रेण विधिरितिव्यपदिश्यते विधिवादरहितप्रमाणवाक्यत्वेन च क्वचिद् भूतार्थवाद इति व्यवह्रियत इति न दोषः।

मीमांसासूत्रे ब्राह्मणम्—

'शेषे ब्राह्मणशब्दः'[1]

इति परिभाषितं दृश्यते। तच्च व्याख्यातं यथा शावरभाष्ये—अथ किंलक्षणं ब्राह्मणं मन्त्राश्च ब्राह्मणाश्च वेदः तत्र मन्त्र लक्षणे उक्ते परिशेषसिद्धत्वाद् ब्राह्मणलक्षणमवचनीयम्। मन्त्रलक्षणवचनेनैव सिद्धम्। यस्यैतल्लक्षणं न भवति तद् ब्राह्मणमिति परिशेषसिद्धं ब्राह्मणम्। तच्चोदकेषु मन्त्राख्या शेषे ब्राह्मणम्—

१. २।१।३३।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना।
उपमानं दशैते तु विधयो ब्राह्मणस्य तु।
एतत्स्यात्सर्ववेदेषु नियतं विधिलक्षणम्।'

इति।[१]

तन्त्रवार्तिके व्याख्यातं यथा

किमर्थं पुनः सूत्रमारभ्यते। नारभ्यत यदि मन्त्रब्राह्मणात्मक एव वेद इति सर्वेषां प्रसिद्धं भवेत्। येषां त्वप्रसिद्धं तृतीयादिप्रकारनिराकरणार्थं द्वैराश्यमेव वेदस्येति प्रतिपादयितुमाह शेषे ब्राह्मणशब्दः इति।[२]

ननु अर्थवादस्य कथं प्रामाण्यं भवति आम्नायस्य क्रियार्थत्वादतदर्थानामानर्थक्यमिति चेदुच्यते—

'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः'[३]

इति। यथा वायव्यं श्वेतमालभेत भूतिकामः × वायुर्वै क्षेपिष्ठा देवता इत्यत्र आद्येन विधिव्याक्येन सह एकवाक्यतया अपरस्य अर्थवादवाक्यस्यापि प्रामाण्यं सिध्यत्येवेति।

ब्राह्मणस्य दश विधय उक्ताः शवरस्वामिना। ते च हेतुर्निर्वचन निन्दाप्रशंसासंशयविधि परक्रिया पुराकल्प व्यवधारणकल्पनोपमानञ्चेति। तत्र विधेर्विधानस्य कारणकथनं हेतुः। ज्ञाते कारणे कार्ये प्रवृत्तिर्द्विगुणिता भवति। यथा शतपथब्राह्मणे व्रतमुपैष्यन्नन्तरेणाहवनीयञ्च गार्हपत्यञ्च प्राङ्तिष्ठन्नपः उपस्पृशति' इति विधिवाक्यस्य हेतुत्वेनोक्तम् 'अमेध्यो वै पुरुषो यदनृतं वदति तेन पूतिरन्तरतो मेध्यावाऽआपः' इति।[४]

निर्वचनं निरुक्तिर्यथा सा च अमश्चेति तत्साम्नः सामत्वम् इत्यादि।

निन्दा गर्हणा यथा 'अमेध्या वैमाषाः' इत्यादि। स्तुतिः प्रशंसा यथा 'वायुर्वै क्षेपिष्ठा देवता' मेध्या वै आपः इत्यादिः। संशयोऽनिश्चयः 'अधःस्विदासीदुपरि स्विदासीद्' इत्येवंरूपः। विधिर्विधानं यथा 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्यादिः। परक्रिया एककर्तृकमुपाख्यानं यथा तदुहोवाच याज्ञवल्क्यः इति। पुराकल्प बहुकर्तृकमुपाख्यानं यथादेवाश्चासुराश्च वै प्राजापत्याः इत्यादि।

यत्रान्यथाऽर्थः प्रतिभातः पौर्वापर्यालोचनेन व्यवधाय अन्यथा कल्प्यते सा

---

१. पृ० ४२२। ३। २. पृ० ४२२।
३. मीमांसासूत्रम् १।२।७। ४. १।१।१।१।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यवधारणकल्पना। यथा प्रतिगृह्णीयादितिश्रुतं प्रतिग्राह्येदिति कल्पयिष्यते विधिलक्षणमित्यत्र ब्राह्मणवाचो विधिशब्दः। उपमानं तु द्वयोः साधर्म्यकथनं यथा 'उद्गातेव शकुने साम गायसि' इत्यादि।

एतेष्वपि ब्राह्मणे विधेरेव प्राधान्यं शेषाणां तु विध्यङ्गत्वेन तदुपस्कारकतयैव ग्राह्यतेति तेषां विधिसम्बन्धेनैवोपादेयत्वं न तु स्वतः। सर्वासामपि परकृतीनां सर्वेषां पुराकल्पानां वा प्रत्यक्षमेव विधिना सह सम्बन्ध इति शतपथब्राह्मणपर्यालोचनेन ज्ञायते।[1]

यद्यपि प्रायिकमिदं कथनं मन्त्रेष्वपि हेत्वादीनां दर्शनादिति सत्यमेवोच्यते तथापि मन्त्रभागे तेषां क्वाचित्कता एव ब्राह्मणे तु बाहुल्यमिति ते हि ब्राह्मणस्य विषयत्वेन गृहीताः। हेतुवाक्यस्य सामविधानब्राह्मणेऽत्यन्तमेव सुन्दरं निदर्शनमुपलभ्यते। यथा—

ब्रह्म ह वा इदमग्रे आसीत्।
तस्य तेजो रसोऽत्यरिच्यत। स ब्रह्मा समभवत्।
स तूष्णीं मनसाध्यायत्। तस्य यन्मन आसीत्स प्रजापतिरभवत्।
तस्मात्प्राजापत्यां मनसा जुह्वति। मनो हि प्रजापतिः।

इति।[2]

ब्राह्मणानां हि मन्त्रव्याख्यानग्रन्थत्वेऽपि तेषां महत्त्वं तु न कयाऽपि दृष्ट्या न्यूनतरम्। एतानि ह्येकतो मन्त्रव्याख्यानेन मन्त्रगूढार्थाभ्युन्नायकानि अपरतो हि आख्यानादिना आचारविचारशिक्षकाणि। एषां हि यज्ञः प्रधानं लक्ष्यमन्यत्तदङ्गमात्रमपि तद्धि आचारव्यवहारप्रायश्चित्तादीनां मूलं स्रोतः। अत्र हि चतुर्णामेव पुरुषार्थानां साङ्गोपाङ्गं विवेचनं लभ्यते। धर्मो हि यज्ञः अर्थश्च द्रव्यं यज्ञसाधकम् कामो हि मनसस्तुष्टिः मोक्षस्तु आत्मनो विषयाद्दूरीकरणमिति तत्रतत्र प्रसङ्गेन समुपादितम्।

मन्त्राणां विनियोगादिर्ब्राह्मणैरेव निश्चीयते। कस्य मन्त्रस्य कस्मिन् कार्ये किमुद्दिश्य प्रयोग इति ब्राह्मणेभ्य एव ज्ञातुं शक्यते। इयं नात्युक्तिर्यद् ब्राह्मणमनपेक्ष्य न हि कश्चिद् मन्त्रार्थं ज्ञातुं प्रभवतीति। तेन ब्राह्मणं नाम मन्त्रज्ञानायाद्वितीयं साधनमिति साधूच्यते तज्ज्ञैः। इदञ्चापरं ब्राह्मणानां वैशिष्ट्यं यदेतानि हि मन्त्रव्याख्यानपरकाण्यपि कतिपयपक्षे स्वकीयां मौलिकतामप्यावहन्ति। तेषां सन्देशा नित्याः सार्वकालिकाश्च। दिङ्मात्रं यथा—

---

१. १।४।५।१-१६। २. १।१।४।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अमेध्यो वै पुरुषो यदनृतं वदति ।[१]
मेध्या वा आपः ।[२]
द्वयं वाऽइदं न तृतीयमस्ति सत्यञ्चैवानृतञ्च ।[३]
सत्यमेव देवा अनृतं मनुष्याः ।[४]
गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा ।[५]
विराड् वै यज्ञः ।[६]
यज्ञो वै कर्म ।[७]
सर्वस्मात्पाप्मनो निर्मुच्यते य एवं विद्वानग्निहोत्रं जुहोति ।[८]
अग्नेर्वै धूमो जायते धूमादभ्रमभ्राद्वृष्टिः ।[९]
यां दिशं वायुरेति तां दिशं वृष्टिरन्वेति ।[१०]
जनाः पुण्यकृतः स्वर्गं लोकं यान्ति ।[११]
अग्निर्हि रक्षसाममहन्ता ।[१२]
तस्मान्नातिमन्येत पराभवस्य हैतन्मुखं यदतिमानः ।[१३]
यो वै प्राणः स वातः ।[१४]
इन्द्रः क्षत्त्रम् ।[१५]
पयो हि रेतः ।[१६]
आदित्यो वै प्रजाः ।[१७]
यज्ञो वै गौः ।[१८]
नानृतं वदेत् ।[१९]
देवा वै यज्ञेन श्रमेण तपसाऽऽहुतिभिः स्वर्गं लोकमायन् ।[२०]
नापुत्रस्य लोकोऽस्ति ।[२१]
पृथिवीवेदी ।[२२]
ब्रह्म वै यज्ञः ।[२३]
प्राणो वै जातवेदाः ।[२४]

---

१. शतपथब्राह्मणम् । १।१।१।१ । २. तत्रैव १।१।१।१ । ३. तत्रैव १।१।१.४ ।
४. तत्रैव १।१।१,४ । ५. तत्रैव १।१।१।१९ । ६. तत्रैव १।१।१।२२ ।
७. तत्रैव १।१।२।१ । ८. तत्रैव २।३।१।६ । ९. ३।३।५।१७ ।
१०. तत्रैव ८।२।३।५ । ११. तत्रैव ६।५।४।८ । १२. तत्रैव १।२।१।६ ।
१३. तत्रैव ५।१।१।१ । १४. तत्रैव ५।२।४।९ । १५. तत्रैव १०।४।१।५ ।
१६. तत्रैव ६।५।१।५६ । १७ तैत्तरीयब्राह्मणम् १।८।८।१ । १८. तत्रैव ३।९।८।३ ।
१९. तत्रैव २।५।५।३२ । २०. ऐतरेयब्राह्मणम् ३।४२ । २१. तत्रैव ७।१३ ।
२२. तत्रैव ५।२८ । २३. तत्रैव ७।२२ । २४. तत्रैव २।३९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शतायुर्वै पुरुषः।[१]
प्राणो वै वनस्पतिः।[२]
ब्रह्मक्षत्रे च इन्द्राग्नी।[३]
ऋतुसन्धिषु वै व्याधिर्जायते।[४]
ब्राह्मणो नैव गायेन्न नृत्येत्।[५]
एवद्वाचाश्छिद्रं यदनृतम्।[६]
अथ हैते मनुष्यदेवा ये ब्राह्मणाः।[७]
अयज्ञो वा एष योऽपत्नीकः।[८]
श्रिया व एतद्रूपं यत्पत्न्याः।[९]

इत्थं हि ब्राह्मणानि साक्षात्परम्परया वा वेदार्थोपबृंहकाणि। तानि हि व्याख्यानाख्यानमौलिकोपदेशैर्वेदार्थं बोधयन्ति मानवमात्रस्य हितसाधकानीति नास्ति कस्यचिद्विमतिः।

अथाऽत्र प्रस्तूयते केषाञ्चित्प्रसिद्धानां ब्राह्मणग्रन्थानां संक्षिप्तः परिचयः। इदन्तूक्तमेव यत्सम्प्रति यानिहि ब्राह्मणानि समुपलभ्यन्ते तेषु ऋग्वेदस्य शाकलसंहितायाः ऐतरेयाख्यब्राह्मणं तस्यैव वाष्कलसंहितायाः शाङ्खायनापराभिधं कौषीतकिब्राह्मणम् शुक्लयजुर्वेदस्य माध्यन्दिनीयसंहितायाः शतपथाख्यं ब्राह्मणं तस्यैव काण्वशाखायाः शतपथाऽऽख्यमेव ब्राह्मणम्, कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायाः तैत्तिरीयाख्यं ब्राह्मणम् अथर्ववेदस्य शौनकशाखायाः गोपथाख्यं ब्राह्मणम् सामवेदस्य कौथुमसंहितायास्ताण्डचशाखायास्ताण्डचापराभिधं प्रौढापराख्यञ्च पञ्चविंशब्राह्मणम् षड्विंशब्राह्मणम् सामविधानब्राह्मणम् आर्षेयब्राह्मणम् उपनिषदपराभिधं मन्त्रब्राह्मणं देवताध्याय ब्राह्मणम् वंशब्राह्मणम् संहितोपनिषद्ब्राह्मणम् चेत्यष्टौ ब्राह्मणानि तस्यैव जैमिनीयशाखायाः जैमिनीयब्राह्मणमार्षेयापराख्यं जैमिनीय तवलकारब्राह्मणं छान्दोग्यब्राह्मणञ्चेति नामतो ज्ञायन्त इति।

१. ऐतरेयब्राह्मणम्

ऋग्वेदीयेऽस्मिन् ब्राह्मणे सन्ति अष्टौ पञ्चिकाः (विभागाः) प्रतिपञ्चिकं पञ्चाध्यायाः इति समुदिताश्चत्वारिंशदध्यायाः सन्ति। कण्डिकाश्चात्र २५० मिताः। ग्रन्थोऽयं होतृसम्बद्ध विवरणं सप्रपञ्चं प्रस्तौति। प्रथमद्वितीयपाञ्चिकयोरग्निष्टोममधिकृत्य होतृकर्तव्यं निर्दिष्टमस्ति। तृतीयचतुर्थयोः प्रातमाध्यन्दिन-

---

१. कौषीतकिब्राह्मणम् ११।७। २. तत्रैव १२।७। ३ तत्रैव १२।८।
४. गोपथब्राह्मणम् १।११। ५. तत्रैव २ २१। ६. ताड्यब्राह्मणम् ८।६।१३
७. षड्विंशब्राह्मणम् १०१। ८. तैत्तिरीयब्राह्मणम् २।२।२।३। ९. तत्रैव २।९।४।७।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सायंसवनानां उक्थ्यातिरात्रषोडश्यख्यानामग्निष्टोमविकृतीनां वर्णनमस्ति। पञ्चम्यां द्वादशाहयागानां षष्ठ्यां सप्ताहयागानां सप्तम्यां राजसूयस्य चरमायां तु ऐन्द्रमहाभिषेकादीनां वर्णनमस्ति। अस्येयं प्रथमा कण्डिका—

'अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवता आग्न्या वैष्णवं पुरोडाशं निर्वपति दीक्षणीयमेकादशकपालं सर्वाभ्य एवैनं तद्देवताभ्यो-ऽनन्तरायं निर्वपति अग्निर्वै सर्वा देवता विष्णुः सर्वा देवता ....'

२. शाङ्खायनब्राह्मणम्

ऋग्वेदीयवाष्कलशाखासम्बद्धत्वेन कथितमिदं ब्राह्मणं त्रिंशदध्यायेषु प्रविभक्तम्। अध्यायाश्च खण्डेषु विभक्तः। समुदितत्वेहि २२६ मिता खण्डसङ्ख्या भवति। अत्रापि ऐतरेय ब्राह्मणनिरूपिता एव विषया विवेचिताः। अत्र ह्यग्न्याधान नियमाः प्रातःसायंसवनविधयः अग्निहोत्रस्य प्रायोगिकं स्वरूपं दर्शपूर्णमास-चातुर्मास्येष्टयः साङ्गोपाङ्गं निरूपिताः। षष्ठेऽध्याये रुद्रस्य महिमा सप्रपञ्चं निरूपितोऽस्ति। स हि देवेषु श्रेष्ठो ज्येष्ठश्च कथितः।[1] तत्रैव रुद्रस्य भवशिवपशुपति-उग्रमहादेवरुद्रेशानाशनिप्रभृतिनामान्यपि सनिरुक्तं विवेचितानि सन्ति। सप्तमेऽध्याये अग्निरपराघ्यो विष्णुः परार्ध्य इति अग्न्यपेक्षया विष्णोर्महिमा प्राशस्त्येन प्रतिपादितोऽस्ति। अत्र हि समानगोत्रेण सह स्थातव्यमिति नियम उक्तः।

३ शतपथब्राह्मणम्—

शतपथब्राह्मणं हि शुक्लयजुर्वेदस्य माध्यन्दिनीयकाण्वशाखासम्बद्धम्। तत्रायं विशेषो यत्काण्वशाखा सम्बद्धमिदं हि एकपदः प्रारभ्यते यस्य हि—

'स यद्वा इतश्चेतश्च सम्भवति'

इति प्रथमं वाक्यम्। माध्यन्दिनं तु हविर्यज्ञतः प्रारभ्यते यस्य—

'व्रतमुपैष्यन्। अन्तरेणाहवनीयञ्च गार्हपत्यञ्च प्राङ्तिष्ठन्नपऽउपस्पृशति'

इति प्रथमं वाक्यम्। काण्वशतपथे हविर्यज्ञाऽऽख्यकाण्डं यद्धि माध्यन्दिनीयशतपथे प्रथमकाण्डत्वेन गृहीतं द्वितीयकाण्डत्वेनोपस्थापितमस्ति। अन्यत्सर्वं समानमेवोभयत्र। शतपथब्राह्मणे हि हविर्यज्ञ-एकपाद्-अध्वर-ग्रह-सवन उखासम्भरण-हस्तिघट-चिति-सञ्चिति-अग्निरहस्य-अष्टाध्यायी-मध्य-अश्वमेध-उपनिषत्संज्ञकानि चतुर्दशकाण्डानि। तत्र हविर्यज्ञाऽऽख्ये प्रथमे काण्डे पूर्णमासयागः दर्शयागः

१. २५।१३।२।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकपान्नाम्नि द्वितीये काण्डे अग्न्याधेयपुनराधेयाग्निहोत्राग्न्युपस्थापनपिण्डपितृयज्ञाग्रयणेष्टिदाक्षायणयज्ञचातुर्मास्यानि अध्वराख्ये तृतीये काण्डेऽग्निष्टोमश्चतुर्थे ग्रहसंज्ञकेऽपि पञ्चमेसवनाख्ये वाजपेयराजसूयौ षष्ठे उखासम्भरणाख्ये चयनम् सप्तमे हस्तिघटनामकेऽपि चितिसंज्ञकेष्टमेऽपि प्राणभृत्संज्ञकेष्टकोपधानाश्विनीष्टकोपधानस्वयमातृण्णाद्युपधानविश्वज्योतिऋतव्याद्युपधानस्तोमभागाद्युपधानस्तोमचित्यर्थवादासपत्नाद्युपधानऋतव्याद्यर्थवादादि-इष्टकाप्रमाण पुरीष नित्रापादिप्रोक्षणादिकानि नवमे सञ्चितिसंज्ञके शतरुद्रियहोमविधानचित्यपरिषेकवसुधाराहोम वाजप्रसवीयहोमराष्ट्रभृद्धोमादिधिष्ण्यचयनपुनश्चितिचित्युपस्थानानि अग्निरहस्याख्ये दशमे काण्डे चितिसम्पत्तिचयनस्तुतिचित्यपक्षपुच्छविचारसप्तविधाद्येकशतविधाग्निवेदिमानादि चयनकालादिविचार चित्याग्न्यवयवसम्पत्ति संवत्सरादिमुहूर्तपर्यन्तचयनसम्पत्ति यजुष्मती लोकम्पृणसङ्ख्याऽग्न्युपासनामनःसृष्टिविषयकविचाराग्निस्वरूपकथन सम्प्रदायप्रवर्तकर्षिवंशकथनानि अष्टाध्यायीसंज्ञके एकादशे अग्न्याधानकाल दर्शपूर्णमासदाक्षायणयज्ञानुष्ठानविधिपथिकृदिष्टिअभ्युदय हृष्टेष्टिदर्शपूर्णमासार्थवादप्रयाजानुयाजानुमन्त्रण-इडास्विष्टकृत्सूक्तवाकशंयुवाकपत्नी संयाजवेद्यालम्भसमिष्टयजुःप्रधानयागादिविषयार्थवादाग्निहोत्रार्थवादब्रह्मचारिकर्तव्य - मित्रविन्देष्टि हविस्समृद्धिचातुर्मास्यार्थवादपञ्चमहायज्ञस्वाध्यायप्रशंसा प्रायश्चित्ताश्वदान्यग्रहाध्यात्मिकविद्यापशुबन्धप्रशंसा हविर्यज्ञविधसवविधलक्षणानि मध्याख्ये द्वादशे काण्डे दीक्षाक्रमसत्रपृष्ट्याभिप्लवस्वरसामविषुवन्महाव्रतादिनिरूपणगवानयनाग्निहोत्रप्रायश्चित्तमृतकाग्निहोत्रमृतदाहाः अश्वमेधनामके त्रयोदशे काण्डे अश्वमेधतद्गतप्रायश्चित्तपुरुषमेधसर्वमेधदशरात्र पितृमेधाः उपनिषन्नामके चतुर्दशे काण्डे धर्मप्रवर्ग्यमहावीरप्रवर्ग्योत्सादनप्रवर्ग्यकर्तृनियमकाम्यहवनगर्भाधानादिजातकर्मवंशब्राह्मणादीनिबृहदारण्यकञ्चेति सप्रपञ्चं निरूपित विषयाः। ब्राह्मणेऽस्मिन् चतुर्दशकाण्डानि शतमध्यायाः अष्टषष्टिप्रपाठकाः ४३८ ब्राह्मणानि ६८०६ कण्डिकाश्च सन्ति। ग्रन्थोऽयं समस्तयज्ञयागानां साङ्गोपाङ्गं विवरणं प्रस्तौति। ब्राह्मणमिदं प्राचीनतमत्वेन सर्वैः गृह्यते। बहुविधैराख्यानोपाख्यानैरलङ्कृतमिदं ब्राह्मणं वस्तुत आर्यसंस्कृतेरमूल्यो निधिरेव।

४. तैत्तिरीयब्राह्मणम्

कृष्णयजुर्वेदस्य तैत्तिरीयशाखासम्बद्धमिदं ब्राह्मणं त्रिषु काण्डेषु विभक्तमस्ति। काण्डानि च प्रपाठकेषु प्रपाठकाश्चानुवाकेषु विभक्ताः सन्त्यत्र। तत्र प्रथमकाण्डेऽष्टौ प्रपाठकाः यत्र क्रमशः १० ६ १० १० १२ १० १० १० इति समुदिताः ७८ अनुवाकाः सन्ति। द्वितीयकाण्डेऽप्यष्टावेव प्रपाठकाः तत्र क्रमेण एकादश एकादश एकादश अष्टौ अष्टौ विंशतिः अष्टादश नवेति समुदिता षण्णवति-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रनुवाकाः तृतीयकाण्डे द्वादश प्रपाठकाः तत्र क्रमशः षट् दश एकादश एकोनविंशतिः त्रयोदश पञ्चदश चतुर्दश त्रयोविंशतिः त्रयोविंशतिः एकादश दश नवेति १६४ अनुवाकाः। समष्टौ ३२८ अनुवाकाः।

अत्र हि प्रथमे काण्डे अग्न्याधानविधिः गवामयनशेषविधिः वाजपेयपुनराधानपिण्डपितृयज्ञाः सोमादिब्राह्मणानुक्तस्याभिधानम् नक्षत्रेष्टकामन्त्राणामभिधानम् राजसूययज्ञस्यानुब्राह्मणम् चेति द्वितीयकाण्डे अग्निहोत्रविधिः आरण्यकमन्त्राः उपहोमः सौत्रामणिःसवनानामेकहविश्शेषाणामभिधानम् काम्यपशूनां याज्यानुवाक्याः तृतीयकाण्डे नक्षत्रेष्टिविधयः दर्शपूर्णमासेष्टिः मनुष्यपशुविधिः इष्टिहोत्रमन्त्राभिधानम् पाशुकहोत्रविधिः अच्छिद्रकाण्डाभिधानम् अश्वमेधः सावित्रवचनाभिधानम् नाचिकेताग्निचयनविधिः चातुर्होत्राग्निचयनवैश्वसृजाग्निचयनप्रयोगः इति प्रतिपादितविषयाः।

अस्य हि तृतीयकाण्डस्य चरमे त्रयः प्रपाठकाः काठकसंज्ञयाऽपि ज्ञायन्ते। अस्य प्रथमद्वितीयकाण्डे चरमापेक्षया प्रामाणिकत्वेन गृह्येते।

५. गोपथब्राह्मणम्

अथर्ववेदस्य शौनकसंहितासम्बद्धमिदं ब्राह्मणं द्वयोर्भागयोर्विभक्तं पूर्वोत्तरभेदेन। प्रथमे पञ्च द्वितीये षडिति अत्र एकादशानुवाकाः यत्र २५८ कण्डिकाः। अत्र हि अथर्ववेदस्य महिमा गीयते प्रायेण। कतिपये नियमा अप्यत्र व्यवस्थापिताःसन्ति यथा ब्रह्मचारिणः। ब्राह्मणमिदं न तथा समादृतं दृश्यते ब्राह्मणान्तरापेक्षया।

सामवेदीयब्राह्मणानां परिचयस्त्वागामिप्रकरणे उपस्थाप्यते ग्रन्थस्य प्रधानविषयत्वेन।

ब्राह्मणातिरिक्तमनुब्राह्मणस्याऽप्यस्तित्व 'अनुब्राह्मणादिनि' (४।२।६२) इति पाणिनीयसूत्राज्ज्ञायते। ब्राह्मणसदृशो ग्रन्थः अनुब्राह्मणं तदधीते वेद वेति अनुब्राह्मणी इति। अनुब्राह्मणानि ब्राह्मणानामेवाङ्गानि न तु पृथगस्तित्ववन्ति। ब्राह्मणाभ्यन्तरे यद्ब्राह्मणमागच्छति तदनुब्राह्मणमिति तज्ज्ञाः। यथा हि शतपथब्राह्मणेदेवाश्चासुराश्चोभौ प्राजापत्याः इत्यादिः।

६. सामवेदीयब्राह्मणानां स्वरूपं वैशिष्ट्यञ्च

यथोच्यते—

'अष्टौ हि ब्राह्मणग्रन्थाः प्रौढं ब्राह्मणमादिमम्।
षड्विंशाख्यं द्वितीयं स्यात्ततः सामविधिर्भवेत्।
आर्षेयं देवताध्यायो भवेदुपनिषत्ततः।
संहितोपनिषद् वंशो ग्रन्था अष्टावितीरिताः।'

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति ।

सामवेदीयब्राह्मणानां स्वरूपं हि ब्राह्मणान्तराद्भिन्नमेव। इमानि हि न केवलं मन्त्रव्याख्यानान्यपितु बाहुल्येन मौलिकतामप्यावहन्तिमन्त्रभागात्पृथगेव।

इह हि छान्दोग्ये परमनिःश्रेयसप्रापकज्योतिष्टोमादि यज्ञविधायकान्यष्टौ ब्राह्मणानि सन्ति । तत्र ताण्डिब्रह्मणे सप्त संस्थाः ससोमकाः एकाहाहीनाहर्गण-सत्रसत्रायणभेदाः सहस्रसंवत्सरपर्यन्तनानारूपा यज्ञाः प्रदर्शिताः । तत्र त्रिसंस्थ-ज्योतिष्टोमद्वादशाहौ सकलस्तोत्रस्तोमविधिविधानसहितौ पठितौ ।

अथ एतद्ब्राह्मणानुक्तविधियज्ञविशेषाः षड्विंशब्राह्मणे प्रदर्शिताः । तद्यथासुब्राह्मण्याविधानम् । ज्योतिष्टोमोक्तसामच्छन्दोविधानम् । तत्रैव प्रतिस्तोत्रं न्यूनाक्षरफलप्रदर्शनम् । विश्वरूपाज्योतिर्गानविधिः । ब्रह्मवरणविचारः ऋग्वेदादि-भ्रेषोल्वणप्रायश्चित्तानि । सोम्यचरुफलम् । धूर्गानम् । महर्त्विकप्रदर्शनम् । सवनी-यचमसयाजमानम् । ऋत्विग्न्यून [त]ातिरिक्त[त्व]ाभिचारचरणदोषशमनप्राय-श्चित्ताचरणम् । दैवमानुषर्त्विग्वरणम् । देवयजनप्रार्थना । देवयजनप्रदेशप्रमाणं च अवभृथविधिः । अभिचारयज्ञविष्टुतयः । द्वादशाहपरिशेषविधिविधानम् । श्येनेषु-संदंशवज्रवैश्वदेवसत्रकल्पः । अग्निहोत्रोत्पत्तिः । उत्पूतानुत्पूतस्कन्नप्रायश्चित्तम् । निर्मथ्याग्नावजायमाने कालातिक्रमभयात् गौणत्वेन लौकिकाग्निब्राह्मणहस्ताजा-कर्णकुशस्तम्बेषु होमकल्पः । अग्निहोत्रहोमविधिप्रदर्शनम् । औदुम्बरीयूपसंस्कार-फलवादः । ततो यज्ञशेषविधिसमाप्य संध्योपासनविधिः । चन्द्रक्षयवृद्धिः । दर्श-पौर्णमासकालप्रदर्शनम् । स्वाहास्वधावषट्कारलक्षणपरमबीजानां रूपफलविधा-नम् । अद्भुतप्रायश्चित्तानि च ।

अथ सामविधौ सामस्वरूपवर्णनम् । सामशब्दनिर्वचनम् । क्रुष्टादिसप्तस्वर-विशेषप्रयोजनेन ब्रह्मादिस्तम्बपर्यन्तजगत्तर्पणम् । स्वरदेवतावर्णनम् । कृच्छ्राति-कृच्छ्रकृच्छ्रातिकृच्छ्रविधिः । ब्रह्मयज्ञविधानम् । ब्रह्मयज्ञस्य हविर्यज्ञकपाशुक-सोमिकयज्ञसमानफलप्रदर्शनम् । सकलपातकप्रायश्चित्तानि । मनुष्यगवाश्वानामुप-द्रवोत्पत्तिशान्ति । काम्यफलोपसंवादः ।

अथ आर्षेये—सकलयज्ञपाठितस्तोत्रविशिष्टसाम्नां संज्ञाविशेषः ऋषि-प्रदर्शनं च ।

अथ देवताध्याये—सकलयज्ञस्तोत्रसाम्नां निधनविशेषदेवतानिरूपणम् । छन्दोरूपदेवतावर्णननिर्वचनानि ।

अथ वंशाख्ये ब्राह्मणे—सकलपठितर्कसाम्नाम् ऋषिवंशककथनम् ॥
अथैतेषां सङ्क्षिप्तः परिचयोऽत्रप्रस्तूयते ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१ ताण्ड्यब्राह्मणम्

सामवेदस्य कौथुमसंहितायास्तण्डयाख्यशाखया सम्बद्धमिदं ब्राह्मणं स्वप्रकृतिकेषु ब्राह्मणेषु प्रथमं महत्वशालितमञ्च। इतराणि एतत्संहितासम्बद्धानि ब्राह्मणानि हि अस्यैव परिशिष्टरूपाणि। षड्विंशब्राह्मणंत्वस्य साक्षादेव परिशिष्टम्। सर्वाग्ययीतराणि ब्राह्मणानीदमेव प्रमाणत्वेन गृह्णन्ति। ब्राह्मणमिदं पञ्चविंशत्यध्यायेषु विभक्तत्वात्पञ्चविंशनाम्नाऽपि ज्ञायते। तथैवेदमितरापेक्षया शाखया सह प्रत्यक्षत्वेन सम्बद्धत्वात्प्रामाणिकत्वात्प्राचीनतमत्वाच्च प्रौढ ब्राह्मणमित्यप्यभिधीयते। शुक्लयजुर्वेदस्य माध्यन्दिनशाखया सह शतपथब्राह्मणस्य यादृशः प्रपञ्चस्तथैवास्य सामवेदस्य कौथुमसंहितायास्तण्डिशाखया सहाऽपि! ताण्डयमिति तण्डिशाखया सम्बद्धत्वेन। विशालकायत्वेनापीदं ब्राह्मणं महाब्राह्मणमित्यप्युच्यते ताण्डयेन प्रोक्तमिति ब्राह्मणस्यास्याध्येतारस्ताण्डिन इत्युच्यन्ते।

ब्राह्मणेऽस्मिन् सन्ति पञ्चविंशतिरध्यायाः। अध्यायश्च खण्डेषु विभक्तः। तत्र हि प्रथमाध्याये दश खण्डाः द्वितीयेऽध्याये सप्तदश खण्डाः तृतीयेऽध्याये त्रयोदश खण्डाः चतुर्थाध्याये दश पञ्चमाध्याये दश षष्ठाध्याये दश खण्डाः सप्तमाध्याये दशैव अष्टमेऽध्याये दश खण्डाः नवमाध्यायेऽपिदश दशमेऽध्याये द्वादश एकादशेऽध्याये एकादश द्वादशेऽध्याये त्रयोदश खण्डाः त्रयोदशे द्वादश चतुर्दशे द्वादश पञ्चदशे द्वादश षोडशे षोडश सप्तदशे चतुर्दश अष्टादशे एकादश ऊनविंशे ऊनविंशतिः विंशे षोडश एकविंशे पञ्चदश द्वाविंशे अष्टादश त्रयोविंशे अष्टाविंशतिः चतुर्विंशे विंशतिः पञ्चविंशे अष्टादश इति समुदिताः ३४७ खण्डाः प्रत्येकं खण्डाश्च कण्डिकासु विभक्ताः सन्ति। तत्र प्रथमेध्याये क्रमशः नव नव दश पञ्चदश एकोनविंशतिः सप्तदश नव सप्तदश द्वादश द्वादशेति एकोनत्रिंशदुत्तरशतं कण्डिकाः द्वितीयेऽध्याये पञ्च चतस्रः सप्त द्वे तिस्रः चतस्रः अष्टौ तिस्रः चतस्रः पञ्च द्वे द्वे द्वे तिस्रः चतस्रः पञ्च चतस्रः इति सप्तषष्टिः कण्डिकाः। तृतीयेऽध्याये तिस्रः द्वे द्वे तिस्रः द्वे चतस्रः द्वे तिस्रः चतस्रः द्वे चतस्रः तिस्रः तिस्रः इति सप्तत्रिंशत्कण्डिकाः सन्ति। चतुर्थेऽध्याये सप्तदश एकविंशतिः त्रयोदश एकादश एकविंशतिः चतुर्विंशतिः दश पञ्चदश त्रयोविंशतिः सप्त इति षष्ठ्यत्तुरशतं कण्डिकाः। पञ्चमे एकोनविंशतिः त्रयोदश द्वादश पञ्चदश एकविंशतिः पञ्चदश एकादश नव चतुर्दश द्वादशेति द्विचत्वारिंशदुत्तरशतं कण्डिकाः। षष्ठे त्रयोदश नव षोडश पञ्चदश एकविंशतिः एकोनविंशतिः चतुर्विंशति अष्टादश षड्विंशतिः एकोनविंशतिरिति अशीत्युत्रस्शतं कण्डिकाः। सप्तमे त्रयोदश षट् एकोनत्रिंशत् अष्टौ एकविंशतिः सप्तदश एकोनविंशतिः पञ्चदश द्वाविंशतिः सप्तदशेति १६७ कण्डिकाः। अष्टमे त्रयोदश एकादश सप्त एकादश

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षोडश चतुर्दश चतुर्दश षड्विंशतिः द्वाविंशतिः दशेति १४४ कण्डिकाः। नवमे अष्टात्रिंशति त्रयोविंशतिः एकादश अष्टादश त्रयोदश एकादश द्वादश षोडश पञ्चदश दशेति १६७ कण्डिकाः। दशमेऽध्याये २१ ७ १३ ९ १८ ८ ५ १ २ १ १ १० इति ९६ कण्डिकाः। एकादशेऽध्याये ७ ३ ११ ११ २९ ११ ३ १४ ७ २३ १४ इति १३२ कण्डिकाः। द्वादशे ११ ९ २३ २७ २५ १३ १२ ८ २४ २६ २६ १० ३४ इति २४८ कण्डिकाः।

त्रयोदशे १२ ८ २६ १८ २८ १६ १६ ५ २९ १८ २४ १६ इति २१६ कण्डिकाः। चतुर्दशे १४ ६ २५ ७ ३१ ११ १० ८ ४१ ९ ३९ १० इति २११ कण्डिकाः। पञ्चदशे १३ ९ ३७ ८ ३७ ७ ८ ४ १७ १५ १६ ६ इति १७९ कण्डिकाः। षोडशे १४ ८ ९ १३ २७ १४ ७ ९ ६ १२ १७ ९ १३ ८ ११ १० इति १८७ कण्डिकाः। सप्तदशे १७ ४ ४ ३ ७ ४ ४ ४ ४ ४ ९ ६ १८ ४ इति ९२ कण्डिकाः। अष्टादशे २८ १४ ४ ११ २४ २७ १३ १८ २१ १० ११ इति १७७ कण्डिकाः। एकोनविंशे ५ ६ ९ ११ ११ ३ ७ ७ ६ १४ ११ ८ १० ८ ३ ७ ८ ५ ३ इति १४२ कण्डिकाः। विंशे ६ ५ ५ ८ ५ १ १ १ २ १ ११ ५ ५ ८ १५ ९ इति ८८ कण्डिकाः। एकविंशे १० ९ ७ १३ ६ ४ ५ ६ १६ २३ ४ ८ १० २१ ६ इति १४८ कण्डिकाः। द्वाविंशे ४ ४ ७ ७ ९ ५ ८ ५ ६ ४ ७ ५ ४ ७ ११ ४ ३ ८ इति १०८ कण्डिकाः। त्रयोविंशे ५ ४ ९ ७ ४ ६ ६ ४ ५ ३ ५ ५ ५ ७ ७ १२ २ ४ ११ ४ ३ ७ ३ १ ४ ३ ३ ८ इति १४९ कण्डिकाः। चतुर्विंशे १४ २ ४ ३ २ ३ २ २ ३ ३ ९ ७ ५ ८ ५ ६ ४ ९ ३ २ इति ९६ कण्ढिकाः।

पञ्चविंशे १५ ६ ६ ५ ३ ५ ४ ६ ४ २३ ४ ६ ४ ५ ४ ३ ४ ७ इति ११४ कण्डिकाः। समुदिताश्च सर्वाः ३५७६ कण्डिकाः सन्ति।

अथ महाब्राह्मणस्यास्य प्रतिपादनविषयमादाय सायाणाचार्येणोक्तम्—

पञ्चविंशतिरध्याया महति ब्राह्मणे स्थिताः।
आद्येऽध्याये श्रुता मन्त्रा उद्गातुर्यजुरात्मकाः।
ये तु मन्त्राः स्तोत्ररूपा उत्तरासु तृचेन ते।
योनिवद्गानमूहित्वा पठ्यन्ते तद्विधेवंशात्।
यद्योन्यां गानमाम्नातं तदेवोत्तरयोः ऋचोः।
गायेदिति स्तोत्रवक्ल्प्त्यै साम्नामूहो विधीयते।
आवृत्तियुक्तं तत्साम स्तोम इत्यभिधीयते।
× × ×
द्वयोरध्याययोस्तोमप्रकारा बहुधा श्रुताः।
× × ×

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुर्थाध्यायमारभ्य गवामयनिकादयः ।

'ऋतूनां विधयः प्रोक्ता एषोऽस्मिन् ब्राह्मणे क्रमः ।'

इति ।[1]

प्रथमेऽध्याये मन्त्रकथनं द्वितीयतृतीययोः त्रिवृत्पञ्चदशसप्तदशप्रभृतीनां स्तोमविष्टुतीनां वर्णनं लभ्यते । चतुर्थे पञ्चमे च गवामयनस्य षष्ठाध्यायादारभ्य द्वादशाध्यायपर्यन्तं ज्योतिष्टोम-उक्थ्य-अतिरात्रादियज्ञानां तत्रापि ततश्च पञ्चदशाऽध्यायपर्यन्तं द्वादशाहयागानां तत एकोनविंशतितमाध्यायपर्यन्तमेकाहयागानां ततो द्वाविंशतितमाध्यायपर्यन्तमहीनयागानां ततश्च सत्राणां विधानं समुपस्थापितमस्ति ।

दर्शपूर्णमासेष्टिपूर्वकं तत्प्रागेवापि वा सोमेन यजेत । एष वै सोमयागः । सोमेन यक्ष्यमाणो हि होताध्वर्युब्रह्मोद्गातॄन् विधिवत् वृणुयात् शेषांस्तु यथेच्छम् । ते च चत्वारः त्रिपुरुषा भवन्ति—प्रत्येकं त्रिभिरनुगता भवन्ति इति ते द्वादश चत्वारो मुख्या इति षोडशर्त्विजः । तत्र

होता मुख्यस्तदनुगाः मैत्रावरुणः अच्छावाकः ग्रावस्तुदिति त्रय इति चत्वारो होतृवर्गे ।

अध्वर्युर्मुख्यस्तदनुगा प्रतिप्रस्थाता नेष्टोन्नेता ब्राह्मणाच्छसी—आग्नीध्रः पोता चेति चत्वारोऽध्वर्युवर्गे ।

उद्गाता मुख्यस्तदनुगाः प्रस्तोता प्रतिहर्ता सुब्रह्मण्य इति चत्वार उद्गातृवर्गे

एवमेव ब्रह्मवर्गेऽपि चत्वारो मुख्यो ब्रह्माऽन्ये त्रयस्तदनुचरा इति ।

ते च सर्वे द्विरात्रादिभिरहीनसंज्ञकैरग्निष्टोमादिभिरेकाहसंज्ञकैर्याजयन्ति द्वादशाहादिभिश्च विविधैर्यज्ञैः ।

यज्ञाय कृतनिश्चयो यजमान ऋत्विजं वरीतुं सोमप्रवाकं प्रेषयेत इति तस्योपोद्घातः । सोमयागवृत्तान्तमृत्विजे प्रकर्षेण वक्तीति सोमप्रवाकः । स च वरीष्यमाणस्य समीपं गत्वा सोमेन यियक्षुरस्माकं यजमानस्त्वामार्त्विज्यमर्थयते इति ब्रूयात् । यदि स नेच्छति तदा सोमं नमस्कृत्य तदार्त्विज्यं परिहृत्य अन्यं वृणुयात् । एवमेव सोमप्रवाक उद्गातृसमीपं गत्वा तथैव ब्रूयात् । यदि स इच्छति तदा स—'महन् मे वोचो'[2] इति मन्त्रं पठेत् ।

अग्निष्टोमज्योतिष्टोमादौ ऋत्विजः स्वयमपि वृणुयाद्यियक्षुः । ऋत्विग्वरणा-

१. भाष्यपुरोवाक् श्लो० ९-१० २. १।१।१ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्यनन्तरं यजमानः यज्ञभूमिं प्रति गन्तुं गृहात् 'देवमेतु सोमः' [१] इति मन्त्रं पठन् निर्गत्य प्रथमं कतिचित्पदान्युत्तरतो गत्वा पश्चाद्देवयजनाभिमुखो भवेत्। दूरं व्रजित्वा 'विहाय दौष्कृत्यम्'–इति मन्त्रं पठेत्।[२] देवयज्ञस्य समीपवर्तिनं पन्थानमासाद्य यद्वा नामाऽसि' इति मन्त्रं पठेत्।[३] उत्तरवेद्यन्तमाक्रम्य दक्षिणमीक्षमाणः 'पितरो भूः' इति पठेत्।[४] ततोऽध्वर्युर्व्युषमुच्छ्रमेत् तदा उद्गातारः 'नृमण' इति गायेयुः।[५] ततोऽध्वर्यूपामन्त्रितो होता यदा प्रातरनुवाकमनुच्य तस्यावसानगतम् 'अभूदुषा' इत्येतामृचं यदा ब्रूयात्तदा उद्गातार 'मृदा' ······ इति गायेयुः।[६] अथाध्वर्युः हविर्द्धानमण्डपं प्रवेशयति तदोद्गातारः 'विष्णोः शिरोऽसि' इति गायेयुः।[७] हविर्द्धानं प्रविशन्त उद्गातारः इष ऊर्ज' इति गायेयुः।[८] अथोद्गातारः सोमं स्पृशन्तः पठेयुः 'युनज्मिः' इति।[९] ते च दक्षिणस्य हविर्द्धानस्य पश्चादुपविशेयुः 'ऋतस्य' इति गायन्तः।[१०] ततः सोमे ग्रावीभरभिषुते उद्गातारः 'ऋतपात्रमसि' इति द्रोणकलशमुपस्पृशेयु।[११] अथोद्गातारो द्रोणकलशं शकटस्याधः स्थापयेयुः प्राञ्चम् 'वानस्पत्योऽसि' ······ इति गायन्तः।[१२] ते तानभिमृश्य जपेयुः 'मरुतो ······' इति।[१३] ततः कलशमवस्थापयेयुः 'इदमह···' इति गायन्तः।[१४] तत उद्गाता द्रोणकलशगतबीलभागान् मन्त्रयते 'वसवस्त्वा····' इति।[१५] तत उद्गातारः दशापवित्राख्यवस्त्रखण्डस्य कलशस्योपरि कोणान् धारयेयुः गायेयुश्च 'पवित्रन्ते' इति।[१६] सन्ततायां धारायामुद्गाता गायेत् प्रशुक्रैतुः इति।[१७] एवमेव प्रथमाध्यायस्य तृतीयादिसप्तमान्तखण्डेषु उद्गातृवर्गसम्बद्धा मन्त्रा उक्ताः। अष्टमे खण्डे अश्वादिप्रतिग्रहमन्त्राः नवमदशमयोस्तु स्तोमभागसम्बद्धा मन्त्राः उक्ताः। द्वितीयेऽध्याये प्राधान्येन गवामयनविधिर्निरूपितः। तत्र प्रथमेऽध्याये स्तोमो निरूपितः। उद्यतीस्वरूपं द्वितीये परिवर्तिनी विष्टुतिः तृतीये कुलार्थिनी विष्टुतिः चतुर्थे पञ्चदशस्तोमस्य तिस्रो विष्टुतिषु प्रथमायाः पञ्चपञ्चिन्याख्या विष्टुतिः पञ्चमेऽस्यैवापरविष्टुतिः षष्ठे उद्यताख्यविष्टुतिश्च प्रतिपादितविषयाः। सप्तमे सप्तदशस्तोमस्य दशसप्ताख्या विष्टुतिः अष्टमे तस्य एव विधानान्तरम् नवमे सप्तदशस्तोमस्य सप्तास्थिताख्या विष्टुतिः दशमे तस्या एव व्यूहनप्रकारान्तरम् एकादशे तस्या एव अपरा विष्टुतिः द्वादशे उद्यताख्याः सप्तदशस्तोमस्य अपरा विष्टुतिः अथैकविंशस्तोमस्य चतस्रो विष्टुतयः तत्र चतुर्दशे सप्तसप्तिन्याख्या प्रथमा विष्टुतिः पञ्चदशे अस्यैवोद्यताख्या द्वितीया विष्टुतिः षोडशेऽस्यैव

---

१. १।१।२। २. १।१।३ ३. १।१।४। ४. १।१।५। ५. १।१।६। ६. १।१।७। ७. १।१।८। ८. १।१।९। ९. १।२।१। १०. १।२।२। ११. १।२।३। १२. १।२।४। १३. १।२।५। १४. १।२।६। १५. १।२।७। १६. १।२।८। १७। १।२।९।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रतिष्टुतिसंज्ञका तृतीया विष्टुतिः सप्तदशेऽस्यैव सूर्याख्या चतुर्थी विष्टुतिश्च निरूपितविषयाः।

तृतीयाऽध्याये त्रिणवादिस्तोमविचारः। तत्र प्रथमे खण्डे तस्य प्रतिष्ठिताऽऽख्य प्रथमविष्टुतिः द्वितीये तस्यैव उद्यताख्यविष्टुतिः तृतीये त्रयस्त्रिंशत्स्तोमस्य पञ्चविष्टुतिष्वाद्या समग्रयं शाख्या चतुर्थे सङ्क्रमाख्या पञ्चमे उद्यत्याख्या षष्ठे अपरा, सप्तमे अन्त्या विष्टुतिरस्य। एवं हि त्रिवृदादयः षट् स्तोमाः उक्ताः। अष्टमे छन्दोगानां चतुर्विंशश्चत्वारिंशोऽष्टचत्वारिंश इति त्रिषु स्तोमेषु चतुर्विंशस्तोमस्य प्रथमा विष्टुतिः नवमे चतुश्चत्वारिंशस्तोमस्य प्रथमा विष्टुतिः दशमे तस्यैव द्वितीया निर्मध्याख्या विष्टुतिः एकादशे विष्टुतीनामनियमे व्यवस्था द्वादशेऽष्टचत्वारिंशस्तोमस्य प्रथमा विष्टुतिश्च प्रतिपादितविषयाः।

चतुर्थेऽध्याये गवामयनप्रसङ्गः। द्विविधोऽप्यसौ दशमाससाध्य द्वादशमाससाध्यश्च। प्रथमे हि उभयविधस्यैव सङ्केतः अतिरात्रसंस्थं प्रथममहर्विधानं द्वितीये चतुर्विंशसंस्थं द्वितीयमहर्विधानम् तृतीये तद्दिनकृत्ये माध्यन्दिनसवने ब्राह्मणाच्छंसिनः साम चतुर्थे चतुर्थाहः साध्यं ब्रह्मसाम पञ्चमे पञ्च षट् सप्त अष्टौ दिनानि षष्ठे विषुवः सप्तमे अभीवर्ताख्यं साम अष्टमे गोआयुषी द्वे अहनी नवमे पत्नीसंयाजविषयः दशमे उपान्त्याहानुष्ठेयम् इति।

पञ्चमेऽध्याये प्रथमे खण्डे महाव्रतनिर्णयः। वामदेव्यं महाव्रतं कार्यम्।[1] तस्मिन्नात्मैव पञ्चविंशः स्तोमः शिरः प्रभृतिषु स्तोमान्तरं शिरसस्त्रिवृत्स्तोमः। इत्थं हि पक्षिरूपेण क्लृप्तस्य महाव्रतस्तोत्रस्य शिरः प्रभृतीनां स्तोमा उक्तास्तत्र। द्वितीये खण्डे तस्यैवापरः कल्पो दर्शितः। वामदेव्यं महाव्रतं कार्यं तस्य गायत्रं शिरः बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छम्। तस्य प्राची दिक् शिरः प्रतीची दिक् पुच्छम्।

तृतीये इलान्दं साम अग्निष्टोमसामत्वेन कर्तव्यमिति प्रतिपादितम्। यज्ञायज्ञियमग्निष्टोमसाम कार्यम्। वारवन्तीयं वा अग्निष्टोमसाम कर्तव्यम्।

चतुर्थे खण्डे महाव्रतस्तोत्रस्य प्रयोगप्रकार उक्तः। तत्र प्राणेन पुरस्तादाहवनीयमुपतिष्ठन्ते अपानेन पश्चात्पुच्छम्।

पञ्चमे खण्डे महाव्रतस्तोत्रस्य पञ्चविधत्वमुक्तं यत्राध्वर्युः शिरसा मैत्रावरुणो दक्षिणेन पक्षेण ब्राह्मणाच्छंस्युत्तरेण गृह्णतिः पुच्छेन उद्गाता आत्मनेति। एतेषां गानविधिरत्रोक्तः।

---

१. ५।१।१।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षष्ठे युगपदुद्गायेयुरिति पक्षस्य प्रतिपादनम् अथवा उद्गातैव कृत्स्नं स्तोत्रमुद्गायेदित्यस्य पक्षस्य च।

सप्तमे गौरीचितसाम कथनम्। अष्टमे श्यावाइवन्निहवश्चैतयोः साम्नो विधानम्। नवमे गवामयनस्य दीक्षाकाल उक्तः 'एकाष्टकायां दीक्षेरन्' इत्यादिना।

षष्ठेऽध्याये प्रथमे खण्डे अग्निष्टोमविधानकथनम् तथैव ज्योतिष्टोमस्य त्रिवृदादिस्तोमचतुष्टयस्य च। द्वितीये खण्डे तद्विषयकज्ञातव्यान्युक्तानि। तृतीये अग्निष्टोम प्रशंसनपूर्वकं तद्विधिकथनम् चतुर्थे तत्रोद्गातृकर्मकथनम् पञ्चमे द्रोणकलशप्रोहणम् षष्ठे ग्राव्णामुपरि द्रोणकलशाध्यूहनम् सप्तमे होमविधानम् अष्टमे बहिष्पवमानस्तुतिविधानम् नवमे स्तोत्राणां प्रतिपद्विचारः तत्र ग्रामकामस्य प्रतिपत् प्रजाकामस्य प्रतिपत् पश्वादिभेषजकामस्य प्रतिपत् श्रैष्ठ्य कामस्य प्रतिपत् बह्वर्थंप्रयोगे प्रतिपत् इत्याद्याः। दशमे दीक्षितस्य मरणे प्रतिपत् अनृताभिशस्तस्य प्रतिपत् क्षत्रियस्य प्रयोगे प्रतिपत् राष्ट्रकामयमानस्य प्रतिपत् द्वियजमानके प्रयोगे प्रतिपत् वैरिगोकामस्य प्रयोगे प्रतिपत् च।

सप्तमेऽध्याये बहिष्पवमानादीनां सामानि स्तुतिप्रकाराश्च दर्शिताः। तत्र प्रथमे खण्डे गायत्रसाम्नः स्तुतिप्रकारः द्वितीये खण्डे आज्यस्तोत्राणां देवताः उक्ताः। तृतीये खण्डे माध्यन्दिनपवमानस्तुतिः चतुर्थे वृहत्याः स्तुतिः पञ्चमे गायत्रातिरिक्तानां चतुर्णां साम्नां स्तुतिः षष्ठे वृहद्रथन्तरचर्चा सप्तमे वृहद्रथन्तरयोः स्तुतिप्रकाराः अष्टमे वामदेव्यस्तुतिर्नवमे च। दशमे रथन्तरपृष्टेन औधसस्य बृहत्पृष्ठे श्यैतं कार्यमिति प्रतिपादनम्।

अष्टमेऽध्याये प्रथमे खण्डे ब्रह्मसाम विधानं द्वितीये प्रतिष्ठार्थिनः प्रयोगे ब्रह्मसामकथनम् कामनाभेदेन ब्रह्मसामविशेषाः तृतीये निर्वचनपूर्वकं कालेयस्तुतिः चतुर्थे खण्डे तृतीयसवनविचारस्तत्र गायत्रीसम्बन्धकथनम्, पञ्चमे सप्तपौष्कलविधानम् षष्ठे तस्यैवाऽनुवर्तनम् सप्तमे छन्दःप्रशंसा अग्निष्टोमोपसंहारश्च। अष्टमे उक्थस्तोत्राणि नवमे तत्र ब्रह्मसामादिकथनम् दशमे कामनाभेदेन उक्थप्रयोगः। नवमेऽध्यायेऽतिरात्रविधानमुक्तम्। तत्र प्रथमे खण्डे ससन्धिसामानस्त्रयो रात्रिपर्यायाः द्वितीये तेषां सप्रपञ्चं निरूपणम् ज्योतिष्टोमोपसंहारश्च। तृतीये सामविषयकप्रायश्चित्तम् चतुर्थे संस्तवर्निमित्तं प्रतिपदादिविधानं पञ्चमे सोमाहरणे प्रायश्चित्तं षष्ठे द्रोणकलशभेदने प्रायश्चित्तम् सप्तमे सोमातिरेकप्रायश्चित्तम् अष्टमे सत्रमध्ये दीक्षितानां मरणे कर्तव्यम् नवमे द्रोणकलशस्थसोमक्षये प्रायश्चित्तम् दशमे महावीर-भेदने प्रायश्चित्तम् चेति।

दशमेऽध्याये व्यूहद्वादशाहविधानमुक्तम्। प्रथमे दशरात्रगतत्रिवृदादिस्तोमप्रशंसा द्वितीये खण्डेऽग्निष्टोमस्य ज्योतिष्टोमत्वकथनम् तृतीये ऋद्धिफलक-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वादशाहविधानम् चतुर्थे आद्यन्तातिरात्रयोः प्रशंसनं विधानञ्च पञ्चमे द्वादशाहे आद्यन्तावतिरात्रौ दशममहश्चेति तन्मध्ये यो नवरात्रस्तस्य प्रशंसनम्, षष्ठे द्वादशाहस्य दशरात्रस्य स्तोत्रीयाणां साम्नाञ्च विधानम् सप्तमे षडहे अग्निविभक्तिवैचित्र्यादि अष्टमे विभक्तेर्नानात्वादि नवमे षडहस्य स्वराश्रयाणि रूपाणि दशमे तत्र निधनविभक्तेर्नानात्वकथनम् एकादशे इडाविभक्तेर्नानात्वकथनम् द्वादशे षडहस्य प्रत्यहं विशिष्टफलहेतुताकथनम् ।

एकादशेऽध्याये द्वादशाहरूपविशिष्टानां स्तोत्रीयाणां दाशरात्रिकाणां साम्नां च प्रशंसा । तत्र प्रथमे खण्डे बहिष्पवमानस्य स्तोत्रीयाणां स्तोमानाञ्च विधानम् द्वितीये आज्यानां विधानं तृतीये माध्यन्दिनपवमानस्य साम्नां विधानम् चतुर्थे होतृमैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानां चतुर्णां स्पृष्ठस्तोत्राणां विधानम् पञ्चमे उत्तरस्य आर्भवपवमानस्य स्तोत्रीयाणामानुरूप्यकथनम् षष्ठे द्वितीयस्याह्नः स्तोमक्लृप्तिः सप्तमे आज्यविधानम् अष्टमे माध्यन्दिनपवमानस्य त्रयः स्तोत्रीयाः नवमे तस्मिन्नहनि होतुरानुगुण्यादि दशमे आर्भवपवमानस्यैकं स्तोत्रीयम् एकादशे त्रीणि उक्थस्तोत्राणि च ।

द्वादशेऽध्याये प्रथमे तृतीये दाशरात्रिकेऽह्नि बहिष्पवमानस्य सप्तदशस्तोमस्य विधानम् द्वितीये होतुराज्यस्य स्तोत्रीयतृचकथनम् तृतीये माध्यन्दिनपवमानस्तोत्रीयकथनम् चतुर्थे होतुराज्यस्य तृचो विधानम् पञ्चमे आर्भवपवमानस्य स्तोत्रीयकथनपुरस्सरं तत्राऽऽनुपूर्व्यकथनम् षष्ठे त्रयाणामेवोक्थ्यानां स्तोत्रीयतृचो विधानम् । सप्तमे दशरात्रस्य चतुर्थेऽह्नि विधानम् अष्टमे तत्रैव आर्याज्यस्तोत्राणि चत्वारि । नवमे तत्रैव माध्यन्दिनपवमानस्य तृचः कथनम् दशमे पृष्ठानामाद्यस्य स्तोत्रस्य स्तोत्रीयस्य तृचः कथनम् एकादशे आर्भवपवमानस्य तृचः कथनम् द्वादशे द्वितीयस्य ब्रह्मण उक्थस्य स्तोत्रीयस्य तृचस्य कथनम् त्रयोदशे चतुर्थस्याह्नः षोडशिमत्त्वात् षोडशिस्तोत्रे वृहत्सामस्तुतिकथनम् षोडशीविधानञ्च ।

त्रयोदशेऽध्याये स्तोमकृत्यादिविधानं चतुर्दशे छन्दोमस्तोमक्लृप्तिः पञ्चदशेऽष्टाचत्वारिंशत्स्तोमक्लृप्तिः षोडशे अग्निष्टोमविकृतयः सप्तदशे व्रात्ययज्ञाद्यग्नि होत्रसमाप्तिः अष्टादशे उपहव्य-ऋतपेय शुनासीर्य-वैश्वस्तोम-तीव्रसुत-वाजयेय-राजसूयादिविधिः ऊनविंशे क्रतुद्वन्द्वविधानं विंशेऽहीनादिकल्पनं एकविंशे गर्गत्रिरात्रशेषचतूरात्रपञ्चरात्रसत्रवर्णनं द्वाविंशे षड्रात्राद्येकादशरात्रपर्यन्तं सत्रवर्णनं त्रयोविंशे द्वादशरात्रादिद्वात्रिंशद्रात्रक्रतुवर्णनम् चतुर्विंशे त्रयस्त्रिंशद्रात्रमारभ्य संवत्सरपर्यन्तानि सत्राणि पञ्चविंशाध्याये तु आदित्यपृष्ठानयनादिसहस्रसंवत्सरसत्रान्तो निरूपितः इति ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्र प्रथमे खण्डे पञ्चमस्याह्नः स्तोमक्लृप्तय उक्ताः। तत्र तावद्वहिष्पवमानस्याद्यं तृचं स्तोत्रीयम् द्वितीये प्रथमस्याज्यस्तोत्रस्य स्तोत्रीयं तृचं तथैव द्वितीयस्यापि दर्शयति तृतीये माध्यन्दिनपवमानस्य त्रयः स्तोत्रीयास्तृचाः चतुर्थे खण्डे होतुः पृष्ठस्तोमनिवर्तकं शाक्वरसाम पञ्चमे आर्भवपवमानस्य तृचाः षष्ठे उक्थानां स्तोत्रीयास्तृचाः सप्तमेऽह्नि बहिष्पवमानस्य तृचाः अष्टमे तत्रैव आज्यस्य स्तोत्राणि नवमे माध्यन्दिनपवमानतृचः अथ दशमे पृष्ठस्तोत्रेषु स्तोत्रीयाणामृचां छन्दोविशेषविधानम् एकादशे आर्भवपवमानस्य आद्यातिस्रः स्तोत्रीयाः द्वादशे उक्थस्तोत्रेषु द्विपदाः स्तोत्रीयाः कार्याः इति विधानम्।

चतुर्दशेऽध्याये छन्दोगानां प्रथमद्वितीययोः स्तोमक्लृप्तिरुक्ता। तत्र प्रथमे बहिष्पवमानस्तोत्रे स्तोमक्लृप्तिः द्वितीये खण्डे सप्तमेऽह्नि आज्यस्तोत्रम् माध्यन्दिनपवमानतृचकथनम् चतुर्थे तृतीयस्य पृष्ठस्तोस्य तृतीयस्तृचः पञ्चमे आर्भवपवमानस्य प्रतिपत्तृवच-षष्ठ उक्थस्तोत्राणां स्तोत्रीयतृचः सप्तमे बहिष्पवमानस्य स्तोत्रीयास्तृचाः अष्टमे आज्यस्तोत्रम् नवमे माध्यन्दिनपवमानस्य स्तोमक्लृप्तिः दशमे ब्रह्मपृष्ठसाम्नः स्तोत्रीया एकादशे आर्भकपावमांनस्य प्रतिपत्तृचः द्वादशे उक्थानां स्तोत्रीयास्तृचाः।

पञ्चदशेऽध्याये प्रथमे खण्डे नवमस्याह्नः अष्टचत्वारिंशत्स्तोमकस्य प्रथमेनावरणेन स्तोमक्लृप्तिः द्वितीये आज्यस्तोत्रं तृतीये माध्यन्दिनसदनस्य तृचः चतुर्थे पृष्ठस्तोत्रे चतुर्षु तृतीयस्तृचः पञ्चमे आर्भवपवमानस्य तृचाः उक्थेषु तृचाः अथ दशमाह्नः स्तोमक्लृप्तिः तत्र सप्तमे अनुष्टुभां प्रत्यक्षोपायनमष्टमे आज्यस्तोत्रं नवमे माध्यन्दिनपवमानस्य स्तोत्रीयस्तृचः दशमे पृष्ठस्य स्तोत्रीयतृचाः एकादशे आर्भीयपवमानस्य स्तोत्रीयतृचाः द्वादशे दशमेऽह्नि अन्तिमस्तोत्रीयः।

षोडशेऽध्यायेऽग्निष्टोमविकृतय उक्ताः। तत्र प्रथमे एकाहानां प्रथमस्य ज्योतिरिति निर्वचनम् अनुष्ठानस्तुतिश्च द्वितीये अन्यस्यैकाहस्य विधानम् तृतीये तृतीयेकाहस्य विधानम् चतुर्थे अभिजिद्विश्वजिद्विषयः पञ्चमे विश्वजिति बहिष्पवमानस्य नव स्तोत्रीयाः षष्ठे सर्वस्वदाननिमित्तं यजमानव्रतम् सप्तमे सर्वजितः सोमसंस्थे अष्टमे सहस्रदक्षिणाः साहस्रा नाम चत्वार एकाहाः तत्र प्रथमस्य विचारः नवमे द्वितीयस्य दशमे तृतीयस्य विश्वज्योतिःसंज्ञाकस्य एकादशेऽग्निष्टोमसंस्थश्चतुर्थं एकाहः द्वादशे साद्यस्कानां पञ्चैकाहविधानं तत्र प्रथमः त्रयोदशे द्वितीयः चतुर्दशे तदुत्तरः पञ्चदशे चतुर्थः षोडशे श्येनाख्यः पञ्चम इति।

सप्तदशेऽध्याये व्रात्ययज्ञाद्यग्निहोत्रसमाप्तिः। तत्र प्रथमे चत्वारो वै व्रात्ययज्ञा एकाहास्तेषु षोडशस्तोमविधानम् द्वितीये निन्दितैरनुष्ठेयो व्रात्यस्तोमः तृतीये कनीयोव्रात्यैरनुष्ठेययागः चतुर्थे स्थविरव्रात्यानुष्ठेययागः पञ्चमेऽग्निष्टुत-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विधिः प्रथम-द्वितीयञ्चाग्निष्टुतम् षष्ठे तृतीयमग्निष्टुतम् सप्तमें पशुकामस्यान्यमग्निष्टुतम् अष्टमे कारणाद्यज्ञविच्छेदे विधिः नवमेऽन्यमग्निष्टुतम् दशमेऽग्निष्टुताहविषयः एकादशे बृहस्पतिसवाख्य एकाहः द्वादशेऽन्य एकाहः त्रयोदशे वैश्वदेवाख्यपर्वणः स्थाने कर्तव्यः सोमयागः वरुणप्रघाससाकमेधशुनासीरीयाणां पर्वणां स्थानेऽपि कर्तव्या यागाः चतुर्दशे चातुर्मास्यादीनां निरतिशयफलसाधनत्वम् ।

अष्टादशेऽध्याये प्रथमें खण्डे उपहत्यानामेकाहः द्वितीयेऽन्य एकाहः तृतीये अन्योऽग्निष्टोमसंस्थ एकाहः चतुर्थे वैश्वस्तोमाख्याग्निष्टोमसंस्थैकाहः पञ्चमे उक्थसंस्थ अन्य एकाहः षष्ठे वाजपेयाख्यैकाहः सप्तमे वाजपेयनिर्वचनादिः अष्टमे राजसूयविधानम् नवमे दशमेये वक्तव्या विशेषाः दशमे केशवयनीयादि एकादशे पूर्वोक्तक्रतुविशेषगतसामस्तुतिः ।

एकोनविंशेऽध्याये क्रतुद्वन्द्वविधानं यत्र प्रथमे राट्क्रतुविधिस्तोमौ द्वितीये तत्र विशेषः तृतीये औपसदक्रतुविधानं क्रतुविशेषविधिः च्यावनसामविधानं सामद्वयविधानञ्च चतुर्थे स्तोमक्रतुविधानं पञ्चमे चैतुष्टोमक्रतुविधानं षष्ठे द्वितीयचतुष्टोमविधानं सप्तमे उद्भिद्वलभित्क्रतुविधानं दशमे यक्षाख्यक्रतुविधानम् एकादशे ज्योतिष्क्रतुविधानं द्वादशे ऋषमाख्यक्रतुविधानम् त्रयोदशे गोसवक्रतुविधानं चतुर्दशे मरुत्स्तोमक्रतुः पञ्चदशे षोडशे कुलायाख्यक्रतुविधानं सप्तदशे इन्द्राग्निस्तोमक्रतुः अष्टादशे निधनक्रतुविधानं ऊनविंशे द्वितीयं निधनक्रतुः ।

विंशे अहीनादिकल्पनम् । तत्र प्रथमे अतिरात्रस्तोमक्लृप्तिः द्वितीये स्तौमातिरात्र तृतीये आप्तोर्यामक्रतुस्तोम चतुर्थे नवसप्तदशातिरात्रः पञ्चमे विषुवदतिरात्रक्रतुः षष्ठे गोष्टो मातिरात्रः सप्तमे सप्तमे आयुष्टोमातिरात्रः अष्टमे अभिजिदतिरात्रः नवमे विश्वजिदतिरात्रः दशमे चत्वारोऽतिरात्राः एकादशेऽङ्गिरसां त्रिरात्रः क्रतुः द्वादशे चैत्ररथाद्विरात्रक्रतुः त्रयोदशे कापिवनत्रिरात्रक्रतुः चतुर्दशे गर्गं त्रिरात्र क्रतुःपञ्चदशे गर्गत्रिरात्रस्तुतिः षोडशेपदार्थहेतुत्वेन दिराजः स्तुतिः ।

एकविंशे गर्गत्रिरात्रशेषचतूरात्रपञ्चरात्रवर्णनम् । प्रथमे गर्गत्रिरात्रदक्षिणादिविषयः द्वितीये आज्यदोहप्रशंसा तृतीये शबलीहोमः चतुर्थे अश्वत्रिरात्रविधिः पञ्चमे वैदत्रिरात्रः षष्ठे छन्दोभपवमानत्रिरात्रः सप्तमे तुर्वसुत्रिरात्रः अष्टमे पराकत्रिरात्रः नवमे चतुर्वीराख्यचतूरात्रः दशमे यमदग्नेश्चतूरात्रः एकादशे वसिष्ठचतूरात्रः द्वादशे विश्वामित्रसञ्जयचतूरात्रः त्रयोदशे अभ्यासंग्याख्यपञ्चरात्रः चतुर्दशे पञ्चशारदीयपञ्चरात्रः पञ्चदशे अन्तर्महाव्रतपञ्चरात्रः ।

द्वाविंशाऽध्याये षरात्राद्येकादशरात्रपर्यन्तवर्णनम् तत्र प्रथमे ऋतूनां षड्रात्रः द्वितीये त्रिकञ्चुकषड्रात्रः तृतीयेऽन्यासङ्गः षड्रात्रः चतुर्थे सप्तर्धिसप्तरात्रः पञ्चमे पञ्चमे प्रजापतिसप्तरात्रः षष्ठे छन्दोभपवमानसप्तरात्रः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सप्तमे यामदग्न्यः सप्तरात्रः अष्टमे ऐन्द्रः सप्तरात्रः नवमे जनकसप्तरात्रः दशमे पृष्ठस्तोमसप्तरात्रः एकादशे देवत्वसाधनाष्ठरात्रः द्वादशे दैवनदरात्रः त्रयोदशे पशुसाधननवरात्रः चतुर्दशेत्रिकद्रुकदशरात्रः पञ्चदशे कुसुरुविन्ददशरात्रः षोडशे पशु साधनदशरात्रः सप्तदशे देवपुरदशरात्रः अष्टादशे विश्वजिदेकादशरात्रः।

त्रयोविंशाध्याये द्वादशरात्रादिद्वात्रिंशद्रात्रसत्रम्। प्रथमे आप्तद्वादशाख्ययज्ञः द्वितीये प्रतिष्ठासाधनत्रयोदशरात्रः सर्वपशुसाधनचतुर्दशरात्रः चतुर्थे द्वितीयचतुर्दशरात्रः पञ्चमे तृतीयचतुर्दशरात्रः षष्ठे प्रथमपञ्चदशरात्रः सप्तमे द्वितीयपञ्चदशरात्रः अष्टमे तृतीयपञ्चदशातिरात्रः नवमे चतुर्थपञ्चदशरात्रः दशमे ऐन्द्रषोडशरात्रः एकादशे प्रजापतिसप्तदशरात्रः द्वादशे देवाष्टादशरात्रः त्रयोदशे वायोरेकोनविंशतिरात्रः चतुर्दशे विंशतिरात्रः पञ्चदशे प्रथमैकविंशतिरात्रः षोडशे द्वितीयैकविंशतिरात्रः सप्तदशे द्वाविंशतिरात्रः अष्टादशे त्रयोविंशतिरात्रः ऊनविंशे प्रथमचतुर्विंशतिरात्रः विंशे द्वितीयचतुर्विंशतिरात्रः एकविंशे पञ्चविंशतिरात्रः द्वाविंशे षड्विंशतिरात्रः त्रयोविंशे सप्तविंशतिरात्रः चतुर्विंशेऽष्टाविंशतिरात्रः पञ्चविंशे एकोन त्रिंशरात्रः षड्विंशे त्रिंशद्रात्रः क्रतुः सप्तविंशे एकत्रिं शद्रात्रः अष्टाविंशे द्वात्रिंशद्रात्रः।

चतुर्विंशेऽध्याये त्रयस्त्रिंशद्रात्रमारभ्य संवत्सरपर्यन्तानि सत्राणि। तत्र प्रथमे त्रयस्त्रिंशद्रात्रः द्वितीये अपरस्त्रयस्त्रिंशद्रात्रः तृतीये तृतीयस्त्रयस्त्रिंशद्रात्रः चतुर्थे चतुस्त्रिंशद्रात्रः पञ्चमे पञ्चत्रिंशद्रात्रः षष्ठे षट्त्रिंशद्रात्रः सप्तमे सप्तत्रिंशद्रात्रः अष्टमे अष्टात्रिंशद्रात्रः नवमे एकोनचत्वारिंशद्रात्रः दशमे चत्वारिंशद्रात्रः एकादशे प्रथमैकोनपञ्चाशद्रात्रः द्वादशे द्वितीयैः कोनपञ्चाशद्रात्रः त्रयोदशे तृतीयैकोनपञ्चाशद्रात्रः चतुर्दशे चतुर्थैकोनपञ्चाशद्रात्रः पञ्चदशे पञ्चमैकोनपञ्चाशद्रात्रः षोडशे षष्ठैकोनपञ्चाशद्रात्रः सप्तदशे सप्तमैकोनपञ्चाशद्रात्रः अष्टादशे एकषष्टिरात्रः ऊनविंशेशतरात्रः विंशे संवत्सरक्रतुः।

पञ्चविंशाध्याये आदित्यपृष्ठायनादिसहस्रसंवत्सरसत्रम्। तत्र प्रथमे आदित्यानां पृष्ठमयनम् द्वितीये अङ्गिरसामयनं तृतीये हतिवातवतोरयनं चतुर्थे कुणयायिनामयनम् पञ्चमे तपस्विनामयनम् षष्ठे द्वादशसंवत्सरसत्रं सप्तमे षट्त्रिंशत्संवत्सरसत्रम् अष्टमे साध्यानां संवत्सरः नवमे सहस्रसाध्यसत्रम् दशमे-प्रथमसारस्वतसत्रम् एकादशे द्वितीयसारस्वतसत्रम् द्वादशे तृतीयः सारस्वतः त्रयोदशे दार्षद्वतेष्टयनम् चतुर्दशे तुरायनेष्टयनं पञ्चदशे सर्पसत्रप्रकारः षोडश त्रिसंवत्सरसत्रं सप्तदशे सहस्रसंवत्सरसत्रम् अष्टादशे विश्वसृजामयनमिति प्रपञ्चितविषयाः।

एतत्तु सामान्यदिग्दर्शनमेव वस्तुतस्तु महाब्राह्मणस्यास्य ३४७ खण्डेषु विभक्तस्य विषयसूची अपि अतीवदीर्घतमा भवेदेव।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वेषामेव सामवेदीयब्राह्मणानामुपजीव्यभूतमिदं ब्राह्मणं सर्वानेव विषयान् वैषद्येन प्रपञ्चयति यज्ञसम्बद्धान् । तेनेदं प्रौढेतिविशेषणेन विभूषितमपि ।

२. षड्विंशब्राह्मणम्

सामवेदीयब्राह्मणेषु षड्विंशब्राह्मणस्य द्वितीयं स्थानम् । इदं हि पञ्चविंशब्राह्मणस्य ताण्ड्याख्यस्य प्रौढापराभिधेयस्य षड्विंशतितमाध्यायत्वेन गृह्यते तज्ज्ञैः । साध्वप्येतत् । अत्र हि ये हि पञ्चविंशेऽनुल्लिखितास्त एवात्र विषया निरूपिताः । केषाञ्चित्तत्रोल्लिखितानां किन्तु स्पष्टतयाऽव्याख्यातानामपि व्याख्यानमत्र लभ्यते ।

ग्रन्थोऽयं प्रकारद्वयेन विभाजितो दृश्यते । कलिकातातः जीवानन्दविद्यासागरेण सम्पाद्य प्रकाशिते (१९३८ वै० १८८१ ख्री०) संस्करणे दर्शिताः पञ्चैव खण्डाः किन्तु तिरुपतिसंस्करणे (२०२४ वै० १९६७ ख्री०) सन्ति षडध्यायाः प्रत्यध्यायं खण्डाश्च । वयमत्र द्वितीयमेव प्रामाणिकत्वेन गृह्णीमः ।

अत्र हि प्रथमेध्याये सप्त द्वितीयेऽपि सप्तैव तृतीये नव चतुर्थे षट् पञ्चमे सप्त षष्ठे द्वादशेति सन्ति ४८ खण्डाः समुदिताः । खण्डश्च प्रत्येकं कण्डिकासु विभक्तोऽस्ति । तत्र प्रथमेऽध्याये प्रथम खण्डे त्रिंशत् द्वितीये त्रयोदश तृतीये त्रयोविंशति चतुर्थे षोडश पञ्चमे पञ्चदश षष्ठे एकविंशति सप्तमे तिस्रः इति सन्ति समष्टौ १२२ कण्डिकाः । द्वितीयेऽध्याये प्रथमखण्डे षट्त्रिंशत् द्वितीये षड्विंशतिः तृतीये पञ्चदश चतुर्थे सप्त पञ्चमे एकादश षष्ठे षट् सप्तमे नवेति ११० कण्डिकाः तृतीयाध्याये प्रथमखण्डे दश द्वितीये चतस्रः तृतीये पञ्चविंशति चतुर्थे षट्त्रिंशत् पञ्चमे चतस्रः षष्ठे पञ्च सप्तमे चतस्रः अष्टमे तिस्रः नवमे द्वे इति ९४ कण्डिकाः चतुर्थाध्याये प्रथमखण्डे एकविंशतिः द्वितीये चतुर्विंशतिः तृतीये सप्त चतुर्थे दश पञ्चमे अष्टौ षष्ठे पञ्चेति ७५ कण्डिकाः पञ्चमेऽध्याये प्रथमे खण्डे षोडश द्वितीये एका तृतीये षट् चतुर्थेऽष्टादश पञ्चमे चतस्रः षष्ठे षट् सप्तमे तिस्रः इति ५४ कण्डिकाः षष्ठेऽध्याये प्रथमे खण्डे सप्त द्वितीये तिस्रः तृतीये तिस्रः चतुर्थे तिस्रः पञ्चमे तिस्रः षष्ठे तिस्रः सप्तमे तिस्रः अष्टमे तिस्रः नवमे तिस्रः दशमे सप्त एकादशे तिस्रः द्वादशे तिस्र इति ४२ कण्डिकाः इति ४९७ कण्डिकाः ग्रन्थगताः ।

ब्राह्मणस्यास्य प्रतिपाद्यविषयमादाय भाष्यकृत्सायणाचार्य कथयति—

'अस्मिन् ताण्डकशेषे ब्राह्मणे पूर्वत्रानुक्तानि कर्माणि उक्तानामपि ये भेदास्ते च वर्ण्यन्ते । तत्र प्रथमं सुब्रह्मण्योच्यते । ततः सवनत्रये विज्ञेयम् । ततो विश्वरूपागानम् । ततो व्याहृति होमादिकं नैमित्तिकं प्रायश्चित्तम् । ततः सौम्य-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चरुविधिः । ततो बहिस्पवमानधर्माः । ततः किञ्चित् प्रकीर्णकम् । ततो होत्राद्युपह्वाः तत आर्त्विज्येषु ऋत्विगादिविज्ञेयम् । ततो नैमित्तिका होमाः । अथ ऋत्विग्वरणप्रशंसा । ततो देवयजने विज्ञेयं कर्म । ततोऽवभृथः । ततोऽभिचारादिसंश्रिता विष्टुतयः । ततो द्वादशाहादि स्तुतिः । ततः श्येनादिविधिः । ततो वैश्वदेव सतन्त्रम् । ततोऽग्निहोत्रप्रशंसा । तत औदुम्बरीविधिः । ततो यूपविधिः । अथ सन्ध्याविधिः । ततः सोमोत्पत्तिः । ततः स्वाहालक्षणम् । ततोऽद्भुतशान्तिः सामान्यविशेषभावेन द्विविधा । इत्येवं प्रतिपाद्यमानानामर्थानामनुक्रमणिका ।[1]

तत्र सुब्रह्मण्यामधिकृत्य तत्रोक्तं यत्सर्गादौ ब्रह्म सुब्रह्म चोभे एवास्तां नान्यः कश्चिदपरः ।[2] ततः सुब्रह्मण्देवेभ्यः सकाशादुदगच्छत् ।[3] उद्गच्छति सुब्रह्मणि यदा ब्रह्म च तथा कर्तुमुद्युक्तं तदा वस्वादयो देवास्तं यज्ञेन परिगृहीतवन्तः । अत्राग्निर्ब्रह्म सुब्रह्मण्यादित्यः । स्थिते ब्रह्मणि देवा सुब्रह्म अन्विच्छितवन्तः । तेन उत्करे (यत्र सोममृद्धृत्य कीर्यन्ते पांसवः) सुब्रह्मण्यस्तदाख्य ऋत्विक् सुब्रह्मणिइन्द्रे साधुरिति तां देवतां त्रिराह्वयति ।[4] देवा हि त्रिषत्याः ।[5] इन्द्रोहि मेधातिथेर्मेषः । स हि मेधातिथिं काण्वायनं मेषो भूत्वा जहारेति । स हि वृषणश्वस्य मेनः यतो हि मेनस्य दुहितां मेनकां कामयामासेति स हि गौरावस्कन्दः यतो हि गौरमृगो भूत्वाऽरण्ये सोमं राजानं पपाविति । अहल्यायाः जारः सः अहल्याया उपपतित्वात् । स गौतमब्रुवाणः यतः स युद्धे गौतम इति ब्रुवाणश्चचारेति ।[6] ये हि ब्राह्मणास्ते मनुष्यदेवाः श्रुतवन्तः साङ्गवेदाध्यायिनः ।[7] आहुतय एव देवानां भागः दक्षिणा मनुष्यदेवानां ब्राह्मणानाम् ।[8]

उत्करे हि असुरा रक्षांसि च देवानां यज्ञमजिघांसन् । ततः प्रवर्तिते युद्धे देवास्तान् वृष्ट्याऽशन्या विद्युताऽघ्नन् । तेन हि सुब्रह्मण्या स्त्रो पुमान् नपुंसकञ्च । तेन सुब्रह्मण्या ऋक् मन्त्र एव निगदभूतं यजुः सामपि ।[9]

सुब्रह्मण्यायाः पृथिव्यन्तरिक्षं द्यौः दिशः परोरजा इति पञ्च पादाः यत्र यत्र स्मृता सा तत्रत्यानि असुर रक्षांसि निहन्ति ।[10] अयं सुब्रह्मण्यानिगदो ब्रह्मश्रीर्नाम । ब्रह्मवेद तेन श्रीयते तत् श्रयतीति वा यदेतत्सुब्रह्मण्येति तत्साम्नैव । तथैव सामगैः क्रियमाणत्वात् तेन प्रातरनुवाके उपाकृतेरप्रारब्धेऽसमाप्ते च यज्ञे प्रत्यहमहर्गणेषु सुब्रह्मण्यः सुब्रह्मण्यामाह्वयति ।[12]

अथ सर्वयज्ञव्याप्तानि विज्ञातव्यानि निर्दिश्यन्ते । तत्र प्रातः सवनमेकच्छन्दः

---

१. पु० १२ । २. १।१।१ । ३. १।१।२ । ४. १।१।३-८ । ५. १।१।९ । ६. १।१।१०-२५ । ७. १।१।१।२९ । ८. १।१।१।३० । ९. १।२।१-७ । १०. १।२।९ । ११. तत्रैव० १० ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकं गायत्रमेव छन्दो यस्य तत्। तत्तथा बहिष्पवमानीयानामाज्यस्तोत्रीयागाञ्च सर्वासामेव ऋचां गायत्रच्छन्दस्कत्वात्। तत एव पुरुष एकपात्। यद्यपि पुरुषो द्विपात्तथापि न हि द्वाभ्यामेव समकालावच्छेदेन पथि गच्छति पद्भ्यामपितु पादमेकमन्यत्र पुरोदेशे प्रक्षिपति अन्येनैकेन भूमौ प्रतितिष्ठति इति।[1] माध्यन्दिनः पवमानस्त्रिच्छन्दाः। त्रीणि गायत्रीवृहतीत्रिष्टुबाख्यानि छन्दांसि यस्य स इति। तेन पुरुषस्य त्रयः प्राणा अवाञ्च मूत्रपुरीषरेतोविसर्जनहेतवः। माध्यन्दिने पवमाने गायत्र्यां द्वे सामनी तस्मादधरेण प्राणेन द्वयं करोतीत्युक्तं रेतोमूत्र-विसर्जनं पुरीषोत्सर्गश्च। द्वे वृहत्यां सामनी रौरवयौधाजयनामधेये तस्मात् प्राणनमपाननञ्चैतेतद्द्वयमुत्तरेण वायुना करोति। एकं त्रिष्टुभि साम औस-नाख्यं तेन एकैव नाभिः प्राणः। माध्यन्दिनात्पवमानादूर्ध्वं यदेव क्रियमाणं स्तोत्रं स आर्भवः पवमानः।[2]

छन्दःसु प्राणो गायत्री श्रोत्रे उष्णिक्ककुभौ वागनुष्टुप् चक्षुर्जगती। पुष्टिरेव यदन्यत्।[3] द्वे गायत्र्यां सामनी तेन प्राणनञ्चापाननञ्चेति द्वयं प्राणेन करोति। एकं छन्द उष्णिक्ककुभौ द्वे सामनी, तेन समानं सत् श्रोत्रं द्वेधैव शृणोति। अनुष्टुभि द्वे सामनी। तेन वाचा सत्यञ्चानृतञ्चेति वदत्युभयमेव। जगत्यामेकं साम। तेन द्वे अक्षिणी सती समानं पश्यतो न हि पश्चादायान्तम्।[4] तत ऊर्ध्वं यत्साम तान्मूर्द्धा तदेव यज्ञायज्ञीयम्।[5]

यज्ञो वै जज्ञ इत्यप्युच्यते जननहेतुत्वात्।

ज्योतिष्टोमे सुत्येऽहनि प्रातरनुवाकात्पूर्वं विश्वरूपागानं क्रियते तस्य प्रकारमुक्तं प्रथमाध्यायस्य चतुर्थ खण्डे। प्रातरनुवाकात्पूर्वं विश्वरूपागानामा-ध्वर्युणोपहूत उद्गाता हविर्धानमण्डपं गत्वा उदङ्ङासीनो विश्वरूपागानं करोति। विश्वरूपा इति विश्वरूपशब्दवतीः। सा च युञ्जे वाचं शतपदी (सा १६२९) इत्येतस्यां गायत्रीकारं प्रगायमानेन उत्पन्नास्तिस्रः स्तोत्रीया इति। विश्वरूपागानविधिर्न नित्यः किन्तु षोडशिग्रह विधिवद्वैकल्पिकः।

प्रथमाध्यायस्य पञ्चमे खण्डे यज्ञाचार्यस्य विषयो निरूपितः। वाङ्मनसः स्वरूपविदं वासिष्ठं वा ब्रह्माणं कुर्यात्। इन्द्रो विश्वामित्राय अवोचदुक्थं वसिष्ठाय ब्रह्म वागुक्थं मनो ब्रह्म। तेन वासिष्ठं ब्रह्म।[6] स च ब्रह्मा यावत् ऋग्यजुः सामभिर्होत्रध्वर्यूद्गातारः स्वरवकर्म कुर्युस्तावद् मौनमातिष्ठेत्। प्रजापतिर्हि इमान् त्रीन् वेदानसृजत् किन्तु ते प्रजापतिं नाप्रीणयन्। स पुनस्तान् सारजि-

---

१. १।३।१। २. १।३।१।२-९। ३. १।३।१०-११। ४. १।३।१२। ५. ३।१।१३।८। ६. १।५।१-२।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चृक्षयाऽभ्यपीडयत्। तेभ्यः क्रमशः भूर्भुवः स्वरित्यक्षरत्। भूरिति ऋग्भ्योऽक्षरत् सोऽयं लोकोऽभवत्। भुवरिति यजुर्भ्योऽक्षरत् सोऽन्तरिक्षलोकोऽभवत्। स्वरिति सामभ्योऽक्षरत् स स्वर्गलोकोऽभवत्। तेन भूर्लोक एव गार्हपत्य ऋग्वेदश्च। होत्रादिभिः कार्येन्यूनाधिकं क्रियमाणे आचार्यः गार्हपत्याग्नौ 'भूः स्वाहा' इति जुहुयात्। यजुष्टो न्यूनाधिकं सञ्जाते दक्षिणाग्नौ स भुवः स्वाहेति जुहुयात्। दक्षिणाग्निरेवान्तरिक्षं यजुर्वेदश्च। सामविदा न्यूनाधिकं कृते आहवनीयाग्नौ 'स्वः स्वाहा' इति जुहुयात्।[1]

अथ षष्ठे खण्डे विराजोऽतिरेके तन्न्यूनतायां वा प्रायश्चित्तं निर्णीतम्। काले यजेत याजयेत। यज्ञस्य समृद्धया हृष्येत् न तु वृद्धया।[2] अनवधानेन कर्मणो व्यत्यये व्याहृतीर्मनसा जपेत् भूर्भुवः स्वरिति वैष्णवीं वर्चम् वा 'इदं विष्णुरिति (सा० २२२) भूर्भुवः स्वः रित्येता महाव्याहृतयः। एता हि यच्चावगतं यच्चानवगतं सर्वस्यैवैद्व प्रायश्चित्तिरिति। तेट हि सर्वपापप्रायश्चित्तनिमित्तकं महाव्याहृतिभिर्जुहुयात्।[3]

सप्तमे खण्डेऽर्थवादपुरस्सरं सौम्यश्चरुः प्रशस्यते। यच्च सोमो निहन्यते येन च स प्रमीत इव भवति अभिषवस्तस्य मुमूर्षोरनुस्तरणी इव भवति। तेन सोमाभिषवनिमित्तं सौम्यं चरुं निर्वपेत्। हुताशिष्टे पात्रस्थिते सौम्ये चरावाज्यं पूरयित्वा तदवेक्षणं त्रिपदधीत।[4] अवेक्षितञ्च सौम्यं स्तुतिपूर्वकं प्राश्नीयात्। उद्गातेतिशेषः। तेन स अन्नाते भवति।[5]

द्वितीयेऽध्यायेऽग्निष्टोमे बहिष्पवमान धर्माणां निरूपणं क्रियते। तस्यायमुपोद्घातः—

'प्रजापतिरकामयत बहुस्यां प्रजायेयेति। स एतस्यां रेतस्यामृचं साम्ना प्रच्छन्नामगायत। यद्दचमसाम्नीमगास्यदस्थ्यमांसभजनिष्यत। यत्सामानृचं मांसयनास्थिकमजनिष्यत ऋचं साम्ना प्रच्छन्नां गायति। तस्मात् पुरुषः प्रच्छन्नो मांसेन त्वचा लोम्ना जायते।'

इति।[6] ऋक् च 'उपास्मै गायता नरः (सा० ६५१) इति। तत्र पवमानायेन्दवे (सा० ६५१) इत्यत्र आद्येषु त्रिषु प्लुतं गायेत्। न तत्र हिंकारं कुर्यात्। वज्रो वै हिङ्कारः स च सिक्तमपि रेतो विच्छिन्द्यात्। अस्यावशिष्टे भागे द्वितीयखण्डे च द्वितीयातः षष्ठीपर्यन्ताया ऋचो गानविधिरुक्तः। तृतीये खण्डे धुरः प्रशंसा। देवाश्चासुराश्च पृथिव्यादिलोकविषयेष्वस्पर्धन्त। तत्र देवा हि

१. १।५।७-१०। २. १।६।३। ३. १।६।१८-१९। ४. १।७।१-२। ५. १।७।१-३। ६. २।१।१।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रजापतिमुपागमन्। प्रजापतिस्तान् हि मनः प्राणश्चक्षुः श्रोत्रं वागिति एतान् धुरः प्राणानयच्छत्। तेभ्य एव पुरुषः पशवश्चोत्पादिताः। तेन पुरुषेण देवा असुरानवधिषुः।[१]

चतुर्थखण्डे होत्रादीनामग्न्यादिरूपेण व्यवहारः कथितोऽस्ति। प्राञ्चमग्निमुन्नयन्ति तस्माद्धोता प्राङ्मुखो जुहोति।[२] असावादित्यः प्रागञ्चनः प्रत्यगञ्चनः सञ्चरति तेनाध्वर्युरपि प्राङ्पाङ् सञ्चरति।[३] चन्द्रमा दक्षिणेन एति तस्माद् ब्रह्मा दक्षिवत उपविशति।[४] उदीच्यां भूयिष्ठं पर्जन्यो विद्योतते। तेनोद्गाता उदङ्मुखो गायति।[५] आकाशो भूतानां मध्येऽवहितस्तस्मात्सदस्यो मध्ये आसते।[६] यथा ह्यादित्यस्यैव गतं रश्मयोऽप्यनुयन्ति तथैव चमसाध्वर्यवोऽपि अध्वर्योरेव गतमनुयन्ति।[७]

पञ्चमे खण्डे प्रातः सवने चमसभक्षणायोपहवादयः कथिताः। यदेव गार्हपत्याग्नौ जुहोति तत्प्रातःसवनम्। अथ यजमानश्चमसभक्षणाय होत्रादीनुचैराह्वयति अग्निर्मे होता आदित्यो मेऽध्वर्युः चन्द्रमा मे ब्रह्मा पर्जन्यो मे उद्गाता आकाशो मे सदस्यः आपो मे होत्राशंसिनः रश्मयो मे चमसाध्वर्यवः इति तान् आह्वयामीति। ततस्तैरनुज्ञातः सन् चमसं भक्षयति। प्राणो वै यजमानः।[८]

षष्ठे तु माध्यन्दिनसवने उपहवाः कथ्यन्ते। माध्यन्दिनसवनं हि यद् दक्षिणाग्नौ जुहोति तत्। तत्र यजमान चमसभक्षणाय 'वाङ्मे होता चक्षुर्मेऽध्वर्युः' मनो मे ब्रह्मा श्रोत्रंमे उद्गाता अन्तश्चक्षुषि य आकाशः स मे सदस्यः अन्तश्चक्षुषि या आपदस्ता होत्राशंसिनः अङ्गानि मे चमसाध्वर्यवः ते आहूयन्ता मित्युच्चैः कथयति भक्षयति च तैरनुज्ञातश्चमसम्। अपानो वै यजमानः।[९]

सप्तमे तृतीयसवने उपहवः कथ्यते। तत्र यजमानः प्राणो मे होता अपानो मेऽध्वर्युः व्यानो मे ब्रह्मा समानो मे उद्गाता योऽयमन्तः पुरुष आकाशः स मे सदस्यः अन्तःपुरुषे या आपस्ता होत्राशंसिनः लोमानि मे चमसाध्वर्यवः ते उपहूयन्तामित्युच्चैः कथयति। ताश्च देवता ऋत्विजामेव वचनैरुपहूयन्ते। सोऽनुज्ञातश्चमसं भक्षयति। उदानो यजमानः। यदाहवनीयेऽग्नौ हूयते तत् तृतीयसवनम्। होता सर्वेषाञ्चमसं भक्षयेदुद्गातुस्तु स एव। देवानां वैतद्यज्ञस्य मुखं यदुद्गातृचमसम् इति।[१०]

तृतीयेऽध्याये ऋत्विजां यजमानस्य ज्ञातव्यं निर्दिश्यते। यज्ञे हीनं न कुर्यात्।[११] यद्धोता जहाति यजमानं वाग् जहाति यदध्वर्युर्जहाति चक्षुः तं जहाति

---

१. २।३।१-४। २. २।४।१। ३. २।४।२। ४. २।४।३। ५. २।४।४। ६. २।४।५। ७. २।४।६। ८. २।५।१-११ ९. २।६।१-६। १०. २।७।१।८। ११. ३।१।८।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यद् ब्रह्मा जहाति मनस्तं जहाति यदुद्गाता जहाति श्रोत्रं तं जहाति यत्सदस्यो जहाति आत्मा तं जहाति यद्धोत्राशंसिनो जहति अङ्गानि तं जहति यच्चामसाध्वर्यवो जहति लोमानि तं जहतीति ।[१]

द्वितीयखण्डे हानेः परिणतिः कथ्यते । तत्र अध्वर्युदोषेण यजमानस्य पशोः भ्रंशः होतुरनवधाने तस्य पापसम्बद्धाऽकीर्तिः ब्रह्मणोऽनवधाने योगक्षेमहानिस्तस्य उद्गात्रनवधाने तस्य आत्मपीडा वा प्रजाहानिः ।[२]

प्राणदैवत्यो ब्रह्मा । स आत्मनोऽनवधाने जुहुयात् नमः प्राणाय वाचस्पतये स्वाहेति । वाग्देवत्या इतरे ऋत्विजः । ते च तथा सति नमो वाचे प्राणपत्न्यै स्वाहेति जुहुयुः ।[३] यज्ञ एव यज्ञस्य प्रायश्चित्तिः ।

तृतीये खण्डे ऋत्विग्वरणमुच्यते । ऋत्विजो हि द्विविधाः दैवाः (देवप्रकृतिकाः) मानुषाः (मनुष्यप्रकृतिकाः । (सत्यं वै देवा अनृतं मनुष्याः—शतपथ० १।१।१।३) अथ दैवा ऋत्विजो दैवलोकं मानुषास्तु मनुष्यलोकम् उभये उभयलोकञ्च व्याप्नुवन्ति । प्रथमं दैवानृत्विजो वृणीत मेऽग्निर्होता आदित्योऽध्वर्युश्चन्द्रमा ब्रह्मा पर्जन्य उद्गाता आकाशः सदस्यः आपो होत्राशंसिनः रश्मयश्चमसाध्वर्यव इति । ततश्च वृणीत मानुषान् ये तमग्निराधयेयुः ।[४] यजमानो राजानं यज्ञभूमिं याचेत । अग्निर्भूमिरापः श्रद्धा च देवयजनानि । प्रथमं भूमिं याचेत तत एव ऋत्विजो वरणम् । सर्वे देवयजनं दत्तेति । देवता हि ऋत्विजामेव वाग्मिदेवयजनं ददति । यदुन्नतमनूषरञ्च भूतलं बहुलायत्रौषधयो यत्र च चात्वालसारिण्य आपस्तत्र देवयजनं कुर्यात् ।[५] अथवा यत्रापि श्रद्दधानो यजते ऋध्नोतीत्येवेति ।[६]

अथ चतुर्थेऽवभृथधर्मा उच्यन्ते । यज्ञावशिष्टं द्रव्यमप्सु क्षिपेकान्यत्र नयेत् ।[७] आपो वै सर्वस्यः शान्तिः प्रतिष्ठा ।[८] अन्तरेण चात्वालं चोत्करञ्च देवानां तीर्थम् । चात्वालं हि गर्तः यो हि उत्तरवेदिनिर्माणार्थं मृत्तिकाहरणेन भवति । देवतीर्थेनैव प्रविशेत् निर्गच्छेच्च । निर्गमनकाले रक्षोहनमवभृथसामगेयम् । गाने अहावः अहाव इति स्तोमान् कुर्यात् । सामाश्रयमन्त्रस्य प्रथमः पादः 'अग्निष्टपतिः प्रतिदहति इति । पादे पादे स्तोमा अनुवर्तनीयाः । तस्य निधनं त्रिर्गायेत् । तद्वै सुहतं हन्ति ।[९] तद्वाऽतिच्छन्दसि भवति तच्च सप्तपदोपेतासु ऋक्षु गीयते । तस्य त्रिर्वचने एकविंशतिः पदानि त्रिः सामाह तच्चतुर्विंशतिः । चतुर्विंशतिरर्धमासाः संवत्सरः । संवत्सरः साम । तस्य संवत्सरस्य साम्नः अहोरात्राणि हिंकारोऽर्धमासाः

---

१. ३।१-१-७ । २. ३।२।१ । ३. ३।२।२ । ४. ३।३।१-३ । ५. ३।३।४-११ ।
६. ३।३।२५ । ७. ३।४।१ । ८. ३।४।२ । ९. ३।४।३-१५ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रस्तावो मासाः आदिः ऋतवः उद्गीथः पौर्णमास्यः प्रतिहारोऽष्टका उपद्रवोऽमावास्या निधनमिति । पञ्चभक्तिपक्षे तस्य साम्नो वसन्तो हिंकारः ग्रीष्म प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमन्तो निधनमिति ।[१] प्राची दिग्देवानां दक्षिणा पितृणां प्रतीची मनुष्याणामुत्तरा नक्षत्राणामिति यस्यां दिशि भूयिष्ठा स्रवन्त्यश्चापः स्युस्तत्र स्नानार्थं गच्छेत् ।[२] स्थावरासु शैवलयुक्तासु तु न स्नायात् तथाकरणे यज्ञो विक्षुब्धो भवति ।[३]

पञ्चमे अभिचारादिसंश्रिता विष्टुतयः कथ्यन्ते । अभिचरन् स्तुवीत ।[४] एवमेव षष्ठसप्तमाष्टमनवमेष्वपि ।

अथ चतुर्थेऽध्याये द्वादशाहादिस्तुतिः । तत्रप्रथमे खण्डे पञ्चविंशब्राह्मणोक्तद्वादशाहविविक्तव्यूढद्वादशाहयज्ञस्यधर्माः प्रोक्ताः । तत्र प्रथमत्रिरात्रसम्बन्धीपवमानः स्वरितान्तः । छन्दस्तु गायत्री । (यथा पञ्चविंशे स्वारमु स्वरेण । ११।५।२६ ।) द्वितीयत्रिरात्रो निधनान्तः छन्दस्तु त्रिष्टुप् ।[५] प्राणो वै गायत्री वीर्यं वै त्रिष्टुप् । तृतीयस्त्रिरात्र इडाऽन्तः छन्दस्तु जगती । पशवो वा इडा ।[६] न च प्रथमदिने विनियुक्ताया गायत्र्याः द्वितीयतृतीययोरह्नोः प्रयोगात्तस्या यातयामत्वं शङ्क्यं प्रथमस्यत्रिरात्रस्य विस्तीर्णच्छन्दस्त्वात् यथा प्रातःसवनस्य गायत्री माध्यन्दिनसवनस्य त्रिष्टुप् तृतीयसवनस्य जगतीति । तेन छन्दोभेदेनैवायं त्रिरात्रोऽयातयामः ।[७] द्वितीयत्रिरात्रोऽप्ययातयामः छन्दोवैभिन्न्यात् आदौ त्रिष्टुप् माध्यन्दिनसवने जगती तृतीयसवने गायत्रीति ।[८] एवमेव तृतीयोऽपि आदौ जगती माध्यन्दिनसवने त्रिष्टुप् तृतीयसवने गायत्रीति ।[९] द्वादशाहे तिसृष्वेकं साम गीयते तद्विकृतिभूते व्यूढद्वादशाहे तु चतसृष्वेकं साम एव ।[१०] तत्र उदयनीयेऽह्नि यः पशुरालम्भ्यस्तेनातिरिच्यते स ऐन्द्राग्नः ब्रह्मवर्चसकामाय सौर्यः आग्नेयो वा ।[११]

द्वितीयतृतीयचतुर्थपञ्चमखण्डेषु श्येनादिनामकाश्चत्वारोऽभिचारयज्ञा उक्ताः । अभिचरन् श्येनेन यजेत ।[१२] श्येनो वा वयसां क्षेपिष्ठः । तत्र त्रिवृतः पवमाना भवन्ति । त्रिवृद् वै स्तोमानां क्षेपिष्ठः । वषट्कारणिधनं भवति । उभे वृहद्रथन्तरे भवतः । यं कामयेत क्षीयेतेति तस्य वृहत्पृष्ठं कुर्यात् । यञ्च न प्रतितिष्ठेदिति कामयेत पवमाने रथन्तरं कुर्यात् ।[१३] सोमग्रहणानन्तरं होमात्पूर्वं पशोः सादनम् । तत्र बैभीतक इध्मः । लोहितोष्णीषा लोहितवाससो निवीता ऋत्विजः प्रचरन्ति । यथोत्साहमेकैकस्मै ऋत्विजे नववर्गाः दक्षिणा ।[१४]

---

१. ३।४।१६-२४ । २. ३।४।२५-३३ । ३. ३।४।३४ । ४. ३।५।१ । ५. ३।५।५ । ६. ३।५।५-६ । ७. ३।५।७ । ८. ३।५।८ । ९. ३।५।९ । १०. ३।५।१२-१३ । ११. ३।५।१७-२१ । १२. ४।२।१-२ । १३. ४।२।३-१४ । १४. ४-३।१५-२३ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिवृतोऽग्निष्टोमस्येषु विष्टुतिं कृत्वाऽभिचरन् यजेत भ्रातृव्यस्य जिघांसुः ।

सन्देशाख्ययागेनाभिचरन् यजेत भ्रातृव्यस्य बधाय ।[२] अभिचरन् वज्राख्य-यागेन यजेत शत्रुंजिघांसुः ।[३]

षष्ठे खण्डे वैश्वदेवाख्यत्रयोदशाहयागविमर्शः । तत्र अतिरात्रश्चतुर्विंशतिस्तोमयुतः प्रायणीयमहरिति आद्ये द्वे अभिजिदाद्यो विश्वजिदन्तो नवरात्रः महारात्रमतिरात्र इत्येते अन्तिमे अहनीति ।[४]

अथ पञ्चमाध्यायस्य प्रथमे खण्डेऽग्निहोत्रप्रशंसा । तपस्तप्यमानस्य प्रजापतेर्मनः देवान् सृजेयमिति प्राजायत ततो देवा असृज्यन्त । स हि देवान् दिवाऽसृजत् । दिवासृष्टत्वात्ते देवाः दीप्तिमन्तः । नक्तमसुरानसृजत् । यदसूर्यं नक्तं तेन तेऽसुराः प्रकाशरहिताः । यत्पीतत्वं कव्यस्यामृतस्य पातृत्वं येषां ते पितरः तेन देवाश्चासुराश्चोभौ प्राजापत्याः । देवाः स्वर्गकामास्तपोऽतप्यन्त । तप्यमानानां तेषां रसोऽजायत पृथिवी अन्तरिक्षं द्यौश्च, ताश्चातप्यन्त । तप्यमानानां तेषां रसोऽजायत ऋग्वेदो यजुर्वेदः सामवेद इति । तेऽपि वेदा अभ्यतपन् । तप्यमानानां तेषां रसोऽजायत गार्हपत्याग्निः दक्षिणाग्निः आहवनीयाग्निश्च । तेऽप्यग्नयोऽभ्यतपन् । तप्यमानानां तेषां रसत्वेन पुरुषोऽजायत सहस्रशीर्षा सहस्राक्षः सहस्रपात् । स एव पुरुषो यज्ञः । यद्गार्हपत्यं प्रादुष्करोति सादीक्षणीयेष्टिः । यादेव च दक्षिणाग्निं प्रादुष्करोति सा प्रायणीया । यत्समिधोऽप्यादधाति सेष्टिः उपसदः ।[५] यदि हि उत्पवनेन संस्कृतमाज्यं स्कन्दति सा स्कन्ना नाम आहुतिः यया यजमानः मरणशीलो भवति । तदर्थं स गोरूपां दक्षिणां दद्यात् प्रायश्चित्तार्थम् । यदि चानुत्पूतमाज्यं स्कन्दत्यसौ अस्कन्ना नामाहुतिः यया यजमानस्य चित्तं विनाशि भवति । तत्प्रायश्चित्तार्थं विविधानि द्रव्याणि देयानि ।[६] यद्गार्हपत्ये जुहोति तत्प्रातःसवनं यच्च दक्षिणाग्नौ तन्माध्यन्दिनं सवनम् यच्चाहवनीये तत्तृतीयसवनमिति ।[७] यन्मार्जयते सोऽस्यावभृथः । यस्याग्निर्मथ्यमानो न जायेत तदा लौकिकाग्निमाहृत्यापि जुहुयात् तस्याऽप्यभावे विप्रहस्ते अजस्य कर्णे कुशस्तम्बे अप्सु वा जुहुयात् ।[८] स्वयमेवोपतिष्ठेताग्निहोत्रम् । असम्भवे पुत्रः शिष्यो वा । हौम्यशेषं दक्षिणा । एतेन सर्वैर्यज्ञक्रतुभिरिष्टं भवति ।[९] यतो हि प्रजापतिरेतत्सत्रं सहस्रसंवत्सरमसृजत । स च पुनः सहस्रसंवत्सरं गवामयने (एकवर्षसाध्ये यज्ञे) गवामयनं द्वादशाहे यज्ञे तञ्चातिरात्रे तञ्च षोडशिनि तञ्च उक्थ्ये तञ्चाग्निष्टोमे तञ्चेष्टिपशुबन्धयोस्तौ चाग्निहोत्रेऽवारुन्धत् । तेन

१. ४।३।१-२ । २. ४।४।१-२ । ३. ४।५।१।८ । ४. ४।६।१ । ५. ५।१।१-६ ।
६. ५।१।७-८ । ७. ५।१।९ । ८. ५।१।१२ । ९. ५।१।१३-१६ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

योऽग्निहोत्रं जुहोति तेन यज्ञक्रतुभिरिष्टं भवति।[१] अग्निहोत्रे हि अन्नहविषां दानमुदयनीयाख्य कर्मण उदवसानीयस्य च समाप्त्यै भवति।[२] तेनाज्येनैवाग्निहोत्रं जुहुयात्।

तृतीये खण्डे औदुम्बरी विधिः प्रोक्ता। यजमानो हि अछिद्रमूलां ग्रन्थिरहितां स्थूलमूलामेकाधिकशाखारहितामौदुम्बरींमुच्छ्रयेत्। उच्छ्रयणासम्भवे प्रच्छेदनमपि। ऊगु दुम्बरः ऊर्गन्नम् अन्नं साम। तेन सामगेभ्यः पूजा कारयितव्या।[३]

चतुर्थे तु यूपनिर्देशः। यूपं करोति स्थूलं सक्षीरं मूले बालाग्रमनुरूपञ्च।[४] यूपस्याष्टौ अश्रीः करोति।[५] दिक्षु चतस्रो विदिक्षु चतस्र इति। पञ्चदशसप्तदशैकविंशत्यरत्नि वा[६] यूपं कुर्यात् पालाशं पुष्टिकामस्य बैल्वं ब्रह्मवर्चसकामस्य औदुम्बरमन्नाद्यकामस्य खादिरं बलकामस्य बैभीतकं राजवृक्षं वा भ्रातृव्यवतः यशस्कामस्य क्रमुकाश्वत्थपाषाणाः पशुकामस्य यत्किञ्चिद्यज्ञियम्।[७] गडुलो व्रणिलो व्यावृत्तः कुठिः कुब्जः शूलो दग्धः शुष्कः सुषिरो घुणजग्धः इत्यप्रस्ताः। तत्र गडुलो ग्रन्थियुक्तः व्रणिलः पश्वादिकृतव्रणोपेतः व्यावृत्तः विरुद्धावृत्तः कुठिः मुण्डः कुठिलो वा कुब्जो वक्राग्रः शूलस्तीक्ष्णाग्रः दग्धो दावाग्निना शुष्को नीरसः सुषिरः सनालः घुणजग्धः कृम्यादिभक्षितः। शुद्धावर्ता अनुपूर्वसमाः प्रशस्ताः। अग्निः पूर्वायां यमो दक्षिणायां वरुणः पश्चिमायां सोम उत्तरायां विदिक्षु आदित्यरुद्रमरुद्रसवः उर्ध्वायां साध्या अपराजिताः पितरश्चाधरायामिति यूपस्य अश्रिदैवतानि।[८] सर्वदैवत्यो वै यूपः। यूपो वै बहुरूपो वज्रीभूत्वा देवानुपतिष्ठते।[९] तस्यर्तवः शरीरं शिरः संवत्सरः वेदा रूपाणि संवत्सर एव प्रतितिष्ठति।[१०]

पञ्चमे हि खण्डे सन्ध्याविषयः। असुराद् भीतः आदित्यः प्रजापतिमुपाधावत्। तस्य प्रजापतिः ऋतं सत्यं ब्रह्म ओङ्कारं त्रिपदां गायत्रीं च भेषजमपश्यत्। तस्माद् ब्राह्मणोऽहोरात्रस्य संयोगे सन्ध्यामुपास्ते सज्योतिषि आज्योतिषां दर्शनात्। सोऽस्याः कालः। सा सन्ध्या। यत्सायमासीनः सन्ध्यामुपास्ते। तत्र यदपः प्रयुङ्क्ते ता विप्रुषो वज्रीभूत्वाऽसुरानपाघ्नन्ति। यः सायं प्रातश्च सन्ध्यामुपास्ते तया वीरस्थानं स्थानञ्च सन्ततमविच्छिन्नं भवति।[११]

षष्ठे खण्डे चन्द्रमसः क्षयवृद्धयोर्विनिर्णयः। शुक्लाख्ये पूर्वपक्षे वै देवाः सोमपानाय दीक्षिता भवन्ति तेऽपर पक्षे सोमं भक्षयन्ति। तेषां पृथिव्यन्तरिक्षं द्यौश्च पात्राणि। तत्र देवा आदित्याः दिव्येन पात्रेण प्रथमं पञ्चकलं पिबन्ति।

---

१. ६।२।१। २. ५।१।११। ३. ५।३।१-६। ४. ५।४।१। ५. ५।४।३। ६. ५।४।५। ७. ५।४।६। ८. ५।४।९। ०. ५।४।१०। १०. ५।४।१८। ११. ५।५।१४।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्तरिक्षेण पात्रेण रुद्रा द्वितीयं पञ्चकलं पिबन्ति पृथिव्या पात्रेण वसवस्तृतीयं पञ्चकलं पिबन्ति इति ते पञ्चदशीं भक्षयन्ति। ततोऽवशिष्यते षोडशी कला। षोडशकलो वै चन्द्रमाः। स ओषधीश्च वनस्पतीश्च गाश्च पशूंश्चादित्यञ्च ब्रह्म च ब्राह्मणाश्चानुप्रविशति। तं देवाः सोमया असोमपाश्च सोममभिलक्ष्य तादृश-सोमवतीं रात्रिं वसन्ति सहैव। तेन साऽमावास्या अमा इति सह वसन्त्यस्यामिति। तस्मादमावास्यायां नाध्येतव्यमिति।[1] क्षीणञ्च तमोषधीभ्यः वनस्पतिभ्यो गोभ्यः पशुभ्यश्चादित्याश्च ब्राह्मणश्च ब्राह्मणाः संनयन्ते इति संभरणम्।[2] स ध्याता या पूर्वा पौर्णमासी सानुमतिश्चतुर्दशीविद्धा। योत्तरा सा राका। पूर्वा अमावास्या सिनीवाली योत्तरा सा कुहूः। कलान्यूनेऽनुमतिः राका यदि सम्पूर्णः। यत्र चन्द्रोदृश्येत सा सिनीवाली। चन्द्रो हि कुहूनंपश्यति।[3]

सप्तमे खण्डे स्वाहानिरूपणम्। स्वाहा हि सत्यसम्भूता ब्रह्मणो दुहिता ब्रह्मप्रकृता लातव्यसगोत्रा त्रीण्यक्षराणि स्वहाः। एकं पदम्। शुक्लपद्म सुवर्णेतित्रयो वर्णाः चत्वारो वेदाः शरीरम् षडङ्गान्यङ्गानि ओषधिवनस्पतयो लोमानि द्वे चास्या शिरसी अमावास्या पौर्णमासी च चक्षुश्चन्द्रादित्यौ आज्यभागौ हुतम् दक्षिणा प्रावरणं बृहद्रथन्तरञ्चेति द्वे सामनी बाहू ऋग्यजुः साम गतिः। सा स्वाहा। सैषा देवयज्ञेषु वषट्कारभूता प्रयुज्यते पितृयज्ञेषु तु स्वधाभूता। तस्या अग्निर्देवतं ब्राह्मणो रूपम् सा हि प्रजापतिपरिग्रहः।[4]

षष्ठेऽध्यायेऽद्भुतशान्तिः। प्रथमे खण्डे सामान्यादद्भुतशान्तिः। पालाश-समिद्भिः अष्टोत्तरसहस्रं जुहुयात्। मन्त्राश्च ऐन्द्रयाम्यवारुणधानदाग्नेयवायव्य-सौम्य वैष्णव्येत्यष्टौ। एतान्यष्टोत्तरशतं जपित्वा स्वस्तिं वाचयेत्। तत्र होममन्त्राः—

ऐन्द्रो यथा—इन्द्रायेन्द्रो मरुत्वते (सा० ४६२)
याम्यो यथा—नाकेसुपर्णमुपयत्पतन्तम् (सा० ३२०)
वारुणो यथा—घृतवती भुवनानाम् (सा० ३७८)
धानदो यथा —अभित्यं देवं सवितारमोण्योः (सा० ४६४)
आग्नेयो यथा—अग्निदूतं वृणीमहे (सा० ३)
वायव्यो यथा—वात आ० वातु भेषजम् (सा० १८४)
सौम्यो यथा—सोमं राजानं वरुणम् (सा० ९१)
वैष्णव्यो यथा—इदं विष्णुर्विचक्रमे (सा० २२२)
जपमन्त्राश्च यथा—स्वस्तिदा विशस्पतिः (ऋ० १० १५२ २)

---

१. ५।५।१-२। २. ५।६।३। ३. ५।६।३-६। ४. ५।७।१-३।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिदं (ऋ० खि० २।४।१)
त्यमुषु वाजिनं देवजूतम् (ऋ० १०।१७६।१)
आयुर्विश्वायुः (ऋ० १०।१७।४)
शतं जीव शरदो वर्धमानः (ऋ० १०।१६१ ४) इति।
ततः सम्भाराणामुपस्थापनं कृत्वा स्वस्ति वाचयेत् स्वस्ति ह्यस्य भवति।[1]

द्वितीये शत्रुकृतोपद्रवशान्त्यै होमः तृतीये ऐन्द्राद्भुतशान्तिः याम्यनिमित्तशान्तिः पञ्चमे वारुणनिमित्तशान्तिः षष्ठे वैश्रवणनिमित्तकशान्तिः सप्तमे अग्निनिमित्तकशान्तिः अष्टमे वायुनिमित्तकशान्तिः नवमे सोमदेवतानिमित्तकशान्तिः दशमे वैष्णवाद्भुतशान्ति एकादशे रुद्रनिमित्तकशान्तिः द्वादशे सूर्यनिमित्तकशान्तिश्तत्र तत्र विशेषो निरूपितः।

इत्थं हि षड्विंशब्राह्मणं ह्यकतः पञ्चविंशब्राह्मणस्य परिशिष्टमपरतः स्वयमपि मौलिकमहत्त्वावहम्। सामब्राह्मणेषु ब्राह्मणस्यास्य द्वितीयं स्थानम्।

३. सामविधान ब्राह्मणम्

सामविधानब्राह्मणं हि स्वरूपतः सामब्राह्मणान्तरैः सह साम्यमावहन्नपि विषयदृष्ट्या नितान्तमेव भिन्नप्रकृतिकम्। ग्रन्थेऽस्मिन् सन्ति त्रयः प्रपाठकाः प्रतिप्रपाठकं कतिपये खण्डाश्च। तत्र प्रथमे प्रपाठकेऽष्टौ द्वितीयेऽपि तावन्त एव तृतीये तु नवेति समुदिताः पञ्चविंशतिः खण्डाः। तत्र प्रथमप्रपाठके क्रमशः सप्त द्वे षट् अष्टौ नव तिस्रः चतस्रः द्वे इति द्विचत्वारिंशत्मूलकण्डिकाः सन्ति। एवमेव अष्टादश द्वादश एकादश त्रयोविंशतिः षोडश नव षोडश पञ्चदश इति दशोत्तरशतमुपखण्डास्तासाम्। द्वितीये प्रपाठके पञ्च द्वे सप्त द्वे द्वे सप्त पञ्च तिस्रः इति त्रयस्त्रिंशत्मूलकण्डिकाः सन्ति। एवमेव तासामपि एकादश त्रयः एकादश नव सप्त अष्टादश त्रयोदश अष्टौ इति अशीतिरुपखण्डास्तासाम्। तृतीये प्रपाठके चतस्रः द्वे तिस्रः तिस्रः चतस्रः तिस्रः पञ्च एका षट् इति एकत्रिंशत् मूलकण्डिकाः सन्ति। यासां त्रयोदश द्वादश सप्त एकादश अष्टौ त्रयोदश दश पञ्च दश इति नवाशीतिरुपखण्डाः। इत्थं हि ग्रन्थेऽस्मिन् सन्ति षडुत्तरशतं मूलकण्डिकाः २७९ उपखण्डाश्च।

ग्रन्थमिममधिकृत्य सायणाचार्यः कथयति—

'तत्रमहाब्राह्मणषड्विंशाख्ययोः यज्ञाधिकारिणां स्वर्गादिफल प्राप्तये एकाहाहीनसत्रात्मका महाक्रतवः सम्पादिताः। अथ

---

1. ६।१।१६।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सामविधानाख्ये तृतीये ब्राह्मणग्रन्थे तेष्वनधिकृतानां वक्ष्यमाणानामजपृश्निवैखानसादीनां तेष्वशक्तानामन्येषाञ्च शुद्धयर्थं कृच्छ्रादिप्रायश्चित्तानि तैरपहतपाप्मनां स्वर्गादिफलप्राप्तये बहुविधान्यग्न्याधानाग्निहोत्रादिप्रत्याम्नायरूपाणि सामानि विधास्यन्ते । तत एवास्य सामविधानमिति नाम सम्पन्नम् ।'

इति ।[१] अन्यत्राविहितानां साम्नां विधानमित्यस्य सामविधानमिति नामान्वर्थकम् ।

तत्र प्रथमस्य प्रथमे भूमिकाऽऽरचिताऽस्ति । तत्रोक्तं यदग्रे-सर्गादौ इदमिति प्रसिद्धं ब्रह्म एवाऽऽसीन्नापरः कश्चनः । तस्य तेजो रसोऽत्यरिच्यत । स ब्रह्मा समभवत् । तूष्णीमेव ध्यायतो ब्रह्मणो यन्मन आसीत्स प्रजापतिरभवत् । तेन हि प्राजापत्यां मन्त्रमनुधारयन्नेव मनसा जुह्वति । मनो हि प्रजापतिः ।[२] तस्य हि प्रजापतेर्द्यौं शिरः उरोऽन्तरिक्षं मध्यं समुद्रः पृथिवी पादौ ।[३] स इदं जगदसृजद्देवतिर्यङ्मनुष्यादिलक्षणम् । स च तस्य जगतः सामोपजीवनं प्रायच्छत् । तत्र योऽसौ क्रुष्टतम इव साम्नः स्वरस्तं देवा अवरेषां प्रथमं मनुष्याः द्वितीयं गन्धर्वाप्सरसः तृतीयं पशवः चतुर्थं पितरः अण्डेशयाश्च पञ्चममसुररक्षांसि षष्ठं मोषधयो वनस्पतयश्चोपजीवन्ति । तेनैवोक्तं सामैवान्नमिति ।[३]

व्याख्यातञ्च यथा सायणभरतादिभिः—

'उपांशुव्यतिरिक्ताः सर्वा वाचो मन्द्रमध्यमोत्तमभेदेन त्रिस्थाना भवन्ति । तत्र मन्द्रस्थानीया वाक् सप्तयमा क्रुष्टादि सप्तस्वरूपा । ते च क्रुष्टादय उत्तरोत्तरं नीचाः भवन्ति । तत्र प्रथमो देवानां द्वितीयो मनुष्याणां तृतीयो गन्धर्वाप्सरसां चतुर्थः पशूनां पञ्चमः पितृणांमण्डेशयानाञ्च षष्ठोऽसुर रक्षसां सप्तमः ओषधिवनस्पतीनां जीवनमिति ।'[४]

साम्नो हि ऋगस्थीनि स्वरो मांसानि स्तोभा लोमानि । स्वर एव साम्नः स्वं तदेव सुवर्णं वाक् तस्य प्रतिष्ठेति ऋचि साम प्रतिष्ठितम् ।[५]

यदा साम गीयते तदा गायत्रं बृहत्यां बार्हतं जगत्यां जागतं त्रिष्टुभि समतां चोपपद्यते । तेनैतत्साम । समा अस्मिन् छन्दांसि साम्यादिति साम्नः सामत्वम् ।[६]

क्रुष्टादिष्वपि क्रुष्टः प्राजापत्यो ब्राह्मो वैश्वदेवो वा आदित्यानामवरेषां प्रथमः साध्यानां द्वितीयोऽग्नेस्तृतीयः वायोश्चतुर्थः सौमो मन्द्रो मित्रावरुणयोरतिस्वार्थः । एताः स्वराभिमानिन्यो देवताः । तेन देवाः प्राजापत्या मनुष्या

---

१. पृ० १-२ । २. १।१ । ३. १।१।२-३ । ४. पृ० ८-१० । ५. १।१।५ । ६. १।१।५ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदित्याः गन्धर्वाप्सरसो हि साध्याः पशव आग्नेयाः पितरो वायवाः असुराः सौमा ओषधयो मैत्रावरुणा इति ।[1]

देवा हि प्रजापत्युपदिष्टैर्यज्ञक्रतुभिः स्वर्गमगच्छन् ।[2] ये चापूताः कामपरा यज्ञानधिकारिणश्च स्वाध्यायाध्ययनेन तपसा च स्वर्गं यन्ति ।[3]

द्वितीयखण्डे तपः सु कृच्छ्रविधिर्निर्दिष्टः । कृच्छ्रो हि त्रिविधः कृच्छ्र अतिकृच्छ्रः कृच्छ्रातिकृच्छ्रश्चेति । तत्र कृच्छ्रस्वरूपं वक्ष्यते ।

आदौ क्षारलवणवर्जितान् हविष्यान् प्रातराशान् भुक्त्वा तिस्रो रात्रीर्नैवाश्नीयात् । ततोऽपरं त्र्यहं नक्तं भुञ्जीत हविष्यमेव । ततोऽपरं दिनत्रयमयाचितं यद्यागतं तद्धविष्यं भुञ्जीत । ततोऽपरं त्र्यहमुपवसेत् (एतदेव कृच्छ्रं द्वादशरात्रिदिवससाध्यम् । यदि कश्चिच्छीघ्रमेव शुद्धिं वाञ्छति तदा स तत्र कृच्छ्रकाले दिवा उत्थित एव तिष्ठेत् रात्रौ उपविशेत् किन्तु शयनोत्थाने न कुर्यात् । स हि सत्यं वदेत् न सम्भाषेतानार्यैः । रौरवयौधाजयाख्ये द्वे सामनी (पुनानः सोम धारया सा० ५११) इति नित्यं गायेत् । त्रिष्वपि सवनेषु प्रातर्माध्यन्दिन तृतीयाख्येषु आपोहिष्ठायाभिः । आपो हिष्ठा इत्यादितिसृभिः ऋग्भिः स्नायात् । ततः प्रतिदिनं 'नमोऽहमाय' इत्यादिभिरुदकतर्पणम् एतैरेवादित्योपस्थानमेतैरेवाज्याहुतयश्च । द्वादशरात्रस्यान्ते स्थालीपाकं श्रपयित्वा जुहुयात् 'अग्नये स्वाहा' इत्यादिभिः । ततो ब्राह्मण तर्पणं कुर्यात् 'नमोऽहमाय' इत्यादिभिः ।

अतीत्य कृच्छ्रमित्यतिकृच्छ्रः । तत्रायमेव विशेषो यद् दिवाभोजनेवा नक्तभोजनेऽपि यावत्प्रमाणमेकवारमाददीत तावदेवा श्नीयात् । अन्यत् सर्वं कृच्छवत् ।

कृच्छ्रातिकृच्छ्रे अन्भक्षः एव तिष्ठेत् । आप एव भक्षोयस्य स अन्भक्षः । कृच्छ्रेण शुचिः पूतः कर्मण्यो भवति । अतिकृच्छ्रेण महापातकेभ्यः प्रमुच्यते । कृच्छ्रातिकृच्छ्रेण सर्वस्मादप्येनसः प्रमुच्यते । कृच्छ्रत्रयाचरणेन सर्वेषु वेदेषु स्नातो भवति सर्वेषु देवेषु ज्ञातो भवति ।[4]

तृतीयखण्डे स्वाध्यायाध्ययनं निरूप्यते । स्वाध्यायार्थी आदौ अन्ते वा 'कमनीयं फलं मेऽस्तु' इति वदेत् । कृच्छ्रैः पूतः अग्निं प्रतिष्ठाप्य तदभावे उदकं वा आदित्यमुपसमाधाय दर्भानुपस्तीर्य दर्भेष्वासीनः प्राक्कूलेषु उदक्कूलेषु वा दक्षिणेन पाणिना दर्भमुष्टिं गृहीत्वा प्रथमं त्रिवर्गं । अग्न आ याहि वीतये' (साम १.१.) इत्यतः उत्पन्नं सामत्रयं प्रत्येकं नववारं गायेत् । एतेन अग्निस्थापना

---

१. १।१।५ । २. १।१।६ । ३. १।१।७ । ४. १।२।२ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

फलमवाप्नोति अर्थात् आहिताग्निर्भवति।[1] ततो पवमानहवींषि पठेत् 'इन्द्राय पवते मद' इति। एतेनैव कल्पेन 'सुवर्मंहा' 'सुवर्मंय' इत्येताभ्यां दर्शपूर्णमास साधनाध्ययनप्रयोगः। भृत्यातिथिशेषभोजीस्यात्। काले दारानुपेयात्। कर्मान्ते व्रीहियवतण्डुलैस्त्रीः प्रक्षालितैर्होमः। अयं संवत्सरव्रतानामध्ययननियमः। पाञ्चरात्रिकाणां (पञ्चरात्रनिर्वत्याध्ययनानां) तु व्रीहियवौ भोजनं ग्रासनियमेन। अन्ते त्वग्न्यादिरुक्तः कल्पः।

काम्यानामपि प्रयोगो नैव विरुद्धः।

'तमिन्द्रं वाजयामसि' इति ऋच्युत्पन्नेन सामचतुष्टयेन चातुर्मास्यफलमवाप्नोति। त्रातारमिन्द्रं यजामहे इत्येताभ्यां पशुबन्धमवाप्नोति। पयोमात्रवृत्तिः सन् वृहदिन्द्राय गायतेति सामचतुष्टयेन अविकृतचरका विकृतकोकिलाख्यौ सौत्रामण्यौ।[2]

चतुर्थे हि साप्तरात्रिकाणां विशेषः उक्तः। येषामध्ययनं सप्तरात्रनिर्वर्त्यं ते साप्तरात्रिकाः। तेषांभैक्षं पयो वा व्रतम्। स हि भिक्षार्थमेव ग्रामं प्रविशेन्नान्यथा। स्वाध्यायान्नान्यत्र वाचमुत्सृजेत्। अधः शयीत। अप्सु न प्रविशेत्। शेषमग्न्यादिकं पूर्ववत्। अनुसवनं हि 'ईङ्खयन्ती इत्यस्यामुत्पन्नं सामदशकं रथन्तरं वामदेव्यञ्च गायन् अग्निष्टोममवाप्नोति। यज्ञायज्ञा वो अग्नय इत्यस्यामुत्पन्नेन सामचतुष्टयेन प्रतिसवनं प्रयुञ्जानोऽग्निष्टोममवाप्नोति। 'नमस्ते अग्न ओजस' इत्यस्यामुत्पन्नेन सामदशकेन अनुशवनं गीतेन उक्थ्यमवाप्नोति। 'पुनानः सोम धारया' इत्यस्यामुत्पन्नेन साससमूहेनानुसवनं प्रयुक्तेन षोडशिनमवाप्नोति। परीतो षिञ्चता सुतम्' इति अस्यामुत्पन्नेन सामसमूहेन अनुसवनं प्रयुक्तेनातिरात्रम्। पयोव्रतवान् एतेनैव कल्पेन 'तिस्रो वाच उदीरत' इत्यस्यामुत्पन्नेन सामसमूहेन अनुसवनं प्रयुक्तेन वाजपेयम्। एतेनैव योगेन मासं प्रयुक्तेन आ व इन्द्रं कृमि यथा' इत्यात्यामुत्पन्नेन सामदशकेन अनसवनं प्रयुक्तेन आप्तोर्यामाणम्। एवमाद्या अनेके योगास्तत्र निरूपिताः।

पञ्चमे प्रायश्चित्तविवेकः कथितः। यत्र विशेषोऽनभिहितस्तत्र बलवन्तः सामर्थ्योपेताः कृच्छ्रादितर्पायुक्ताः मन्त्राः प्रायश्चित्तार्था भवन्ति। आपन्नः प्रायश्चित्तं चरेत्। साम्नामभ्यासः शत्तबारावृत्तिपर्यन्तं दशावरम्।

अश्लीलभाषणे 'दधिक्राव्णो अकारिषम्' इति सकृत् जपेत्। सामान्यजनस्य परुषभाषणे 'इदं विष्णुर्विचक्रमे' इति। ब्राह्मणमुक्त्वा त्रिर्जपेत्। गुरुजातीयानुक्त्वा तान् प्रसाद्य पक्षिणीं रात्रिमुपोष्य तवाहं सोम सरणेति प्रथममेकविंशतिकृत्वः। उपाध्यायमातृपितृपक्षे तु त्रिरात्रमुपोष्य अस्यैव साम्नोऽन्त्य-

---

१. १।३।२। २. १।३।३-८।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भागमेकविंशति कृत्वो जपेत्। अनध्यायाध्यापने सप्तरात्तमुपोष्य सदा गावः शुचयो विश्वधायसः इति साम एकविंशतिकृत्वो गायेत्। अयाज्ययाजने दक्षिणास्त्यक्त्वा मासं चतुर्थे काले भुञ्जानः कानी इत्येतत् एकविंशतिकृत्वो गायेत्। अमेध्यदर्शने अमेध्यघ्राणे च ये ते पन्था अद्यौ दिव इति सकृद् गायेत् कामतश्चेत्त्रिरात्रम्। अभोज्यभोजने अमेध्य प्राशने वा निष्पुरीषीभावेन त्रिरात्रावरमुपवसन 'एतोन्विन्द्र स्तवाम शुद्धम्' इति पूर्वभागं सदा सहस्रकृत्व आवर्तयन् शुद्धो भवति।

बहून्यप्युपपातकानि कृत्वा त्रिभिरनशनत्पारायणैः पूतो भवति।

सुरां पीत्वा संवत्सरमष्टमे काले यावत्पाण्यो सम्भवति तावदेव भुञ्जानः कटिमात्रवस्त्रः दिवा रात्रौ वा त्रिः स्नात्वा अहनि स्थित्वा रात्रावासीनो न तु शयानः 'पवित्रं ते' इत्युत्तरेण अहोरात्रं जपन् ग्रामद्वारे एव वसन् स्वकर्म ख्यापयन् चतुर्णां ब्राह्मणानामग्रतः प्राश्नन् पूर्णे संवत्सरे केशश्मश्रुलोमनखानि वापयित्वा स्वस्त्यादि वाचयित्वा पूतो भवति। एवमेव भ्रूणहत्यायामपि।[1]

ब्राह्मणस्वं हृत्वा मासमुदकसमीपे वासो दिवा चतुर्थकाले भोजनं व्रतान्ते 'शुक्रं तेअन्यद्यजतं' ते अन्यद्यजतं ते अन्यदित्येतद् गायेत्।

अन्यस्य स्वं हृत्वा कृच्छ्रं चरन् 'अयं सहस्रमानव इति द्वितीयं साम गायेत्।

गुरुदारान् गत्वा सुराकल्पेन व्रतं चरन्नन्ते 'अक्रान्त्समुद्रः इति गायेत्।

ब्राह्मणदारान् गत्वा त्रीन् कृच्छ्रांश्चरन् ब्रह्म जज्ञानमिति पूर्वभागं पठेत्।

अन्यस्य दारान् गत्वा कृच्छ्रं चरन् अरण्योः इत्येतद् गायेत्।

शूद्रां गत्वा त्रिरात्रमुपवसन् 'इडामग्न' इत्येतत् पठेत्।

अकाले दारानुपेत्य त्रीन् प्राणायामानायम्य 'कयानामा' इति द्वितीयमावर्तयेत्।

एवमेव सप्तमाष्टमयोः खण्डयोरपि विविधपापानां प्रायश्चित्ता उक्ताः। राज्ञः प्रतिग्रहग्रहणेऽन्यस्यायात्रस्य ग्रहणे अदत्तादाने ब्राह्मणताडने हनने च राजन्यवैश्यहनने शुद्रहनने गोहनने इतरप्राणिहनने अवकीर्णे (ब्रह्मचारी यदि स्त्रियं गच्छेत् सोऽवकीर्णः) परिवेदने अयोनौरेतः सेचने शूद्रवृत्तिग्रहणे रसविक्रये उभयत्रोदन्तपशुविक्रये अदत्तकन्योद्वाहे दु स्वप्नदर्शने अन्यस्मिन्ननाज्ञाते अग्निदग्धे

---

१. १।५।१-३।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मूषिकजग्धे कूर्चनाशे ऽन्यास्मिन्ननाज्ञाते पुत्रभृत्यादिमनुष्यपीडने गवामभिघातेऽश्वाभिघाते च प्रायश्चिता उक्तास्तत्र।

द्वितीये प्रपाठके काम्यानां कर्मणां विवेकः। तस्य प्रथमं सूत्रम् 'ऽथातः काम्यानाम्' इति।[1] काम्यानामिति आयुरादिकामसाधकानामिति।

तत्रान्यथानिर्देशाभावे प्रथमतस्त्रिरात्रमुपवासः पुष्यचन्द्रमस्यारम्भश्च। अबोध्यग्निरित्यादिको योऽरिष्टवर्गस्तस्य एकस्यानेकस्य सर्वेषां वा प्रयोगेण शतं वर्षाणि जीवति।

भ्राजाभ्राजे इत्यादिपवित्रवर्गस्य प्रयोगेण पूतो भवति। तवस्याावीयस्य साम्नः प्रयोगेण ब्रह्मलोकमवाप्नोति। उदुत्तमं वरुणपाशमित्येतत् सदा प्रयुञ्जानः संबाधं न निगच्छति निगतुश्चप्रमुच्यते। संबाधश्च व्याध्यादिना।

गौरसर्षपान् तुचे तुनाय तत् सु न इत्यनेनाभिमन्त्य प्राशने दीर्घायुर्भवति। 'पिवा सोमम्' 'इन्द्र मन्दतु' इत्येताभ्याम् त्रिरभिमन्त्य त्रीनुदकाञ्जलीन् पिवेत्। तेन दीर्घायुर्भवति।[2]

द्वितीये खण्डेऽस्य बाल मृत्युनिवारणयोगाः उक्ताः प्रथमम्। ततश्च रक्षोगृहीतस्य प्रयोगः रोगशान्तिप्रयोगश्चोक्तस्तत्र।[3]

तृतीयेऽस्य खण्डे क्षुद्ररोगशान्तिप्रयोगः प्रथमः द्वितीयत्वेन तस्यैव प्रयोगान्तरं तृतीयः सर्पभयपरिहारोपायः ततः शस्त्रभयनिवारणयोगः ततो बह्वन्नकामप्रयोगः सर्वत्रान्नकामस्य भिक्षोः प्रयोगः तदनन्तरं पिपासाभावेच्छोः प्रयोगः जने मरणाभावप्रयोगः क्षयरोगनिवारणप्रयोगः विषमरणाभावप्रयोगः निर्विषीकरणप्रयोगश्च क्रमशो वर्णिताः।[4]

चतुर्थे खण्डे क्षेमकामिनः प्रयोगः मार्गागतभयनिवारणप्रयोगः शत्रूदपगमोपायः दैवाद्युत्थितभयनिवारणप्रयोगः प्रस्थितस्य सक्षेमं पुनरागमनप्रयोगः अहर्निशं स्वस्त्ययनकामस्य प्रयोगः जरामृत्युजयप्रयोगः इति निरूपितविषयाः।[5]

पञ्चमे वशीकरणविषयः। तत्र प्रथममेकपुरुषवशीकरणप्रयोगः तस्यैव प्रयोगान्तरम् अनेकपुरुषावर्तनप्रयोगाः सर्वंवशीकरणप्रयोगश्चात्र प्रपञ्चिताः।[6]

षष्ठे प्रथमं सौभाग्यकामप्रयोगः तस्यैव प्रयोगान्तराणि अभीष्टाया वशीकरणप्रयोगः वेश्यानां प्रव्रजितानाञ्च वशीकरणप्रयोगः ईप्सितकन्यालाभप्रयोगः शत्रूच्चाटनप्रयोगः यशस्कामप्रयोगः तस्यैव प्रयोगान्तरमिति वर्णितविषयाः।[7]

---

१. २।१।१। २. २।१।१-५। ३. २।२।१-२। ४. २।३।१-७। ५. २।४।१-२।
६. २।५।१-२। ७. २।६।१-७।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सप्तमे ब्रह्मवर्चसकामप्रयोगः श्रद्धाकामप्रयोगः सकृच्छ्रु तस्याभिधान-सामर्थ्यप्रयोगः तस्य प्रयोगान्तरम् तस्यैव पुत्रादीनां बाल्ये प्रयोक्तुकामस्य प्रयोगः तस्यैव प्रयोगान्तरम् वादकथासु श्रेष्ठत्वप्राप्तिप्रयोगः सभायामुत्तरदान-सामर्थ्यप्राप्तिप्रयोगश्चेति विषयाः सप्रपञ्चं निरूपिताः।

अष्टमे पुत्रार्थिनां प्रयोगः तस्यैव प्रयोगान्तरम् बह्वनुचरकामस्य प्रयोगः इति विषया निरूपिताः।

तृतीयस्य प्रपाठकस्य प्रथमे खण्डे धनसाधनविधानानि निरूपितानि। तत्र श्रीकामस्य प्रयोगः तस्य प्रयोगान्तरम् अलक्ष्मीनोदनप्रयोगः तत्र प्रयोगान्तरम् हिरण्यार्थप्रयोगः धान्यार्थप्रयोगः सहस्रसङ्ख्यादिहिरण्यलाभप्रयोगः तत्र प्रयोगान्तरम् इति विषयाः प्रपञ्चिताः।

द्वितीयेऽस्य खण्डे सहस्रधनार्थिनः प्रयोगः गोकामस्य प्रयोगः ग्रामकामस्य प्रयोगः हिरण्यादिकामिनां प्रयोगः अनन्तश्रीकामस्य प्रयोगः लक्ष्मीकामस्य प्रयोगः तस्य प्रयोगान्तरम् सहस्रधनकामिनः प्रयोगः तत्र प्रयोगान्तरम् इत्येते विषयाः प्रपञ्चिताः। तत्र हि यथा भूयस्तथा श्रेयः।

तृतीयखण्डे गोसमृद्धिसाधनप्रयोगः पश्वादिस्वबाहुल्यकामस्य प्रयोगः द्रोणपरिमितहिरण्यार्थप्रयोगः दिव्यभोगार्थिनो बह्वनुचरार्थिनश्च तत्साधनप्रयोग-द्वयम् असुरभोगार्थिनो बहुपुरुषार्थिनश्च तत्साधनप्रयोगः अथातो वास्तुप्रयोगः इति विषयाः निरूपिताः।

चतुर्थे तु खण्डे इष्टदर्शनार्थप्रयोगाः स्वप्नविषयप्रयोगः तत्र प्रयोगान्तरम् जाग्रद्विषयप्रयोगः तत्र प्रयोगान्तरम् सिद्धचसिद्धिकारणप्रयोगः तत्र प्रयोगान्तरम् भाविमहाफलसिद्ध्युपाय ज्ञानम् कार्याणां फलसिद्धिभावाभावपरीक्षोपायः जयपराजयपरिज्ञानोपायः चिरकालजीवनपरिज्ञानोपायः इति विषयाः।

पञ्चमेऽस्य खण्डे पुरोहितकर्तव्यराज्याभिषेकप्रयोगः तत्साधनद्रव्याणि तत्र कामनाभेदेन मन्त्रभेदः अथाद्भुतशान्तिः अभिचारशान्तिः प्रयोगः तत्र प्रयोगान्तरम् इत्येते विषयाः।

षष्ठे खण्डे युद्धजयार्थिनो राज्ञः प्रयोगः संनाहमन्त्रकथनम् रथयोजन-मन्त्रम् चक्राधिष्ठानाभिमर्शनमन्त्रम् राज्ञो रथारोहणम् इषुक्षेपणविधिः तत्र प्रयोगान्तरम् मुख्यसप्तपुरुषवधकामस्य प्रयोगः शत्रोरभिचारप्रयोगः एकपुरुषाभि-चारप्रयोगः तत्रप्रयोगान्तरम् इत्येते निरूपितविषयाः।

---

१. २।७।१-५।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथाऽत्र सप्तमे खण्डे भाविजन्मसु अज्ञानाभावकामिनां प्रयोगः अग्नेः स्वाधीनप्रयोगः पिशाचानां स्वाधीनदर्शनप्रयोगः पितृदर्शनप्रयोगः गन्धर्वाप्सरसां दर्शनार्थप्रयोगः इन्द्रादिदर्शनार्थप्रयोगः दिव्यनिधिदर्शनसाधनप्रयोगः पार्थिवनिधिदर्शनप्रयोगः भूतवशीकरणलभ्यधनसाधनप्रयोगः जन्मकारव्यभूतविशेषाणां वशीकरणप्रयोगश्चेति विषयाः ।

अष्टमे पुनर्जन्माभावकामस्य प्रयोगः तदुपासनसाधनं मन्त्रं तत्र प्रयोगाश्च निर्दिष्टाः ।

नवमे खण्डे स्वेच्छया लोकान्तरगमनकामस्य प्रयोगः तत्र प्रयोगान्तरम् राजभोगकामयमानस्य प्रयोगः दिव्यभोगकामसाधनम् त्रैलोक्याधिपत्यं कामयमानस्य प्रयोगः अनादिष्टसाम्नां यथाश्रुति फलमुन्नेयम् सामविधानस्य सम्प्रदायपरम्पराकथनम् अध्ययनाधिकारिकथनम् चेति विषयाः ।

> 'सोऽयं प्राजापत्यो विधिस्तमिमं प्रजापतिर्बृहस्पतये प्रोवाच बृहस्पतिर्नारदाय नारदो विश्वक्सेनाय विश्वक्सेनो व्यासाय पाराशर्याय व्यासः पाराशर्यो जैमिनये जैमिनिः पौष्पिञ्ज्याय पौष्पिञ्ज्यः पाराशर्यायणाय पाराशर्यायणो बादरायणाय बादरायणस्ताण्डिशास्त्रायनिभ्यां ताण्डिशास्त्रायनिनौ बहुभ्यः ।'[1]

इति ।

तदिदं शास्त्रमनूचानाय ब्रह्मचारिणे समावर्तमानायैवाख्येयमिति ग्रन्थसमाप्तिः ।

४. आर्षेयब्राह्मणम्

आर्षेयं हि ब्राह्मणं सामवेदस्य चतुर्थं ब्राह्मणं कौथुमशाखासम्बद्धम् । ऋषीणां समूह आर्षेयम् । ऋषीणां नामधेयगोत्रच्छन्दो-देवतादिवाचकेन च शब्देन साम्नां वाच्यत्वज्ञानमस्य प्रतिपाद्यविषय उक्तमेव मूले यथा—

> 'अथ खल्वयमार्षः प्रदेशो भवति ।'[2]

अनेन ब्राह्मणेन प्रतिपाद्योऽर्थः आर्षः ऋषिसम्बन्धी प्रदेशः इति ।

> 'ऋषीणां नामगोत्रोपधारणम्'[3]

इति । फलञ्चास्य प्रवृत्तिनिमित्तकम्—

> स्वर्ग्यं यशस्यं पुण्यं धन्यं पुत्र्यं पशव्यं ब्रह्मवर्चस्यं स्मार्तमायुष्यम् ।

---

१. ३।९।३।२ । २. १।१।१ । ३. १।१।२ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति ।[१]

तेनाऽस्याध्ययनमपि प्राक्प्रातराशिकमिति ।[२] अस्याध्ययनेन स्वाध्याय-फलमुपजीवति च । भवति चाभिनन्दितः प्रतिनन्दितो मानितः पूजितश्च ।[३]

ब्राह्मणेऽस्मिन् सन्ति षडध्यायाः तेषु आद्याः पञ्च खण्डेषु विभक्ताः । खण्डाश्च कण्डिकासु । तत्रप्रथमेऽध्याये सन्ति त्रयोदश खण्डाः यत्र क्रमशः १७ ११ ११ १३ ११ १० ८ १० ८ १० ६ १० ८ इति १३१ कण्डिकाः । द्वितीयेऽध्याये द्वादश खण्डाः यत्र क्रमशः ११ १० १० ११ १० ११ १० ९ १० ९ ८ ७ इति ११६ कण्डिकाः सन्ति । तृतीयेऽध्याये द्वादश खण्डाः यत्र ११ १० १० ११ १० १० १० १० १० ९ १० १० इति १२१ कण्डिकाः । चतुर्थेऽध्यायेऽपि द्वादशैव खण्डाः यत्र ८ १० १० ९ ८ १० ९ ८ ९ ७ १० १० इति ९८ कण्डिकाः सन्ति । पञ्चमेऽध्याये एकादश खण्डाः यत्र १० ८ ९ १४ ९ ८ १० ९ १२ १० ७ इति १०६ कण्डिकाः । षष्ठोऽध्यायस्तु पर्वसु विभक्तः । तत्र सन्ति चत्वारि पर्वाणि पर्व च खण्डेषु विभक्तम् । तत्र प्रथमपर्वणि षट् खण्डाः यत्र ४ १० ११ ७ ३ १८ इति ५३ कण्डिकाः द्वितीय पर्वणि सप्त खण्डा यत्र ५ ५ ५ ५ ५ ४ ४ इति ३३ कण्डिकाः तृतीयपर्वणि सप्तखण्डाः यत्र ६ ६ ६ ९ ६ ५ ३ इति ४१ कण्डिकाः चतुर्थपर्वणि द्वौ खण्डौ यत्र ६ १५ इति २१ कण्डिका इति समुदिताः अध्यायेऽस्मिन् १४८ कण्डिकाः ग्रन्थेतु ७२० कण्डिकाः ।

प्रथमाध्याये प्रथमखण्डे आदौ ग्रन्थारम्भः 'अथ खल्वयमार्षः प्रदेशो भवति'[४] इति सूत्रेण । ग्रन्थस्यास्य विषयः आर्षः ऋषिसम्बन्धी । आर्षश्च ऋषीणां नामधेयगोत्रे मन्त्राणां छन्दोदेवते ।[५] अस्याध्ययनं स्वर्गप्राप्तिसाधकं कीर्त्युत्पादकं पुण्यप्रदं पुत्रपशुहितसाधकं ब्रह्मवर्चससाधकं स्मृति हेतुभूतआयुष्करञ्चेति तत्र प्रवृत्तिः ।[६] अस्याध्ययनं दिवाभोजनात्प्रागेव कर्तव्यम् ।[७] अस्योपधारको हि एकैकस्य ऋषेः दिव्यं वर्षसहस्रमतिथिर्भवति तैरभिनन्दितः प्रतिनन्दितो मानितः पूजितश्च स्वाध्यायफलञ्च लभते ।[८] ऋष्यादिज्ञानस्यापरिहार्यतां दर्शयत्तत्रोक्तं यदविदित सम्बद्धार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण या खलु यजते याजयति अध्या-पयति वा स पापीयान् भवति भवन्ति चास्य छन्दांसि यातयामानि । तत्र ऋषिर्मन्त्र-द्रष्टा छन्दो गायत्र्यादि दैवतमग्न्यादिकं ब्राह्मणं विनियोजकवाक्यम् यथा ॐ तत्सवितु-रिति गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता जपे विनियोगः । ज्ञातै-तच्चतुष्टयस्य भवन्ति छन्दांसि अयातयामानि सफलानि श्रेयः साधकानि च ।[९] तेषां

---

१. १।१।३ । २. १।१।४ । ३. १।१।५ । ४. १।१।१ । ५. १।१।२ । ६. १।१।३ । ७. १।१।४ । ८. १।१।५ । ९. १।१।६ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वेदिता हि ऋषीणां समानस्थानो भवति ब्रह्मणश्च स्वर्गे लोके महीयते सुचिरम् ज्ञातश्च पूर्वजन्मस्मृति लभते ।[1] भवति च स पङ्क्तिपावनोऽर्घ्यंश्च ।[2] एवं ज्ञाता मृद्विकारे पात्रे न भुञ्जीत तथाकरणे नास्यायुर्विनश्यति न च तेजश्च रिष्यते ।[3]

अत ऊर्ध्वमुपदेशः । ओमिति एतत्प्राजापत्यस्य परमेष्ठिनो ब्राह्मणस्य परमेष्ठिनो वा ब्रह्मणो ब्रह्मवाचो वा साम ।[4] इदं हि सत्यसाम अयातयामाक्षरस्थं वेदस्याध्यायनं देवानामोकः स्वर्गस्य द्वारोद्घाटनमपि ।[5]

हिंकारो वासिष्ठो वसिष्ठेन दृष्टः प्राजापत्यो देवसम्बन्धी च ।[6] गायत्रं साम पुष्कलदृष्टत्वात्पौष्कलमग्निसम्बद्धम् । इदं हि प्रथमायां गेयम् प्रथमस्वरैर्वा चतुरक्षरबृद्धान्तैः । ओंकारान्त आद्यपात् प्रस्तावः हुम् आ इति अन्तरतोभः । आ वा ।[7]

सामवेदच्छन्दः साम्नाञ्च बहवः ऋषयः । ऋगाश्रितत्वेन नानासामानि गीतानि । तत्र सामगाने अभितो गौतमस्य पर्कौ कश्यपस्य बीर्हष्यमध्यमम् । पर्क इति दर्शनार्थे तेन गौतमस्य पर्कं इति गौतमेन दृष्टः बर्हिर्यज्ञः तत्र साध्यमिति बर्हिष्यम् । तेन कश्यपस्य बर्हिष्यमिति कश्यपेन दृष्टमिति । गौतमस्य प्रथमे पर्के चतुर्थस्वरादिकं साम द्वितीये तु चतुर्थमन्द्रस्वरादिकम् । कश्यपस्य बर्हिष्ये चतुर्थमन्द्रस्वरादिकम् । यथा—

'अग्न आ याहि वीतये' इति ऋगंशः

अग्ने आ याहि वीतये (साम०)

गौतमस्य पर्कः

ओग्नाई । आयाही ऽ ३ । वोइतोया ऽ २ इ । तोया ऽ २ इ ।

कश्यपस्य बर्हिष्यम्—

अग्न आयाही वी । तया इ ।

गौतमस्य पर्कः

अग्न आयाहि । वा ऽ५ इतयाइ ।

तेन ह्यत्र सामत्रयमुत्पन्नम् । एवमेव सुपर्णेन दृष्टं सौपर्णमेकं विश्वमनसा दृष्टं वैश्वमनसं बृहद्भारद्वाजं बृहदाग्नेयं बृहत्सौरं वा त्रीणि श्रौतर्षाणि औशनेव शैरीषं च (औशने अभितः शैरीषं मध्यमं शैरीषेवोत्तरे सर्वाण्यौशनानि सर्वाणि शैरीषाणि वा । इन्द्रस्य सावगं वार्त्रघ्नञ्चेति द्वे शौनःशैपेः साकमश्वस्य

१. १।१।७ । २. १।१।८ । ३. १।१।९ । ४. १।१।११ । ५. १।१।१२ । ६. १।१।१३ । ७. १।१।१४-१६ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सम्बन्धिनी द्वे सामनी काण्वस्य वत्सस्य द्वे सामनी वैश्वानरस्याग्नेरेकं साम वाध्र्यश्वस्य अनूपस्यैकम्[१] अग्नेः संवर्गः वैश्वमनसम् श्नामाश्नौष्टीये द्वे सामनी वैश्वामित्रम् अग्नेर्जराबोधीये द्वे सामनी रुद्रस्य वा मारुतमेकम् भार्गवेद्वेऔर्वस्य द्वे अत्रेरासङ्गः प्रजापतेर्निधनकामम् ।[२]

सैन्धुक्षितानि त्रीणि अग्नेर्हरसी द्वे इहवद् वामदेव्यं तृतीयम् यामे द्वे अग्ने रक्षोघ्ने द्वे वैश्वमनसम् अग्नेरार्षेयम् सोमसाम गौपवनम् सूर्यस्य द्वे वसुरोचिषः क्रावं सूर्यवचसो द्वे पारावतस्य वसुरोचिषो द्वे काशीतस्य वसुमन्दस्य च द्वे द्वे गोराङ्गिरशस्य द्वे गौतमस्य मनाज्ये ।[३]

इत्यादयः सहस्रवर्त्मनः सामवेदस्य सहस्राधिकाः सामगानप्रकारास्तत्र दर्शिताः। अन्वर्थसंज्ञकमिदं ब्राह्मणं साम्नां हि द्रष्टॄन् ऋषीन् परिचाययति। भाष्यकारेण सायणाचार्येण तत्र तत्रोदाहरणान्यपि संयोज्य व्याख्यातमस्ति। यथा—

"लोशम्"

इति सूत्रम् ।[४] तत्र—

प्रति प्रियतमम् (सा० ४१८) इत्यत्रैकं साम। प्रतिप्रियतमं (ग्राम० ११-७-४१८·१) इति क्रुष्टद्वितीयादिकं लोशमेतन्नामधेयं साम।

इति।

५. देवताऽध्यायब्राह्मणम्

देवताऽध्यायाख्यं ब्राह्मणं हि सामवेदस्य कौथुमशाखासम्बद्धं पञ्चमं ब्राह्मणम्। लघुकायमिदं ब्राह्मणं चतुर्षु खण्डेषु विभक्तमस्ति। तत्र हि—

प्रथमे देवता साम्ना बहुधा परिकीर्तिताः।
द्वितीये छन्दसां वर्णास्तेषामेव च देवताः।
तृतीये तन्निरुक्तिश्चेत्येवं खण्डार्थसङ्ग्रहः।
इति खण्डशो विषयविवरणं सायणभाष्ये सङ्कलितम्।[५]

तत्र प्रथमे खण्डे षड्विंशतिः द्वितीये द्वादश तृतीये चतुर्विंशतिश्चतुर्थे पञ्चेति सन्ति सप्तषष्टिः कण्डिकाः।

---

१. १।२।१-११। २. १।३।१-११। ३. १।४।१-१३। ४. ४।७।९। ५. पृ० २।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्र हि प्रथमे खण्डे साम्नां देवतानिर्देशः। तस्येदं प्रथमं सूत्रम्—

'अग्निरिन्द्रः प्रजापतिः सोमः वरुणस्त्वष्टाऽङ्गिरसः
पूषा सरस्वतीन्द्राग्नि।'

इति।[1] इत्येता सामदेवताः। आर्षेयब्राह्मणे प्रतिपादितं यद् ज्ञातार्षेयच्छन्दो दैवत ब्राह्मणेनैव मन्त्रेण यष्टव्यं याजयितव्यमिति।[2] तत्रार्षेये ऋषयः उक्ताः प्रकृते तु दैवतच्छन्दसी उच्येते। तत्र प्रथम दैवतान्युच्यन्ते साम्नमित्यस्य फलितोऽर्थः। तानि च दैवतानि अग्निः इन्द्रः प्रजापातिः सोमः वरुण त्वष्टा आङ्गिरस पूषा सरस्वती इन्द्राग्नी चेति। तत्र हि यानि हि सामानि इडानिधनानि पदनिधनानि ईकारणिधनानि च तानि अग्निदैवतानि।[3] निधन नाम साम्नः अन्त्यो भागः पाञ्चभक्तिकस्य साप्तभक्तिकस्य वा। तत्रोच्यते हिंकारप्रस्तावोद्गीथप्रतिहारनिधनानि पञ्च भक्तयः। आदिमुपद्रवञ्चादाय सप्तसङ्ख्या भवति भक्तीनाम्। उभयेऽपि निधनमन्त्यो भागः। सर्वत्र साम्नां चतुर्विधं निधनं स्वरो निधनमिडा वागिति। इडानिधनानि यथा कालेयरौरवादीनि। बाह्याक्षरनैरपेक्ष्येण ऋगन्य पदान्येव यत्र निधनस्थानानि तानि पदनिधनानि यथा यौधाजयसंहितादीनि। ईकारनिधनानि महावत्समहावैराजादीनि। उक्तत्रिविधनिधनानि सामानि अग्निदैवतानि। निधनादित्रितयव्यतिरिक्तस्य स्वर इति रूढ्या नामधेयम्। अग्निदैवतेतराणि सर्वाणि निधनवन्ति सामानि ऐन्द्राणि।[4] किन्तु सर्वाणि स्वरनिधनानि सामानि प्राजापत्यानि।[5] स्वर्यमाणमृगन्याक्षरं हाइकारश्च स्वरनिधनम्। यथा वामदेव्यम् हाइकारयुक्तम्। स्तोभरहितानि केवलऋङ्मात्रयुक्तानि सामानि सोमदेवताकानि।[6] यथा औशनकावे। सर्वाणि वाङ्निधनानि वारुणानि वरुणदेवताकानि[7] यथा यज्ञायज्ञियम्। अक्षरमनुस्वर्यते येषु तानि अक्षरानुस्वाराणि त्वाष्ट्राणि।[8] यथा वारवन्तीयं चाभीवर्तश्च।

स्वः पृष्ठानि आङ्गिरसानि अधिसोमास आथव इत्यादिषु गीतानि। स्वर्विधनानि पौषाणि।[9] यथा काशीवदैवोदासादीनि। वाङ्निधने सारस्वते।[10] 'यथा कयानश्चित्र आ भुवद्' आ पवस्वं सहस्त्रिणम् इति।

'य आनयत्परावतः इत्यैन्द्राग्ने। 'सुतं रयिष्ठा सहो रयिष्ठा' इति आग्नेयैन्द्रे।[11]

वसवो रुद्रा आदित्या विश्वे देवाः। तत्र वसूनां स्वाराणि रुद्राणां निधनवन्ति आदित्यानामैडानि विश्वेषां देवानां वाङ्निधनानि।[12]

---

१. १।१। २. १।१।६। ३. १।२। ४. १।३। ५. १।४। ६. १।६। ७. १।८। ८. १।१०। ९. १।२३। १०. १।२४। ११. १।२६। १२. १।३५।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथा भूयस्त्वेन प्रदेशा वर्तन्ते इत्यन्तराणि।[1] अन्तराणि हि सर्वाणि आग्नेयानि ऐन्द्राणि।[2] अथवा सर्वाण्यन्तरतमानि ब्राह्माणि।[3]

ऋग्वै माता साम पिता स्वरः प्रजापतिरित्युपनिषद्।[4]

अथ द्वितीये खण्डे छन्दसां वर्णा उच्यन्ते।
शुक्ला गायत्र्यो रूपेण सारङ्भं रूपमुष्णिहाम्।
पिशङ्गं ककुभां रूपं कृष्णमानुष्टुगं ततः।
रोहितं वृहतीनां तु नीलं पाङ्क्तं ततः परम्॥
सुवर्णं त्रिष्टुभां रूपं गौरं जागतमुच्यते।[5]
अतो यान्यन्यानि छन्दांसि श्यावं तेषां ततः पुनः।
नकुलं त्वेकपादानां द्विपदां बभ्रुरुच्यते।
सारङ्गशुक्लकृष्णरूपाणि ऋग्यजुः सामब्राह्मणान्वितानि।[6]
विराजः पृश्नयो वर्णाः।[7]

अथ छन्दसां दैवतम्।

अग्नेर्गायत्री उष्णिहां सविता अनुष्टुभां सोम उक्थानां महस्वान् वृहत्याः वृहस्पतिः विराजो मित्रावरुणौ इन्द्रस्त्रिष्टुभ अतिच्छन्दसः प्राजापत्याः विच्छन्दसो वायुदेवताः द्विपदानां पुरुषः एकपदानां ब्रह्म पङ्क्तिर्वसुदेवत्यका इति।[8]

तृतीये खण्डे निर्वचनमुच्यते। तत्र 'अथातो निर्वचनम्' इति सूत्रम्।[9]

तत्र गायत्रो गायति दैवतमिति। गायतो मुखादुदयतदिति गायत्री।[10]

उष्णिगुत्स्नानात् स्निह्यतेर्वा कान्तिकर्मणि उष्णीषिणीत्यौपमिकम्।[11]

ककुप् ककुदरूपिणीत्यौपमिकम्।[12] कुजतेर्वा उज्जतेर्वा अनुस्तोभनादनुष्टुप्।[13] अन्वस्तौदिति वा।[14]

पेलतेर्गतिकर्मणः पिपीलिका।

वृहती वृहतेर्वृद्धिकर्मणः।[15]

पङ्क्तिः पञ्चिनी पञ्चपदा।[16]

त्रिता स्तोभतीनि त्रिष्टुभ्। त्रिवृद् वज्रःस्तस्य स्तोभिनी वेत्यौयामेकं वा।[17]

जगती गततमं छन्दो जज्जगतिर्भवति क्षिप्रगतिः। जज्जलाकुर्वन्नसृजतेति ब्राह्मणम्।[18]

---

१. १।१९। २. १।२०। ३. १।२१। ४. १।२३-२४। ५. २।२। ६. २।३। ७. २।५। ८. २।७-१०। ९. ३।१। १०. ३।२-३। ११. ३।४। १२. ३।५। १३. ३।७। १४. ३।८। १५. ३।११। १६. ३।१३। १७. ३।१४-१५। १८. ३।१७-१८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अतिच्छन्दाश्छादयतीति अत्यन्तमेव। छन्दांसि छन्दयतीति च।[१] निपूर्वाधृतेर्निचृत्। भरणाद् भूरिगुच्यते।[२]

अथातो गायत्रमाग्नेयं साम। तत्प्राजापत्यम्। तन्न यत्र गीयते तत्र गेयमेव।[३]

१ र र र र
तत्सवितुर्वरेणियोम्। भर्गोदेवस्य धीमाही २।
२ ३र र २ १ १ २ २ १ १
धियोयोनः प्रचो १२१२। हुम्। आ २। दायो। आ ३ ४ ५।।१।।

गानेनानेन सुपुण्यवान् भवति जातश्च पूर्वजातिं स्मरति। गायत्र्याः शिरो ब्रह्मा ललाटं द्यौः चन्द्रादित्यौ चक्षुषी मुखमग्निः जिह्वा सरस्वती। त्वष्टा ग्रीवा वसवश्च रुद्राश्च बाहू उरो वायुः रोमाणि पादवः। पृष्ठमिन्द्रः विष्णुर्नाभिः प्रजापतिर्जघनम् उरू मरुतः वेदाः पादौ स्मितं विद्युत् श्वसितं वायुः अस्थीनि पर्वताः समुद्राः वासांसि नक्षत्राणि अलङ्काराः।[४]

ब्रह्म सत्यञ्च पातु माम्।[५]

इतीत्थं हि देवताध्यायब्राह्मणं साम्नां दैवतविषये छन्दसाञ्च वर्णदैवतविषये प्रकाशमादधाति। वस्तुतस्तु ब्राह्मणमिदमार्षेयाख्यस्योत्तरभाग एव।

६. संहितोपनिषद् ब्राह्मणम्

संहितोपनिषत्ब्राह्मणं हि सामब्राह्मणग्रन्थेष्वन्यतमम्। सायणाचार्यनिर्दिष्टक्रमेणेदं सामवेदस्य सप्तमं ब्राह्मणम्। अत्र हि पदानामत्यन्त संश्लेषेणोच्चारणं संहिता परः सन्निकर्षः संहिता (पा० १.४.१०९) इतिवत्। ननु 'गीतिषु सामाख्या' इति मीमांसादर्शने यथा सूत्रितं[६] तन्न्यायेन साम्नः केवलगानात्मकत्वात् पदाभावेन कथं संहिता भवति चेदुच्यते साम्नः सप्त स्वराः भवन्ति क्रुष्टप्रथमद्वितीयतृतीयचतुर्थमन्द्रातिस्वार्या इति। तथैव मन्द्रमध्यमताराणीति त्रीणि वाचः स्थानानि भवन्ति। एतेषां यः सन्निकर्षः सा संहिता। उपनिषदिति रहस्यवाची शब्दः। तेन संहितायाः यद्रहस्यं तस्य बोधकत्वेनेदं संहितोपनिषदिति संज्ञितम्।

सा संहिता त्रिविधा देवासुरर्षिभेदात्। तत्र या सर्वेषां परोक्षत्वेन एकान्ते अधीयते अथवा परोक्षे पारलौकिकं फलमुद्दिश्य या पठ्यते सा सर्वपरोक्षा

---

१. १।१८-१९। २. १।२१। ३. ३।२२-२३। ४. ४।१। ५. ४।५। ६. २।१।३६।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवसंहिता भवति[१] या हि सर्वश्राव्यत्वेनाधीयते अथवा प्रत्यक्षं फलमुद्दिश्याधीयते सा सर्वप्रत्यक्षा असुरसंहिता[२] या च कुत्रचित्परोक्षा क्वचित्तु प्रत्यक्षा सा ऋषिसंहिता[३] भवति। देवसंहिता अतीन्द्रिया उपांशुजप्या भवति असुरसंहिता इन्द्रियविषया शिरोगतेन स्वरेण पठ्यमाना भवति उभयलक्षणा हि ऋषिसंहिता मध्यमस्वरेण पठिता। आद्या भवति स्वर्ग्या द्वितीया पशव्या तृतीया तु ब्रह्मवर्चससाधिका।[४] आसामेव रहस्यमत्रोद्घाटयते।

ब्राह्मणेऽस्मिन् सन्ति पञ्च खण्डाः। तत्राद्ये एकविंशतिः द्वितीये चतुर्विंशतिः तृतीये त्रयोविंशतिः चतुर्थे चतुर्दश पञ्चमेऽपि त्रयोदश इति पञ्चनवतिः कण्डिकाः सन्ति।

तत्र प्रथमे खण्डे आर्चिकाधिकार उक्तः। तदनुसारेण प्रथमतः संहिता भवन्ति त्रिविधा देवसंहिता असुरसंहिता ऋषिसंहिता चेति। तत्र उपांशुपठनीयत्वात्सर्वपरोक्षा देवसंहिता पारलौकिकफलसम्बद्धा स्वर्ग्या। सर्वश्राव्या ऐहिकफलप्रदा उच्चैः पठनीया पशव्या असुरसंहिता मध्यमस्वरपठनीया क्वचित्सर्वश्राव्या क्वचित्परोक्षा ब्रह्मवर्चसाभिवर्द्धिनी ऋषिसंहिता।[५]

देवहूः वाक्शवहूः अमित्रहूरिति एतास्तिस्रः संहिता भवन्ति।[६] या हि मन्द्रस्वरेण पठ्यते सा देवहूः। देवान् ह्वयति आह्वयतीति देवहूः। यस्तथाऽधीते तस्य देवा हवं गच्छन्ति।[७] या हि म्लानाक्षरा रोदनसदृशी भवति सा वाक्शवहूः। वाग्भिरुच्चरितस्वरैः शवमत्यन्ताशुभं ह्वयतीति वाक्शवहूः। एतादृशी हि क्षिप्रविनाशाय भवति।[८] याच आक्रोशनमिव नितरांक्रन्दनमिव पठ्यते सा अमित्रहूः अमित्रमनिष्टं ह्वयतीति अमित्रहूः। अनया पठितया सर्वविध समृद्धिहानिः सञ्जायते।[९] या ही अदीनतया सम्पूर्णा संसृष्टा संयता वाक् सा पुत्र्यपशव्या या च मध्यायिनी सम्पूर्णा संसृष्टा संयता। या तु गुल्मीभूता भ्रुसंसृष्टा असंयता सा हानिप्रदा।[१०]

अथैतास्तिस्रः संहिता भवन्ति शुद्धा अदुःस्पृष्टा अनिर्भुजा चेति या स्नानाचमनशुद्धासनादिपुरस्सरमधीयते सा शुद्धा। अस्थानोच्चारितस्वरव्यञ्जनाद्यैर्वर्णैर्याऽधीयते सा दुस्पृष्टा तद्विपरीता अदुःस्पृष्टा। उक्तमेव।

अष्टौस्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च।

---

१. १।२। २. १।३। ३. १।४। ४. १।६-८। ५. १।१-८। ६. १।३। ७. १।१०। ८. १।११। ९. १।१२। १०. १।१४।१६।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कण्ठ्यौ अहौ इचुयशास्तालव्या ओष्ठजौ उपू।
मूर्धन्याः स्युः ऋटुरषाः दन्त्या लृतुलसाः स्मृताः।
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठो वः स्मृतोबुधैः।
एऐतु कण्ठ्यतालव्याः ओऔ कण्ठोष्ठजौस्मृतौ।

इति। या हि जानुबाह्यनिर्गतभुजद्वयेन हस्तद्वयेन अधीयते सा निर्भुजा तद्विपरीता अनिर्भुजा जानूपरिस्थापितेन हस्तद्वयेन प्रयुज्यमाना।[1] तत्र शुद्धा सर्वकामप्रदा भवति द्वितीया तृतीया च।[2]

अथैता अपि तिस्रोभवन्ति संहिताःअवृद्धा सर्ववृद्धा उत्सेधपरोक्षवृद्धा चेति। तत्र एककलोनया मात्रया अधीता अवृद्ध ह्रस्वादिभेदैः यथोक्तमात्रैर्वर्णैर-धीता सर्ववृद्धा एककलाधिकया मात्रया ऽधीता उत्सेधा इति। एताश्चक्रमशः वायोरिन्द्रस्याग्नेश्च।[3] वृत्तयो हि भवन्ति तिस्रः द्रुता मध्या विलम्बिता चेति। द्रुताऽभ्यासकाले मध्या प्रयोगकाले विलम्बिताऽध्यापनकाले। तत्रापिद्रुता वायव्या मध्यमा बहिस्पत्या विलम्बिता सौरीति।

इत्थं हि प्रथमे खण्डे आर्चिकसंहिताप्रयोगविधिरुक्तः।

द्वितीये तु गानसंहिताविधिरुच्यते। तस्यायं प्रथमं सूत्रम्—

'अथैषा समापवर्तनीयेति वेदितव्या संहिता भवति' इति। गानविधावपि संहिता भवत्येव प्रस्तावोद्गीथप्रतिहाराणामविरामप्रयोगेण। एषा हि समावर्त्य समावर्त्य प्रयोक्तव्या।

लोपातिहाराः परोक्षसंहितागाने प्रयोक्तव्याः। लोपोऽनुच्चारणं स च क्वचित्सर्वपदस्य क्वचित्पदद्वयस्य कुत्रचित्तुपद त्रयस्यापि क्वचिद्व्यञ्जनस्य क्वचिद्रेफस्य क्वचित्स्वरस्य क्वचिदेकाक्षरप्रभृतेश्च। न च लोपेन ऋचामपूर्णत्वं शङ्कयंगाने तद्विशेषात्।

स्तोभा हि सर्वत्र गताः सर्वत्र निवृत्ताः सर्वत्र प्रवृत्ता अपि। सर्वत्रेति सर्वत्र देवतासु। स्तोभा हि घोषणाध्ययन विधौ सर्वत्र निवृत्ता भवन्ति प्रयोगकाले तु सर्वत्र प्रवृत्ता एव।[4] सर्वत्र चतुर्थस्वरा मन्द्रस्वराश्च प्रस्तावाः अतिस्वार्य-स्वराश्च प्रथमद्वितीयप्रथमद्वितीयतृतीयस्वराश्च।[5] स्वरवन्ति व्यञ्जनानि यथा-क्षरं दर्शयेत्।[6] रथन्तस्य स्तोभाः स्वरवन्तः प्रयोक्तव्याः।[7]

---

१. १।१७। २. १।१८। ३. १।२१। ४. २।३। ५. २।१५-१७। ६. २।१९। ७. २।२३।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवमेव तृतीये खण्डे उदात्तादिस्वरविधानमुक्तम् ।[१] ततश्च अध्ययनाध्यापनधर्मा उक्ताः । पात्रायैव विद्यां दद्यात् । यदि पात्रभूतः शिष्यो न लभ्यते तदा विद्यया सार्द्धमेव म्रियेत किन्तु अपात्रे विद्या नैवोप्या ।[२]

षट्पात्राणि विद्यावपनाय ब्रह्मचारी धनदायी मेधावी श्रोत्रियः प्रियो विद्यया वा विद्यां यः प्राह ।[३] वेदस्याष्टौ उपनिषदो भवन्ति वित्तिश्च उपस्तवश्च दमश्च श्रद्धा च सम्प्रश्नश्च अनाकाशीकरणञ्च योगश्चाचार्यशुश्रूषा चेति । तत्र विद्यतेऽनयेति वित्तिः प्रज्ञा निर्दिष्टदक्षिणादायी वा । उपस्तव आचार्यप्रशंसा । सम्प्रश्नः अधीतस्य संशयच्छेदार्थं सम्यक्प्रश्नः । उक्तमेव—

स्थाणुरयं भारहारः किलाभू—
दधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते
नाकमेति ज्ञानविधूतपाप्मा ।

इति । अनाकाशीकरणं पठितायाः विद्यायाः पात्रे एव दानम् । उक्तमेव—

पदं पादं विधां मात्रां छन्दो विज्ञाय दैवतम् ।
आर्षञ्च ब्राह्मणञ्चैव ततः साम प्रयोजयेत् ।

इति । अथ य एतैरसम्पूर्णं पश्यति स गाथादर्शीभवति ।[४]

चतुर्थे हि खण्डे सामान्यधर्मा उक्ताः । यथा दानेन सर्वान् कामानवाप्नोति चिरजीवित्वञ्च ।[५] ब्रह्मचारी रूपवानहिंस्र उपपद्यते । स्वर्ग्यं पर्णाशनात् । पयोभक्षो दिविचरो भवति । स्थानवीरासनाद् वित्तवान् । पितृमातृगुरु शुश्रूषाऽऽध्यानवान् स्वर्गी भवति । त्रीण्याहुरतिदानानि गावः पृथिवी सरस्वती च ।[६]

पञ्चमे खण्डे परिशेषविधिरुक्तः । यथाहि ब्रह्मचारी भैक्षं चरति निवेद्यं लभते । तिष्ठत्यहः शेषोऽधःशयितो भवति ।[७] पुरुषो वा ऽयमीश्वरोऽभिजायते ।[८] इत्थं हि संहितोपनिषद्ब्राह्मणं विशेषतः सामगानप्रकार निर्देशकमितरत्तु प्रसङ्गागतमेव ।

७. वंश ब्राह्मणम्

वंशब्राह्मणं हि सायणाचार्य निर्दिष्टक्रमेण सामवेदस्य अष्टमं ब्राह्मणम् । अत्र कृत्स्यसामवेदाध्येतॄणां प्रवृत्तिरुच्युत्पादनाय सम्प्रदायप्रवर्तका ऋषयः प्रदर्शिताः ।

---

१. ३।१-८ । २. ३।९-१० । ३. ३।११ । ४. ३।२२ । ५. ४।१ । ६. ४।२-१४ । ७. ५।४।५ । ८. ५।११ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्राह्मणेऽस्मिन् सन्ति त्रयः खण्डाः यत्र क्रमशः २७ ३५ १५ इति सन्ति ७७ कण्डिकाः ।

शर्वदत्ताच्छर्वदत्तः शर्वदत्तो रुद्रभूतेः रुद्रभूतिस्त्रातात् त्रातो निगडात् निगडो गिरिशर्मणः गिरिशर्मा ब्रह्मवृद्धेः ब्रह्मवृद्धिर्मित्रवर्चसः मित्रवर्चाः सुप्रतीतात् सुप्रतीतो गुप्तात् स च भवत्रातात् सोऽपि कुस्तुकात् कुस्तुकः श्रवणदत्तात् श्रवणदत्तः सुशारदात् स च ऊर्जयेतः ऊर्जयन् भानुमतः भानुमान् आनन्दजात् आनन्दजः काम्बोजात् काम्बोजो भद्रकरात् भद्रकरः स्वातेः स्वातिः सुश्रवसः सुश्रवाः प्रातरह्नात् प्रातरह्नः केतोः केतुर्मित्रविन्दात् मित्रविन्दः सुनीथात् सुनीथेः सुतेमनसः सुतेमना अंशोः ।[1]

अंशुः राधात् राधो गातुः गाता संवर्गजितः संवर्गजित् संवर्गजित् शाकदासात् शाकदासो विचक्षणात् विचक्षणो गर्दभीमुखात् गर्दभीमुख उदरशाण्डिल्यात् उदरशाण्डिल्यो मशकात् मशकः स्थिरकात् स्थिरकश्चैकितानेयात् चैकितानेयो आरिहण्यात् आरेहण्यो हि शूषात् शूषः अरालात् अरालो दृतेः दृतिरिन्द्रोतात् इन्द्रोतो वृषशुष्मात् वृषशुष्मो निकोथकात् निकोथकः प्रतिथेः प्रतिथिर्देवतरसः देवतराः शवसः शवाः अग्निभुव अग्निभूरिन्द्रभुवः इन्द्रभूर्मित्रभुवः मित्रभूर्विभण्डकात् विभण्डक ऋष्यश्रृङ्गात् ऋष्यश्रृङ्गः कश्यपात् कश्यपोऽग्नेः अग्निरिन्द्रात् इन्द्रोवायोः वायुर्मृत्योः मृत्युः प्रजापतेः प्रजापतिर्ब्रह्मणः ब्रह्मा स्वयम्भूरिति तस्मै नमः ।[2]

नयन् अर्यमभूतेः अर्यमभूतिः भद्रशर्मणः भद्रशर्मा पुण्ययशसः पुण्ययशाः सङ्करात सङ्करः पूषमित्रात् पूषमित्रः अश्वमित्रात् अश्वमित्रो वरुणमित्रात् वरुणमित्रो मूलमित्रात् मूलमित्रो वत्समित्रात् वत्समित्रो गौल्गुलवीपुत्रात् स च वृहद्वसोः वृहद्वसुर्गोभिलात् गोभिलो राधात् ।[3]

परं समानम् ।

इति वंशब्राह्मणम् इति वंशब्राह्मणम् ।

८. उपनिषद् ब्राह्मणम्

उपनिषद्ब्राह्मणं हि सायणाचार्यगणनाऽनुसारेण सामवेदस्य षष्ठं ब्राह्मणम् । अस्य हि द्वौ भागौस्तः मन्त्रब्राह्मणमुपनिषदभागश्च ।

मन्त्रब्राह्मणमेव छान्दोग्यब्राह्मणमित्यप्युच्यते । ब्राह्मणभागेऽस्मिन् द्वौ

---

१. ११-७ । २. २।१-३५ । ३. ३।१।१४ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रपाठकौ रतः प्रतिप्रपाठकमष्टौ खण्डाश्च। अत्र हि गृह्यसंस्कारादिषु प्रयोज्यानां मन्त्राणां सङ्ग्रहो विद्यते। एतद्ब्राह्मणोदिता एव मन्त्राः गोभिलादिगृह्यसूत्रेषु कर्मानुसार प्रयुक्ताः। प्रथमे हि प्रपाठके विवाहादिसंस्कारसम्बद्धमन्त्राः गोवृद्धि-प्रभृतिविषयसम्बद्धाश्च मन्त्रा उक्ताः। द्वितीये तु भूतवलि-आग्रहायणीकर्म-पिण्ड-पितृयज्ञ दैवबलिहोम-दर्शपूर्णमास-आदित्योपस्थान-नवगृह-प्रवेश-स्वस्त्ययन-प्रसाद-प्राप्त्यादीनां मन्त्राः सन्ति।

सामवेदस्य षष्ठब्राह्मणत्वेन सायणाचार्येण परिगणितमुपनिषद्ब्राह्मणं द्विधा विभक्तमस्ति मन्त्रपर्व विद्या चेति। यथोक्तं सायणीये सामवेदार्थप्रकाशे—

तत्रोपनिषदाख्यो यः षष्ठो ग्रन्थः स च द्विधा।
मन्त्रपर्व च विद्येति विद्याङ्गत्वेन पर्वणः।
यथा वेधादिमन्त्राणामस्ति विद्याङ्गता तथा।
रहस्यत्वात्तु मन्त्राणां विद्यासन्निधि पाठचता।
असूत्रयत्स्पष्टमेतद्भगवान् वादरायणः।
वेधादीनामर्थभेदादिति सूत्रेयेह चिन्त्यते।

इति।[1]

मन्त्रपर्वाख्ये मन्त्रब्राह्मणे हि सन्ति द्वौ प्रपाठकौ प्रति प्रपाठकं कतिपये खण्डाश्च। तत्र प्रथमे प्रपाठकेऽष्टौ द्वितीयेऽपितावन्त एव खण्डा मुद्रितपुस्तकेषु लभ्यन्ते। प्रथमे प्रपाठके प्रथमखण्डे पञ्चदश द्वितीये एकविंशतिः तृतीये चतुर्दश चतुर्थे नव पञ्चमे सप्तदश षष्ठे पञ्चत्रिंशत् सप्तमे षोडश अष्टमे सप्तेति समुदित-श्चतुस्त्रिंशदधिकशतं कण्डिकाः। द्वितीये प्रपाठके प्रथमेखण्डे षोडश द्वितीयेऽपि षोडश तृतीये एकविंशतिः चतुर्थे एकादश पञ्चमे अष्टादश षष्ठे एकोनविंशतिः सप्तमे पञ्च अष्टमे चतुर्दशेति समुदिताः १२२ कण्डिकाः सर्वाः समुदिताः २५६ कण्डिकाः। ग्रन्थस्यास्य भट्टगुणविष्णुकृतं छान्दोग्यमहाभाष्य सायणाचार्यप्रणीतं सामवेदार्थप्रकाशभाष्यञ्चेति भाष्यद्वयं लभ्येते मुद्रिते।

'अदितेऽनुमन्यस्व अनुमत्तेऽनुमन्यस्व सरस्वत्यनुमन्यस्व' इत्यनन्तरं
देव सवित प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥१॥

इत्यस्यादिना कण्डिका। नाम्नैव सिध्यति यद्ब्राह्मणमिदं सामवेदीय-

1. प्राक्कथनभागे।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विशिष्टमन्त्राणां सङ्ग्रह इति । भाष्यकारैश्च प्रतिमन्त्रं हि ऋषिच्छन्दो देवताविनियोगादिप्रदर्शनपूर्वकं व्याख्यायैषां ज्ञानं सरलीकृतम् । यथा—

काम वेदते नाम.........

'प्रस्तारपङ्क्तिरस्य छन्दः कामो देवता ज्ञातिकर्मणि

सुराप्लवने विनियोगः' इति ।'

मन्त्राणां विनियोगार्थत्वाद्विनियोगानामर्थाधीनत्वाच्च मन्त्रैरनुसृत्य कर्म कर्तव्यमिति कर्मसम्बद्धमन्त्राणां सङ्ग्रहोऽत्र कृतः । तत्र पर्युक्षणमन्त्राः सुराप्लवनमन्त्र उपस्थप्लावनमन्त्राः वस्त्रपरिधानमन्त्रः उत्तरीयपरिधापनमन्त्रः कन्यानयनमन्त्रः पदप्रवर्तनमन्त्रः आज्यहोममन्त्राः आशीर्मन्त्राः वैवस्वतीय होममन्त्राः । अश्मक्रमणमन्त्रा लाजाहोममन्त्रः सप्तपादाक्रमणमन्त्राः आशासनमन्त्राः जनप्रतिमन्त्रणमन्त्राः अभिषेकमन्त्रः पाणिग्रहणमंन्त्रः आशीर्मन्त्राः प्रार्थनामन्त्र । उत्तरविवाहमन्त्राः (आज्यहोमीयाः) आमन्त्रिणमन्त्रः अन्नप्राशनमन्त्रः हृदयैक्यप्रार्थना मन्त्र रथारोहणमन्त्रः चतुष्पथाद्यामनाणमन्त्राः गृहप्रवेशमन्त्रः होममन्त्रः । चतुर्थीकर्ममन्त्राः गर्भाधानमन्त्रा उदुम्बरालम्बनमन्त्राः सीमन्तोन्नयनमन्त्राः स्थालीपाकावेक्षणमन्त्राः सोष्यन्तीहोममन्त्राः व्रीहियवचूर्णप्राशनमन्त्राः सर्पिःप्राशनमन्त्रः चन्द्रदर्शनमन्त्रः नामकरणमन्त्रः मूर्धघ्राणमन्त्रः । चूडाकरणमन्त्राः । व्रतग्रहणमत्रः ब्रह्मचारिप्रकरणमन्त्रा । समावर्तनमन्त्राः सूर्योपस्थानमन्त्रा मेखलामोक्षणमन्त्राः स्रग्बन्धनमन्त्र उपानहपरिधानमन्त्रः मुखापिधानमन्त्रः रथामन्त्रणारोहण मन्त्रः । गवामनुमन्त्रणमन्त्रा । इति प्रथमप्रपाठकगतमन्त्राः ।

द्वितीये तु सर्पबलिमन्त्राः होममन्त्राः आज्यहोममन्त्राः हविःप्राशनमात्रा मुखाद्यङ्गाभिमर्शनमन्त्राः श्यामाकप्राशनमन्त्राः यवचरुप्राशनमन्त्राः आग्रहायणीकर्ममन्त्रा उपधानहोम मन्त्राः । पित्रावाहनमन्त्राः पिण्डपितृयज्ञमन्त्रा वपाहोममन्त्राः कुसीदविषयमन्त्राः स्थालीपाकहोममन्त्रा । भूम्यावाहनमन्त्राः आज्योत्पवनमन्त्रः जपमन्त्राः दर्भतृणाभ्यञ्जनमन्त्राः दर्भजूटिकाहोममन्त्राः व्रीहियवहोममन्त्रा युग्ममहाफलदानमन्त्राः आदित्योपस्थानमन्त्राः तण्डुलहोममन्त्रः तिलतण्डुलहोममन्त्राः आदित्याभिमन्त्रणमन्त्राः । अलक्ष्यय नोदनमन्त्राः इत्याद्या अन्यान्याश्च मन्त्रा द्वितीयप्रपाठके दत्ताः ।

इत्थं हि मन्त्रब्राह्मणं वस्तुत एव मन्त्राणां ब्राह्मणं ज्ञानं समूहो वा । प्रायो गृह्यकर्मसम्बद्धा इमे मन्त्राः सामवेदस्य विभिन्नशाखासम्बद्धाः ।

---

१. १।१।२ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

९. जैमिनीयब्राह्मणम्

ब्राह्मणमिदं सामवेदस्य जैमिनिशाखया सम्बद्धम् । ब्राह्मणमिदं शतपथ-ब्राह्मणवद् विपुलकायमस्ति । यज्ञयागानुष्ठानरहस्यज्ञानायेदमत्यन्तमेव महत्व-पूर्णम् ।

जैमिनीयं हि ब्राह्मणमस्ति त्रिषु काण्डेषु विभक्तं यत्र प्रतिकाण्डं सन्त्यनेके खण्डाः । तत्र प्रथमं काण्डं ३६४ खण्डेषु प्रकरणेषु वा गुम्फितमस्ति यदा द्वितीये सन्ति ४४२ प्रकरणानि तृतीये तु ३८६ प्रकरणानि इति सन्ति तत्र ११९२ प्रकरणानि । अस्य हि प्रथमं काण्डमित्थमारब्धमस्ति—

'तदाहुः केन जुहोति कस्मिन् हूयत इति ।
प्राणमेव जूहोति प्राणे हूयते ।'

इति ।[१]

ब्राह्मणमिदं प्रायो यज्ञानुष्ठानविषयसम्बद्धम् । अत्र हि अग्निहोत्रमारभ्य द्वादशरात्रपर्यन्ता यज्ञाः सप्रपञ्चं विवेचिताः । एवमेव विश्वजिदभिजितौ इतरे च यज्ञा निरूपिता अत्र । प्रकरणज्ञानायात्र प्रकरणमेकमत्रोध्द्रियते—

'अथैव त्रिष्टोमोऽग्निष्टोमः । प्रतिष्ठाकामो हैतमाहरेत । तदाहुः प्रेव वा एषोऽस्मात् लोकान् च्यवते यत्सूयते । तद्यत्त्रिष्टोमो भवति त्रयो वा इमे लोकाः एतदेव तल्लोकेषु प्रतितिष्ठति । अथो हैव धृतिरेव नाम यज्ञक्रतुः । तस्य रथन्तरं पृष्ठं भवति । तेन हैतेनाभिप्रसारणो राजा नेजे । द्विरात्रान्तं हैव चक्रे । तमु ह ब्राह्मण उवाच परा कुरवः कुरुक्षेत्रं जेष्यन्ते । प्रजामेवाहरत न क्षेत्राणीति । त एते कुरवः कुरुक्षेत्रं पराजित्य चरन्ति सल्वा एते कुरुक्षेत्रे । स वा एष क्षेत्राणामेव धृत्या ह्रियते यत्त्रिष्टोमोऽग्निष्टोमः ।[२]

आरुणिर्वाजसनेयो वर्कुवर्ष्णः प्रियो जानश्रुतेयो बुडिल आश्वतराश्विः वैयाघ्रपद्य इत्येते ह पञ्च महाब्राह्मा आसुः । ते होचुर्जनको वा अथ वैदेहोऽग्नि-होत्रेऽनुशिष्टन् स नोऽतिवदन्निव मन्यते । एत । तमग्निहोत्रं कथा वादयिष्याम इति ।

ते हाजग्मुः । ते ह ब्रह्मवादिनमूचुः प्रणो ब्रूहीति । तान् ह प्रोवाच ।[३]

ब्राह्मणेऽस्मिन् कर्मकाण्डस्य प्राधान्येऽपि ज्ञानकाण्डस्यात्र नास्ति विरलता । यथा—

---

१. १।१ । २. २।२०६ । ३. १।२२.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सैनं तं लोकं गमयति य एतस्यै यतः परं नास्ति।

अश्वमेधमधिकृत्य तत्रोक्तम्—

अथैषोऽश्वमेधः। प्रजननकामो हैतेन यजेत। प्रजापतिर्वा अकामयत-बहुः प्रजया पशुभिः प्रजायेय वीमान् लोकान् प्राप्नुयाम् अवेन्द्रियं वीर्यं रुन्धीयेति। स एतं यज्ञमपश्यन्। तमाहरत्। तेनायजत। ततो वै स बहुः प्रजया पशुभिः प्रजायत वीमान् लोकानाप्नोत् अवेन्द्रियं बीर्यमरुन्ध। स यः कामयेत बहुः प्रजया पशुभिः प्रजायेय वीमान् लोकानाप्नुयाम् अवेन्द्रियं बीर्यं रुन्धीयेति स एतेन यजेत।[२]

इत्थं हि वहुविषयं ब्राह्मणमिदं स्वप्रकृतौ ब्राह्मणान्तराणि अतिशेते। भाषस्य कठिना किन्तु विचारपूर्णा मननीया च।

★

१. ११११। २. २।२६६।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

८. आरण्यकसाहित्म्

अरण्ये पाठ्यमारण्यकमिति शिष्टाः। अरण्ये अध्येयमिति विग्रहे अरण्य-शब्दात् 'पथ्यध्यायविहारहस्तिषु' इति (वा० पा० सू० ४।२।१२९) इति अध्यायेऽर्थे वुञ्। ब्राह्मणभागस्य परिशिष्टभागरूपाणि आरण्यकानि गद्यपद्य-मयानि आरण्यकानां वानप्रस्थानामध्ययनाध्यापनस्वाध्यायपराणि यज्ञयागादि-विधिविधायकानि शास्त्राणि। वस्तुतस्तु यद्यपि वेदेषु चातुराश्रम्यं शब्दतो नैव प्रतिपादितं दृश्यते यथा अनन्तरवर्तिस्मृत्यादिषु तथापि वेदमन्त्रेष्वेतस्य सङ्केतस्तु स्पष्टतया प्राप्यत एव। 'कुर्वन्नेवेह कर्माणि' (माध्य० ४०।२) इत्येतस्याप्यय-मेवाशयो यदवस्थानुसारेण कर्तव्य तया निर्दिष्टं कर्म कुर्वन् सम्पादन्नेव जीवितुमिच्छेन्न तु केवलया जीवनेच्छयेति। ताश्चावस्थाः—

'ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमङ्गम्'[1]

इत्यादिवचनैः सङ्केतिता ब्रह्मचर्याख्या आद्यावस्था—

'येषामध्येति प्रवसन् येषु सौमनसो बहुः।
गृहानुपह्वयामहे ते नो जानन्तु जानतः'।[2]

इत्यादिभिः

भोजायाश्वं सं मृजन्त्याशुं भोजायास्ते कन्या शुम्भमाना।
भोजस्येदं पुष्करिणीव वेश्म परिष्कृतं देवमानेव चित्रम्।[3]

इत्यादिभिश्च वचनैः सङ्केतिता द्वितीया गार्हस्थ्याख्यावस्था—

'अप्सरसां गन्धर्वाणां मृगाणां चरणे चरन्।
केशी केतस्य विद्वान् त्सखा स्वादुर्मन्दिन्तमः।[4]

इत्यादिभिः

उपह्वरे गिरीणां सङ्गमे च नदीनाम्।
धिया विप्रो ऽ अजायत।[5]

---

१. ऋग्वेदे १०।१०९।५। २. माध्य० ३।४२। ३. ऋग्वेदे १०।१०७।१०। ४ ऋग्वेदे १०।१३६।६। ५. माध्य० २६।१५।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्यादिभिश्च वचनैः सङ्केतिता तृतीया वानप्रस्थाख्या प्रौढावस्था एवमेव

'यन्मे नोक्तं तद्रमतां शकेयं यदनुब्रुवे।
निशामतं निशामहे मयि व्रतं सह
व्रतेषु भूयासं ब्रह्मणा सं गमेमहि।'[1]
'वायुरनिलममृतमथेदं भस्मान्तं शरीरम्।
ॐ क्रतो स्मर क्लिबे स्मर कृतं स्मर।'[2]

इत्यादिवचनैः सङ्केतिता चतुरीयाऽऽख्या अन्तिमावस्था च। वेदेषु तत्तदवस्थाप्रतिपाद्य कर्माण्यपि तत्र तत्रोक्तानि येषां व्याख्यानभूता ब्राह्मणग्रन्थाः। ब्राह्मणस्य यो भागो ब्रह्मचर्यगार्हस्थ्ययोः कर्तव्यं प्रायेण निर्दिशति स भागो ब्राह्मणशब्देनैवाहूयते। तस्य यश्च भागः अरण्यकृत्यं ज्ञापयति स भाग आरण्यकमिति। यश्च ब्राह्मणभागस्तुरीयावस्थाकृत्यं निर्दिशति स उपनिषदिति। कल्पसूत्राणि प्रायः आद्यस्यैव भागस्य व्याख्यानानि सारसङ्क्षेपा वा।

आरण्यकाचाराः अरण्यसम्पाद्ययज्ञरहस्यमीमांसा च आरण्यकस्य प्रतिपाद्यविषयाः प्रसङ्गाद् वर्णाश्रम धर्माश्च। प्रायो हि गृहस्थस्य ब्रह्मचारिणश्च कर्माणि फलवन्ति अतएव सकामानि भवन्ति किन्त्वारण्यककर्माणि हि निष्कामानि केवलं स्वत एव प्रेयस्साधकानि भवन्ति। तेनारण्यकमतेन न केवलं देवतामुद्दिश्य द्रव्यत्याग एव यज्ञोऽपितु ज्ञानाश्रय एव। द्रव्ययज्ञो हि नात्यन्तिक सुखस्य जनकः तदुपनत स्वर्गादिफलस्य क्षयिष्णुत्वात् किन्तु ज्ञानयज्ञो हि आत्यन्तिकसुखसाधको भवितुमर्हति यदि सोऽपि द्रव्ययज्ञेनानुगतो भवेत्। अत एव ज्ञानकर्मसमुच्चय एव आत्यन्तिकसुखसाधको भवति। अर्थादारण्यके हि ज्ञानस्य प्राधान्यं भवति।

यथा हि प्रतिवेदं ब्राह्मणानि भिद्यन्ते तथैव आरण्यकान्यपि। तेन आरण्यकानां सङ्ख्याऽपि तावत्येव भवितुमर्हति यावती वेदसंहितानाम्। किन्तु सम्प्रति तु पञ्चषाण्येव आरण्यकानि समुपलभ्यन्ते यथा ऋग्वेदसम्बद्धम् ऐतरेयारण्यकम् शाङ्ख्यनारण्यकञ्चेति द्वे शुक्लयजुर्वेदस्य वृहदारण्यकम् कृष्णयजुर्वेदस्य तैत्तिरीयारण्यकम् सामवेदस्य तवलकारारण्यकमित्येव। अथर्ववेदस्य तु न आरण्यकं सम्प्रत्यपि ज्ञातम्। सामसंहितायाः षष्ठोऽध्याय आरण्यनाम्ना ज्ञायते तदगतगे-

१. ऋक्परिशिष्टे मेधासूक्ते ४। २. माध्य० ४०।१५।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यञ्चारण्यगेयमिति। माध्यन्दिनीयसंहितायाः पञ्चत्रिंशोऽध्यायोऽपि ग्रामाद्-बहिरेव पठनीय इति परम्परा। अथैतेषां संक्षिप्त परिचयोऽत्रप्रस्तूयते प्रसङ्ग-सिद्धयै।

ऋग्वेदस्य शाकलसंहितया सम्बद्धमैतरेयारण्यकं पञ्चविभागैर्निबद्धम्। तत्र प्रथमे पञ्च द्वितीये सप्त तृतीये द्वौ चतुर्थे एक एव पञ्चमे त्रय इति सर्वैः सम्भूय अष्टादशाध्यायाः सन्ति। अध्यायाश्चनिस्पूताः कतिपयैः खण्डैः। तत्र प्रथमाध्याये गवामयनमहाव्रतयोः प्रातर्माध्यन्दिनतृतीयसवनानाञ्च वर्णनमस्ति। द्वितीये चतुरध्यायादारभ्य षडध्यायपर्यन्तमेतरेयोपनिषद् अवशिष्टाध्यायेषु उक्था-दिविवेचनम्। तृतीये हि निर्भुजप्रगुणसंहिता भेदकथनपूर्वकं स्वरस्पर्शोष्मवर्णानां चर्चा। चतुर्थे महानाम्न्यृचां सङ्कलनम् पञ्चमे महाव्रतसवनविवेचनं नैष्कैवल्य-विवेचनञ्च। एषु आद्यानां त्रयाणामेतरेयो महीदासश्चतुर्थस्य आश्वलायनः पञ्चमस्य शौनकाचार्यः प्रचारकाः।

ऋग्वेदस्य वाष्कलशाखासम्बद्धं हि शाङ्खायनारण्यकं कौषीतकिनाम्नाऽपि ख्यातम्। अत्र सन्ति पञ्चदशाध्यायाः १३७ खण्डाश्च।

शुक्लयजुर्वेदस्य हि माध्यन्दिनसंहिताया माध्यन्दिनारण्यकं काण्व-संहितायाः वृहदारण्यकमिति प्रसिद्धम् आरण्यक द्वयम्। अनयोर्न भूयान् भेदः। वृहदारण्यकं हि शतपथब्राह्मणस्य चतुर्दशकाण्डस्य चतुर्थाध्यायादारभ्य ग्रन्थाव-सानपर्यन्तं लभ्यते। अत्र सन्ति षडध्यायाः यत्र क्रमशः चत्वारः पञ्च एकादश त्रयः पञ्चदश चत्वारः इति द्वाचत्वारिंशद्भागाः ब्राह्मणाख्याः। अत्र हि आत्म-ज्ञानमेवमुख्यो विषयो वानप्रस्थकृत्यानि प्रासङ्गिकानि।

कृष्णयजुर्वेदस्य तैत्तिरीयसंहितासम्बद्धं तैत्तिरीयारण्यकम्। इदं हि दशप्रपाठकेषु विभक्तं यत्र सन्ति १७० मिता अनुवाकाः इति प्रायेण। अत्रापि विषया आरण्यकान्तरसमाना एव।

सामवेदस्य जैमिनीयसंहिताया जैमिनीयोपनिषद्ब्राह्मणमेक तवलकारा-रण्यकनाम्ना प्रसिद्धम्। ब्राह्मणेऽस्मिन् सन्ति त्रय एवानुस्यूताः ब्राह्मणमारण्यक-मुपनिषच्चेति। अत्र हि साममन्त्राणां विशेषत आरण्यगेयानां व्याख्या लभ्यते। सन्त्यत्र चत्वारोऽध्यायाः प्रत्यध्यायमनुवाकाश्च।

★

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६. उपनिषत्साहित्यम्

उपनिषद्धि तुरीयाश्रमसम्बद्धशास्त्रम्। ब्राह्मणोक्तमार्गेण गार्हस्थ्यमुपनीय आरण्यकोक्तमार्गेण वानप्रस्थकृत्यं निर्वाह्य ज्ञानञ्चोपार्ज्य उपनिषदुक्तमार्गेण मुच्येतेति। यद्यपि मुण्डकोपनिषदि ऋगादिवेदानामपरात्वमक्षरविद्यायाः परात्वमुक्तं तथापि नोपनिषदामपि वेदेभ्यः पृथग्गतिः। वस्तुतस्तु वेदमन्त्रा एव परापरयोर्योनयः। यथा आरण्यकानि ब्राह्मणभागास्तथा उपनिषद आरण्यकस्येति उपनिषदामपि वेदमूलकत्वमेव सिध्यति न तु पौरुषेयत्वम्। ता हि वेदान्तशब्देनापि ज्ञायन्ते वेदानामन्तः रहस्यमिति व्युत्पत्त्यैतत्सम्भवति सम्भवतः। केचिद् वेदस्य अन्तश्चरयो भाग इत्यपि आमनन्ति। स्याद्यथा तथा। एतत्तु निश्चितमेव यदुपनिषदो हि मुमुक्षूणां हितसाधिकाः।

उपनिषदां नास्ति सङ्ख्या सुनिश्चिता। सम्प्रति अष्टोत्तरशतोपनिषदो मुद्रिता लभ्यन्ते। तासु हि ऋग्वेदसम्बद्धा ऐतरेयोपनिषद् कौषीतक्याख्या च शुक्लयजुर्वेदसम्बद्धा ईशावास्योपनिषद् बृहदारण्यकोपनिषद् च कृष्णयजुर्वेदसम्बद्धा तैत्तिरीयाख्या मैत्रायण्याख्या कठाख्या श्वेताश्वतराख्या च सामवेदसम्बद्धा छान्दोग्याख्या केनाख्या च अन्या अथर्ववेदसम्बद्धा इति कथिताः। तास्वपि ईश-कठ-केन-मण्डूक-माण्डूक्य-प्रश्न-छान्दोग्यऐतरेय बृहदारण्यक तैत्तिरीयसंज्ञका दश उपनिषदो हि प्राधान्येन गृह्यन्ते। उपनिषदां प्रपञ्चः सुविस्तृतोऽस्ति तेनात्र नावकाशस्तदुद्धरणाय।

छान्दोग्यकेनाख्ये सामवेदसम्बद्धे। तत्र छान्दोग्यो पनिषद् हि कौथुमसंहिता सम्बद्धा केनाख्या तु तवलकारशाखासम्बन्धिनी। आद्यायां हि बहुभिः प्रकारैः साम्नामुपासना सभक्तिका उपदिष्टा प्रथमं ततश्च ब्रह्मज्ञानविचारः द्वितीयायां तु उपास्यानुपास्ययोः सगुणनिर्गुणब्रह्मणोः भेदप्रदर्शनपूर्वकं ब्रह्मणो दुर्विज्ञेयता प्रतिपादितास्ति।

छान्दोग्योपनिषदि सन्ति अष्टौ प्रपाठका वाऽध्यायाः। प्रत्येकं प्रपाठकाः खण्डेषु विभक्ताः। आद्ये त्रयोदश द्वितीये चतुर्विंशतिः तृतीये एकोन विंशतिः। चतुर्थे सप्तदश पञ्चमे चतुर्विंशतिः षष्ठे षोडश सप्तमे षड्विंशतिः अष्टमे पञ्चदशेति खण्डास्तत्र।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'ओमित्येतदक्षरमुद्गीथमुपासीत ओमिति ह्युद्गायति तस्योपव्याख्यानम् ।' इत्यस्य प्रथमं वाक्यम् । ततश्च साम्नः पञ्चविधोपासनोक्ता—

'लोके पञ्चविधं साम उपासीत पृथिवी हिंकारोऽग्निः प्रस्तावोऽन्तरिक्षमुद्गीथः आदित्यः प्रतिहारो द्यौर्निधनमित्यूर्ध्वेषु ।'[1]

एताः पञ्च सामभक्तयो यद् हिंकार-प्रस्ताव-उद्गीथ-प्रतिहारनिधनानि । तत्र आदि उपद्रवयोगेन सप्त भवन्ति साम भक्तयः । वाचि सप्तविधं सामोपासीतेति ।

'उपमन्त्रयते स हिंकारो ज्ञपयते सप्रस्तावः स्त्रिया सहशेत स उद्गीथः प्रतिस्त्री सहशेते स प्रतिहारः कालं गच्छति तन्निधन पारं गच्छति तन्निधनंमेतद्वामदेव्यं मिथुने प्रोक्तम् ।'[2]

पुरुषो हि यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि तत्प्रातःसवनम् अथ यानि चतुश्चत्वारिंशद्वर्षाणि तन्माध्यन्दिनसवनमथ यानि अष्टाचत्वारिंशद्वर्षाणि तत्तृतीयसवनमिति ।

उद्यन् हिंकार उदितः प्रस्तावो मध्यन्दिन उद्गीथोऽपराह्णः प्रतिहारोऽस्तं तन्निधनमेतद्बृहदादित्ये प्रोतम् ।

इत्यादयः प्रसङ्गा अतिरोचिष्णवो हि छान्दोग्योपनिषदि लभ्यन्ते ।

★

१. २।२।१ । २. २।१३।१ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१०. कल्पसाहित्यम्

कल्पसूत्रमिति श्रौतगृह्यधर्मशुल्वसूत्राणां पारिभाषिकी संज्ञा । वेदोक्तानां कर्मणामानुपूर्व्येण कल्पनात् कल्प इत्यपि । चतुर्विधानि हि कल्पसूत्राणि श्रौतसूत्रं शुल्वसूत्रं गृह्यसूत्रं धर्मसूत्रञ्चेति ।

तत्र श्रौत शुल्वसूत्रे साक्षादेव ब्राह्मणसम्बद्धे इतरे द्वे तु परम्परयैव । श्रुतिविहितयज्ञादि विधिविवरणप्रतिपादका ग्रन्थाः श्रुतिमूलत्वात् श्रौतसूत्राणीत्युच्यन्ते । तन्निमित्तकवेदिमापन विधि प्रतिपादकानि शुल्वसूत्राणि । गृहस्थकृत्यनिर्देशकानि गृह्यसूत्राणि पारमार्थिक सामाजिक राजनैतिकादिविषयसम्बद्ध धर्मप्रतिपादकानि आचार-व्यवहार प्रायश्चित्तसम्बिद्धानि भवन्ति धर्मसूत्राणि येषां व्यापितं स्वरूपमेव स्मृतिः ।

श्रौत्रसूत्रादीन्यपि अनुमीयन्ते ब्राह्मणसङ्ख्ययैवासन्निति किन्तु सम्प्रति हि स्वल्पान्येव तानि लभ्यन्ते । तत्र ऋग्वेदीयश्रौतसूत्रेषु शाङ्ख्यायन श्रौत्रसूत्र माश्वलायनश्रौतसूत्रञ्चातीव प्रसिद्धे । शुक्लयजुर्वेदसम्बद्धमेकमेव कात्यायनश्रौतसूत्रम् कृष्णयजुर्वेदसम्बद्धानि तु बौधायन-आपस्तम्ब-सत्याषाढ वैखानस-बाधूल-भारद्वाज मानव-वाराह-काठकसंज्ञितानि श्रौतसूत्राणि नव अथर्ववेदस्य वैतानश्रौतसूत्रमेकमेव सामवेदीयश्रौतसूत्रेषु मशक-क्षुद्र-लाट्यायन-द्राह्यायण जैमिनीयाख्यानि प्रख्यातानि ।

शुल्वसूत्रेषु शुक्लयजुर्वेदस्य कात्यायनशुल्वसूत्रं कृष्णयजुर्वेदस्य बौधायनापस्तम्ब्रमानव मैत्रायणीयवाराहवाधुलसंज्ञितानि षट् शुल्वसूत्राणि लभ्यन्ते ।

गृह्यसूत्रेषु ऋग्वेदस्य आश्वलायन शाङ्ख्यायनाख्ये गृह्यसूत्रे श्रौतसूत्रे एव सम्मिलिते शुक्लयजुर्वेदस्य पारस्कर (कात्यायन) गृह्यसूत्रम् कृष्णयजुर्वेदस्य बौधायन आपस्तम्ब हिरण्यकेशि-वैखानस-अग्निवेश मानव-वाराह-काठकाख्यानि ज्ञातानि गृह्यसूत्राणि अथर्ववेदस्य कौशिकगृह्यसूत्रम् सामवेदस्य हि गोभिलगृह्यसूत्रं खादिरगृह्यसूत्रञ्चेति द्वे गृह्यसूत्रे प्रसिद्धे ।

धर्मसूत्रे तु सर्वत्र सामान्यमेव दृश्यते विषये । सामान्यतः गौतम बौधायनापस्तम्ब हिरण्यकेशीयवसिष्ठवैखानसविष्णुसंज्ञितानि धर्मसूत्राणि सर्वत्र समाद्रियन्ते । कात्यायन गोभिल धर्मसूत्रयोरपि अस्तित्व मनुमीयन्ते तज्ज्ञैः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मशककल्पसूत्रे आर्षेयाख्ये सन्ति एकादशाध्याया यत्र ज्योतिष्टोमाग्निष्टोमौ गवामयनमेकाहाः अहीनाः सत्राणि अयनानि चेति वैशद्येन प्रतिपादितानि ।

लाट्यायनश्रौतसूत्रे सन्ति दश प्रपाठकाः । 'अथ विध्यव्यपदेशे सर्वक्रत्वधिकारः' इत्यस्य प्रथमं सूत्रम् । श्रौतसूत्रमिदमार्षेय ब्राह्मणमनुसरति ।

गोभिलगृह्यसूत्रे सन्ति चत्वारः प्रपाठकाः । 'अथातो गृह्यकर्माण्युपदेक्ष्यामः' इत्यस्य प्रथमं सूत्रम् । 'यज्ञोपवीतिना आचान्तो दकेन कृत्यम्' इति द्वितीयं सूत्रम् ।

'अथातोऽग्निं प्रणेष्यन्......'इत्यादि जैमिनीयगृह्यसूत्रस्य प्रथमा कण्डिका । विषयविवेचनं तु गृह्यसूत्रान्तर साधारणमेव ।

★

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

११. उपसंहार

इत्थं हि निरूपितं सामवेदीयब्राह्मणानां स्वरूपं वैशिष्ट्यञ्च। तत्पूर्वाधारत्वेन प्रथमं वेदस्वरूपं ततो वैदिकसाहित्यं ब्राह्मणसाहित्यञ्च सङ्क्षेपेण परिचायितम्। तदङ्गत्वेन च आरण्यकसाहित्यमुपनिषत्साहित्यं कल्पसाहित्यञ्चातिसङ्क्षेपाद् वर्णितम्। सम्प्रति पूर्णोऽयं शोधप्रबन्धः।

प्रतिवेदं ब्राह्मणानि भिद्यन्ते। भिद्यन्त एव स्वस्वशाखानुयायित्वात्तेषाम्। स्वभावतो हि ऋग्वेदीय ब्राह्मणानि होतृवर्गकर्म प्राधान्येन निर्दिशन्ति एवमेव यजुर्वेदीयानि ब्राह्मणानि अध्वर्युवर्गकर्म प्रतिपादयन्ति तत्प्रकृतिकत्वात्स्वस्वशाखायाः। एवमेव सामवेदीयब्राह्मणान्यपि यज्ञे उद्गातृवर्गकृत्यानि निर्दिशन्ति प्राधान्येन निर्दिसन्ति च तत्तत्सामगानस्वरूप ऋषिदेवताच्छन्दोब्राह्मणान्यपि तत्पूर्तये। इदमेव सामवेदीयब्राह्मणानां स्वरूपं वैशिष्ट्यञ्च। तत्रापि सामविधानब्राह्मणं तु विशिष्टतरयेव यतो हीदं हि विभिन्नकृत्यसम्पादनार्थं सामप्रयोगं निर्दिशति यद्धि न क्वाप्यन्यत्र निर्दिष्टम्। विशालकाय हि मह्वाब्राह्मणं तत्परिशिष्टं षड्विंशब्राह्मणञ्च यज्ञानां तद्विकृतीनाञ्च स्वरूपं सम्पादनविधिञ्च निर्दिशतः। आर्षेयब्राह्मणे सामदर्शिनांमृषीणां सामभिः सह परिचयमुपस्थापयति। देवताध्यायब्राह्मणं हि साम्नां देवता निर्दिशति छन्दसां वर्णान् तद्देवताश्च। संहितोपनिषद्ब्राह्मणं हि सामगानस्य साहित्यमुपपादयति येन गानविरतिर्न स्यान्मध्ये। एको हिंकरोति अपरस्तस्य स्वरेण साहित्यमादाय प्रस्तौति। तृतीयो हि प्रस्तोतुः स्वरेण साहित्यमादाय उत्गाति चतुर्थश्च पुनः गानस्य स्वरसाहित्यमहत्वंव प्रतिहरति पञ्चमश्च अवसाने गानं समययति। वस्तुत एव स यज्ञो यत्रोद्गातृवर्गः सक्रियो भवति। सामविधानज्ञ उद्गाता एव तस्य हृदयम्। साम्प्रतिक युगे एतादृशा यज्ञास्तु विरलमेव श्रूयन्ते तथापि गौरवमिदं त्वक्षुण्णमेव सम्प्रत्यपि। होत्रध्वर्यूद्गातृब्रह्माणो यज्ञस्य चत्वारः स्तम्भाश्चतुर्दिक्षु। तेषामेकस्याप्यभावे कथं नाम यज्ञः सफलो भवेत्। हिङ्कारप्रस्तावोद्गीथ प्रतिहार निधनाख्याः साममक्रयो हि शाश्वताः। तासामवास्थितिः सर्वत्र लभ्यते लोके वृष्टौ वर्षासु ऋतुषु मिथुने तत्र तत्र च।

प्रबन्धस्यास्य प्रयोजनमपि पूर्वापरसंयोगपूर्वकं सामब्राह्मणेषु जनानां रुच्युत्पादममेव न तु तेषां साङ्गोपाङ्गविवेचनम्। सामगानसंहितेव साम-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्राह्मणानामपि साहित्यं भवति उत्तरस्य पूर्वपूरकत्वात्। यद्यपि गानसाहित्ये वंशब्राह्मणं नैवोपकारि तथापि तस्यापि महत्वं नैव न्यूनीकर्तुं शक्यते परम्पराज्ञानेन जनानां तत्र प्रवृत्त्याधिक्यसम्भवात्। नैतावन्मात्रमपितु पूज्यमहर्षिनामग्रहणेन पाययति च सर्वानपि। जैमिनीयोपनिषद्ब्राह्मणस्यापि स्वप्रकारकमेव महत्त्वम्। एतद्धि स्वविषये परमुत्कर्षमावहति।

अथ समाप्यते प्रबन्धोऽयमेतावन्मात्रकथनेन।

❀ ॐ स्वस्ति ❀

तदित्थं व्याखयातं सङ्क्षेपेण सामवेदीय ब्राह्मणानां स्वरूपं वैशिष्ट्यञ्च। सामान्यतस्तु मन्त्राणां कर्मसु विनियोगकथनमेव ब्राह्मणानां विषयः। यथाऽऽह शौनकः—

तत्र तत्र यथावच्च मन्त्रान् कर्मसु योजयेत्।
देवताया परिज्ञानात् तद्धि कर्म समृध्यते।

इति [1] स्वराणां देवता अधिकृत्य तत्रोक्तम्—

वदन्ति देवताः क्रुष्टं मनुष्याः प्रथमं स्वरम्।
द्वितीयं पशवः सर्वे गन्धर्वाप्सरसः स्वरम्।
अण्डजाः पक्षिणः सर्पाश्चतुर्थमुपभुञ्जते।
मन्द्रं पिशाचा रक्षांसि असुराश्चोपभुञ्जते।
अतिस्वारस्तु सर्वस्य जङ्गमस्थावरस्य च।
वैश्वदेवः स्वरः क्रुष्टो नित्यं यो मूर्ध्नि तिष्ठति।
तालव्यः प्रथमं साम्नां स्वर आदित्य दैवतः।

---

१. बृहद्देवता १।२१।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वरो द्वितीयः साध्यानां भ्रुवोर्देशं समाश्रितः।
आश्विनस्तु तृतीयोऽत्र स्वरः कर्णौ समाश्रितः।
चतुर्थस्त्वत्र वायव्यो नासिक्यः स्वर उच्यते।
पञ्चमस्तु स्वरः प्रोक्तश्चाक्षुषः सूर्यदैवतः।
यस्तु सामस्वरः षष्ठः स सौम्यो मन्द्र उच्यते।
विकर्षेण तु मन्द्रस्य युक्तोऽतिस्वार्थ उच्यते।
स मैत्रावरुणा ज्ञेयो मन्द्रस्थानसमाहितः।
सामस्वराणां सप्तानामेते देवाः इहोदिताः।
त्रयाणामितरेषां तु लोकाधिपतयस्त्रयः।
वाग्दैवत्योऽथवाऽऽग्नेयः प्रस्तावश्चैव सामसु।
उद्गीथोपद्रवावैन्द्रौ स्यातां वा वायुदैवतौ।
सौर्यः स्यात्प्रतिहारोऽत्र निधनं वैश्वदेवतम्।
हिङ्कारप्रणवाभ्यां तु पुरस्तादेव कीर्तनात्।

इति।[1]

यद्यपि सर्वेष्वेव वेदेषु स्वरस्योपयोगिता समानैव यतो ह्युच्यते स्वरतो वर्णतो वा हीनो मन्त्रो मिथ्याप्रयुक्तो भवति न चाभीष्टमर्थं व्यनक्ति इति। तत्रापि सामवेदे तु स्वरः प्राणस्थानीय एव। सामवेदिना ह्यवश्यमेव तानरागस्वरग्राममूर्च्छना बृहद्देवता विषये विशिष्टं ज्ञानमुपार्जनीयम्। तत्र हि ताना एकोनपञ्चाशद् स्वराः सप्त त्रयो ग्रामा एक विंशति मूर्च्छना इत्येतत्स्वरमण्डलं भवति। यथोक्तम्—

सप्त स्वरास्त्रयो ग्रामा मूर्च्छनास्त्वेकविंशतिः।
ताना एकोनपञ्चाशदित्येतत्स्वरमण्डलम्।

इति।[2]

गानस्य हि दशविधा गुणवृत्तिर्भवति रक्तं पूर्णमलङ्कृतं प्रसन्नं व्यक्तं विक्रुष्टं समं सुकुमारं मधुरं श्लक्ष्णमिति। एवमेव चतुर्दश गीतिदोषाः। यथा—

१. तत्रैव ८।११४-१२३। २. नारदीय शिक्षा ४।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शङ्कितं भीतमुद्घृष्टमव्यक्तमनुनासिकम् ।
काकस्वरं शिरसिगतं तथा स्थानविवर्जितम् ।
विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम् ।
व्याकुलं तालुहीनञ्च गीतिदोषाश्चतुर्दश ।

इति ।[1]

सामवेदस्य हि सन्ति कतिपयानि मुद्रितसंस्करणानि येषु १९०० मितवैक्रमाब्दे मुद्रितं स्टिभेन्सनसंस्करणम् १९०५ मितवैक्रमाब्दे मुद्रितं वेनफेसंस्करणम् सत्यव्रतसामाश्रमिसंस्करणं सायणभाष्यसहितम् नरेन्द्रचन्द्रसंस्करणम् रघुवीरसंस्करणम् अजमेरसंस्करणम् दयानन्दसंस्करणम् श्रीपाददामोदरसंस्करणञ्चेति प्रसिद्धानि ।

सामवेदस्याप्यनेके भाष्यग्रन्थाः प्रणीताः सन्ति । तेषु माधवाख्यप्रणीतं विवरणाख्यं भाष्यमाद्यत्वेन गृह्यते । नारायणाख्यस्य पुत्रत्वेन सम्मतोऽसौ विचक्षणोः वाणभट्टपूर्ववर्तीति विपश्चिद्भिरनुमीयते ।

भरतस्वामिनोऽपि सामवेदस्य भाष्यं प्रणीतमस्ति । पिताऽस्य नारायणाख्यो माता च यज्ञदा ।

गुणविष्णुर्हि सामवेदस्यापरो भाष्यकारः । इदमेव भाष्यं सायणप्रणीतभाष्यस्याधार इति तज्ज्ञाः वदन्ति ।

सायणाचार्यप्रणीतं सामभाष्यं तु सर्वविदितमेव यद्धि प्रथमं सत्यव्रतसामाश्रमिभिः कलिकातायां प्रकाशितम् । गार्ग्यो मुनिः सामवेदस्य पदपाठकारत्वेन स्मर्यते

इत्यलमतिविस्तरेणेति ।

---

१. तत्रैव ११।१२ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिशिष्टम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उपयोजितग्रन्थसूची

प्रबन्धस्यास्य प्रणयने ये खलु ग्रन्था उपयोजितास्तेषां नामान्यत्रोद्दिश्यन्ते कृतज्ञताज्ञापनार्थम् ।

१. संस्कृतसाहित्यविमर्शः— द्विजेन्द्रनाथशास्त्रिविरचितः भारतीयप्रतिष्ठानं मयनगरम् । उत्तरप्रदेशः २०१३ वै. प्रथमावृत्तिः

२. वेदभाष्यभूमिका संङ्ग्रहः-- बलदेवोपाध्यायसम्पादितः चौखम्बा संस्कृतसीरिज प्रथमावृत्तिः १९९१ वै.

३. वेदप्रामाण्यचन्द्रिका-- राजारामशास्त्री खेमराजश्रीकृष्णदासः प्रथमावृत्तिः

४. प्रपञ्चहृदयम्-- अज्ञातकर्तृकम् गणपतिशास्त्रिसम्पादितम् अनन्तशयनम् प्रथमावृत्तिः १९१५ ख्रै.

५. वेदप्रकाशः-- श्री पट्टाभिरामशास्त्रिसम्पादितम् चौखम्बा संस्कृतसीरिज प्रथमावृत्तिः १९९१ वै.

६. मीमांसादर्शनम्-- महर्षिजैमिनिप्रणीतम् शावरभाष्योपेतम् जीनानन्दविद्यासागरः प्रथमावृत्तिः १८८४ ख्रै.

७. ,, सुबोधिनीव्याख्योपेतम्

८. जैमिनीयन्यायमाला-- माधवाचार्यप्रणीता आनन्दाश्रमः पूना प्रथमावृत्तिः १९११ ख्रै.

९. श्लोकवार्तिकम्— महर्षिकुमारिलभट्टप्रणीतम् द्वारिकादाससम्पादितम् रत्नाप्रकाशनम् वाराणसी प्रथमावृत्तिः १९७८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१०. तन्त्रवार्तिकम् — " " " "

११. टुप्टीका — " " " "

१२. श्लोकवार्तिकव्याख्या— भट्टोम्बकेप्रणीता मद्रपुरी विश्वविद्यालयः प्रथमावृत्तिः १९४० ख्रै.

१३. तन्त्रसिद्धान्तरत्नावली— चिन्नस्वामिशास्त्रिप्रणीता प्रथमावृत्तिः २००१ वै०

14. The Call of The Vedas—A. C. Bose. Bharatiya Vidya-bhawan Bombay Second Edition 1966

१५. चरणव्यूहसूत्रम्-- महिदासव्याख्योपेतम् अनन्तरामसम्पादितम् चौखम्बा संस्कृत सीरिज आफिस प्र० १९९५ वै०

१६. कात्यायनश्रौतसूत्रम्— वेबरसम्पादितम् चौखम्बा संस्कृत सीरिज आफिस १९७२ ख्रै०

१७. व्याकरणशास्त्रेतिहासः-- आचार्यलोकमणिदाहाल भारतीयविद्याप्रकाशन वाराणसी प्रथमावृत्तिः १९९० ख्रै०

१८. ऋग्वेदसंहिता— श्रीपाददामोदरसम्पादित स्वाध्यायमण्डल पारडी चतुर्थावृत्तिः

१९. " परोपकारिसभया प्रकाशिता २०१० वै०

२०. " सायणभाष्ययुता मोक्षमूलरसम्पादिता चौखम्बा संस्कृत सीरिज १९६६ ख्रै०

२१. यजुर्वेदसंहिता-- श्रीपाददामोदरसम्पादिता स्वाध्यायमण्डलं पारडी चतुर्थं संस्करणम्

२२. " युधिष्ठिरमीमांसकप्रणीतभूमिकोपेता दयाराम हासानन्द प्र० २०१७ वै०

२३. " उव्वटमहीधरभाष्योपेता वासुदेवसम्पादिता निर्णयसागर प्रेस बम्बई १९२९ ख्रै०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२४. अथर्ववेदसंहिता-- श्रीपाददामोदरसम्पादिता स्वाध्यायमण्डलं पारडी चतुर्थावृत्तिः
२५. सामवेदसंहिता-- श्रीपाददामोदरसंम्पादिता स्वाध्यायमण्डलं चतुर्थावृत्तिः
२६. ,, परोपकारिसभाप्रकाशिता सप्तमावृत्तिः २०१८ वै०
२७. शतपथब्राह्मणम्-- पट्टाभिरामशास्त्रिसम्पादितम् चौखम्बा संस्कृत सीरीज १६६४ वै०
२८. ऐतरेयब्राह्मणम्-- चौखम्बा संस्कृतसंस्थानम् १६८७ ख्री०
२९. तैत्तिरीयब्राह्मणम्-- आनन्दाश्रमः पूना १९७५ वै०
३०. ताण्ड्यमहाब्राह्मणम्-- चौखम्बा संस्कृत सीरीज
३१. षड्विंशब्राह्मणम्— केन्द्रीय संस्कृतविद्यापीठम् तिरुपतिः
३२. सामविधानब्राह्मणम्— ,,
३३. आर्षेयब्राह्मणम्— ,,
३४. देवताध्यायब्राह्मणम्— ,,
३५. संहितोपनिषद्ब्राह्मणम्— ,,
३६. वंशब्राह्मणम्— ,,
३७. उपनिषद्ब्राह्मणम्— ,,
३८. जैमिनीयब्राह्मणम्— ,,
३९. मन्त्रब्राह्मणम्— ,,
४०. ऋक्तन्त्रम्— मेहरचन्द्र लक्ष्मीचन्द्र, दिल्ली १९७० ख्री०
४१. ईशाद्यष्टोत्तरशतोपनिषदः-- वासुदेवशर्मसम्पादिताः निर्णयसागर प्रेस १९३२
४२. छान्दोग्योपनिषद्— आनन्दाश्रमः १९१३ ख्रैस्ताब्दाः
४३. वेदशाखापर्यालोचनम्— डॉ० श्रीकिशोरमिश्रः २०४२ वै०
४४. कात्यायनगृह्यसूत्रम्— युधिष्ठिरमीमांसकसम्पादितम् प्रथमावृत्तिः २०४० वै०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४५. कात्यायनशुल्वसूत्रम्— अनन्तरामसम्पादितम्, चौखम्बा संस्कृत सीरीज १९९३ वै०

४६. निरुक्तम्— यास्काचार्यप्रणीतम् मुकुन्दशर्मणा सम्पादितम् चौखम्बा संस्कृतप्रतिष्ठानम् १९८९ ख्री०

४७. महाभाष्यम् — भगवत्पतञ्जलिप्रणीतम्, नारायणशास्त्रि प्रकाशितम् १९४३ वै०

४८. ज्योत्स्नावृत्तिः-- डॉ० युगलकिशोरमिश्रसम्पादिता सम्पूर्णानन्द संस्कृत विश्वविद्यालयः १९८९ ख्री०

४९. भाषावृत्तिः-- पुरुषोत्तमदेवप्रणीता, ताराप्रकाशनं, वाराणसी १९७१ ख्री०

५०. लाट्यायनश्रौतसूत्रम्-- आनन्दचन्द्रसम्पादितम् मुन्शीराम मनोहरलाल

५१. मशकश्रौतसूत्रम्-- विश्वेश्वरानन्द वैदिक रिसर्च इन्स्टिच्यूट १९६७ ख्री०

५२. गोभिलगृह्यसूत्रम्-- चिन्तामणिभट्टाचार्यसम्पादितम् मुन्शीराम मनोहरलाल

५३. मधुपर्कपर्यालोचनम्— डा० श्रीकिशोरमिश्र प्रणीतम् २०४५ वै०

★

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection